In Public domain. Digitization Muthulakshmi Research Academy

तर्कसंग्रहः

न्यायबोधिन्याः संस्कृत-हिन्दीकलाद्वयव्याख्यया
पदकृत्यस्य हिन्दीटिप्पणेन चोपेतः

सानुवादव्याख्याद्वयकारः टिप्पणीकारः सम्पादकश्च
आचार्यकेदारनाथत्रिपाठी 'दर्शनरत्नम्'

In Public domain. Digitization Muthulakshmi Research Acade

In Public domain. Digitization Muthulakshmi Research Academy

तर्कसंग्रहः

सानुवादः

न्यायबोधिन्याः संस्कृत-हिन्दीकलाद्वयव्याख्यया
पदकृत्यस्य हिन्दीटिप्पणेन चोपेतः

सानुवादव्याख्याद्वयकारः टिप्पणीकारः सम्पादकश्च
आचार्यकेदारनाथत्रिपाठी 'दर्शनरत्नम्'
न्यायवेदान्तसांख्ययोगाचार्यः, काव्यतीर्थः, साहित्यरत्नम्
भूतपूर्वदर्शनविभागाध्यक्षः
काशीहिन्दूविश्वविद्यालये
वाराणसी

मो ती ला ल ब ना र सी दा स
दिल्ली □ वाराणसी □ पटना □ मद्रास

In Public domain. Digitization Muthulakshmi Research Academy

© मो ती ला ल ब ना र सी दा स

कार्यालयः—बंगलो रोड, जवाहरनगर, दिल्ली–११० ००७
शाखाः—☐ चौक, वाराणसी–२२१ ००१ (उ० प्र०)
☐ अशोक राजपथ, पटना–८६४ ००४ (बिहार)
☐ ६ अपरस्वामी कोइल स्ट्रीट, मद्रास–६०० ००४

द्वितीयसंस्करणम् : १९८५

मूल्यम् : रु० ३०

श्रीनरेन्द्रप्रकाश जैन, मोतीलाल बनारसीदास, दिल्ली ७ द्वारा प्रकाशित तथा
श्यामिका प्रिंटिंग प्रेस, नईबस्ती, वाराणसी द्वारा मुद्रित

In Public domain. Digitization Muthulakshmi Research Academy

किञ्चिन्निवेदनम्

अथेदं प्रस्तूयते 'संस्कृत-हिन्दीकला' द्वयकलितया न्यायबोधिन्या सहिन्दीटिप्पणेन पदकृत्येन च संवलितस्य 'तर्कसंग्रह' इति सुविदितनामधेयस्य न्यायवैशेषिकयोर्महोपयोगिनः प्राथमिकस्य प्रकरणग्रन्थस्य संस्करणान्तरं तत्रभवतां भवतां न्यायविद्यारसिकानां पुरतः। विदितमेतच्छास्त्रेष्वधीतिनां यत् सकलेषु भारतीयदर्शनेषु महती ह्यस्ति परम्परा न्यायग्रन्थानाम्। सा च बौद्धानामुत्कर्षेण सहैधमानाऽन्ततः सर्वत्र निजविजयवैजयन्तीमुत्तोलयन्ती क्रमेण भूयसीं ग्रन्थसम्पत्तिं विभ्रती साम्प्रतं विभ्राजतेतराम्। अस्यामेव परम्परायां न्यायसिद्धान्तमुक्तावली-तर्कभाषादिग्रन्थत आरभ्य वाद्यान्तनव्यन्यायग्रन्थाः न्यायभाष्यवार्तिकतात्पर्यटीकापरिशुद्धिप्रभृतयः किरणावली-न्यायमञ्जरी-न्यायलीलावतीप्रभृतयश्च प्राचीनन्यायवैशेषिकग्रन्थाः स्वगुणगरिम्णा सर्वतः प्रसारमासाद्य भूरिश उपकारान् शास्त्रीयजगति विदधतीति न तिरोहितं विदुषाम्। तथापि तेषां ग्रन्थानां सुकुमारमतीनां बालजनानां दुरवगमतामाकलय्य श्रीमदन्नम्भट्टस्तर्कसङ्ग्रहनामानं न्यायवैशेषिकाश्रितं ग्रन्थं प्रणिनाय। तदुपरि च स्वयं मूलकारः श्रीमानन्नम्भट्टः प्राचीनन्यायसरण्या दीपिकाभिधां व्याख्यां, सुधीगोवर्धनो नव्यन्यायसरण्या न्यायबोधिनीं, श्रीचन्द्रजसिंहश्च संक्षिप्तमपि गूढाभिप्रायं 'पदकृत्ये'ति यथार्थसंज्ञं व्याख्याग्रन्थं व्यरचयन्।

तत्र चेदानीं नव्यन्यायसरण्याः प्रायः सर्वेष्वेव शास्त्रेष्वनुप्रविष्टतया सारल्येन तस्याः परिचयाभिलाषिणां लाभाय नव्यन्यायनगरप्रवेशे गोपुरायमाणाया न्यायबोधिन्या उपरि बहोः कालात् सरलां विशदाञ्च व्याख्यां कर्तुमनाः 'संस्कृत-कला' निर्माणेऽहं प्रावर्तिषि, समपूपुरं प्राचीकशश्च तां स्वयमेव। 'संस्कृत-कलायाः' निर्माणावसरे नूनं पाण्डित्यप्रदर्शनमनभ्याशमित्यमित्यासीन्मम मनसि। अतएव विद्यार्थिभिर्विद्वद्भिश्च भृशं समादृतत्वात् स्वल्पैरेव वर्षैर्विपणिषु तस्याः संजाताद् दौर्लभ्यादध्येतृवर्गाध्यापकवर्गयोः पुनस्तस्याः प्रकाशनार्थमुत्सुकतां दृष्ट्वा संस्करणान्तराय प्रायस्यंस्तथा छात्राणां कृते विशेषोपयोगितादृष्ट्या संस्कृत-कलया सहैव हिन्दीकलयापि न्यायबोधिनीं समयोजयम्।

यद्यपि विहारोत्कलवङ्गप्रान्तेषु न्यायबोधिन्येव प्रायस्तत्रत्यपरीक्षासु पाठ्यतया निर्धारिताऽऽस्ते, तथापि सम्पूर्णानन्दसंस्कृतविश्वविद्यालयादिषु च पदकृत्यस्य निर्धारिततया तदपि मया गूढस्थलेषु हिन्दीटिप्पणेन सह संयोजितं परीक्षार्थिनामुपकारायेति।

In Public domain. Digitization Muthulakshmi Research Academy

इत्थञ्च 'कलाद्वय' संवलितन्यायबोधिन्या हिन्दीटिप्पणोपेतेन पदकृत्येन च पुरस्कृतं तर्कसंग्रहमिमं प्रकाशयितुकामाः दुर्लभानां महत्त्वपूर्णानां च संस्कृत-वाङ्मयग्रन्थानां प्रकाशनादिविधिना संस्कृतविद्यासंरक्षणबद्धादराः हिन्दीसंस्कृताङ्गलभाषासूपनिबद्धग्रन्थरत्नानां सुप्रसिद्धप्रकाशकाः श्रीमोतीलालबनारसीदाससंस्थाया अध्यक्षा नवसंस्कारेण प्रकाश्य महान्तमुपकारं विहितवन्तो विद्यार्थिनां जिज्ञासूनाञ्चेति सर्वथा धन्यवादपात्राणि ते ।

तत्रभवान् तर्कसङ्ग्रहप्रणेता श्रीमदन्नम्भट्टो नाम्ना दाक्षिणात्य इति स्पष्टमेव । अयं तैलङ्गो ब्राह्मणो राघवसोमयाजिकुले समुत्पन्नो अद्वैतविद्याचार्यस्य तिरुमलस्यात्मज इति भाष्यप्रदीपोद्योतने तेनैव विदुषा लिखितम् । अस्य समयः १६२५–१७०० ई० वर्षमिति 'इन्ट्रोडक्शन टु तर्कसङ्ग्रह' इति ग्रन्थे अथल्येबोजसाभ्यां प्रतिपादितमित्युद्धृतं डॉ० दयानन्दभार्गवेण तर्कसङ्ग्रहावतरणिकायाम् । १६५० ई० वर्षेऽभूदिति केचित् । अष्टादशशताब्द्याः प्रथमे पादेऽयमभूदिति बोड्समहोदय आह । श्रीगोड्बोलेमहोदयः स्वरचिते 'भारतखण्डाचा ऐतिहासिक कोष' नाम्नि महाराष्ट्रियभाषाग्रन्थेऽन्नम्भट्टं पञ्चदशे शतके आन्ध्रप्रदेशस्य गरिकपायग्रामे समुत्पन्नमाह । किन्तु अपरे नैतं तस्य समयमङ्गीकुर्वन्ति गदाधरविश्वनाथन्यायपञ्चाननोत्तरकाले तस्य भावात् । अनेनान्येऽपि कतिपयग्रन्था निर्मिताः । काश्यामागत्यायमधीतवानिति "काशीगमनमात्रेण नान्नम्भट्टायते द्विजः" इति लोकोक्त्या विज्ञायते ।

न्यायबोधिनीकर्तुर्गोवर्धनस्य सम्बन्धेऽपि विद्यते मतभेदः । तथाप्ययं मैथिलस्तर्कभाषाकर्तुः केशवमिश्रादर्वाचीनः इति तर्कभाषाया उपरि तर्कभाषाप्रकाशनाम्न्याष्टीकायाः प्रणयनात् प्रतीयते । अयं बलभद्रविजयश्रियोरात्मजो विश्वनाथपद्मनाभयोश्चानुज इति तर्कभाषाटीकारम्भपद्यैः प्रतीयते । पद्मनाभश्च किरणावलीभास्करे वर्धमानोपाध्यायं स्मरति । अतो गङ्गेशोपाध्यायपुत्राद् वर्धमानोपाध्यायात् पश्चात्कालवर्ती अर्वाचीनो गोवर्धन इत्यत्र नास्ति सन्देहः । अस्य विचारस्यान्नम्भट्टकालनिर्णयेन सामञ्जस्यमप्युपपद्यते । अत एव १३०० तमे शकाब्दे विद्यमानेन गीतगोविन्दकारजयदेवेनोल्लिखिताद् गोवर्धनाचार्यादन्य एवायं न्यायबोधिनीप्रणेता गोवर्धन इति मन्तव्यम् ।

पदकृत्यनिर्माता चन्द्रजसिंहः चन्द्रसिंहो वा श्रीगुरुदत्तसिंहशिष्य इति ग्रन्थान्तपुष्पिकातोऽवगम्यते यत् सम्भवतोऽयं कश्चित् त्यागी महात्मा भवेदिति । पुष्पिकायामुल्लिखितम्—"इति श्रीमत्तत्रभवद्गुरुदत्तसिंहशिष्यश्रीचन्द्रजसिंहविरचितं पदकृत्यं समाप्तम्" इति । प्रायो महात्मानः स्वपरिचये गुरुनामैवोल्लिखन्ति न पितृनामेति दृश्यते सम्प्रदायः । सिंहेति कथनात् पञ्चनदप्रान्तीयो भवेत् । सामग्र्यभावान्नास्य विषयेऽधिकमिदानीं वक्तुमर्हमिति मन्ये ।

In Public domain. Digitization Muthulakshmi Research Academy

अस्य मदीयव्याख्याग्रन्थस्य पूर्वसंस्करणे भूमिकां लेखितुं मयाऽनुरुद्धाः पण्डितप्रकाण्डा न्यायविद्याम्भोधिपारावारीणाः सम्पूर्णानन्दसंस्कृतविश्वविद्यालये न्यायवैशेषिकविभागाध्यक्षपदं पुनस्तत्रैव कुलपतिपदं चालङ्कृतवन्तः पण्डितराजा आचार्यबदरीनाथशुक्लमहोदयाः प्रास्ताविकलेखनेन मां भृशमनुगृहीतवन्त इति तेषां सततमहं कृतज्ञतामावहामि। तच्च पूर्वसंस्करणगतं प्रास्ताविकं विद्यार्थिनां कृते बहूपयोगि मन्यमानः पुनरत्रापि संस्करणे यथावदुद्धरामीति। तत्रत्यनिर्देशानुसारेणात्र पूर्वसंस्करणगतायास्त्रुटेः परिमार्जनाय प्रयासो मया विहितः। तथापि मुद्रणस्खलनानुमानुष्यकनान्तरीयकाद्वा प्रमादाज्जातास्त्रुटीः क्षमिष्यन्ते विपश्चित इति सविनयं निवेदयते —

विदुषामाश्रवः

केदारनाथत्रिपाठी

भूतपूर्वदर्शनविभागाध्यक्षः

काशीहिन्दूविश्वविद्यालये

वाराणसी

कार्तिकशुक्ला सप्तमी,

२०४१ वि० सं०

In Public domain. Digitization Muthulakshmi Research Academy

प्रास्ताविकम्

वाराणसेय सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य
पूर्वं न्यायवैशेषिकविभागाध्यक्षपदं
ततः कुलपतिपदञ्चालङ्कृतवतां
आचार्यप्रवरश्रीबदरीनाथशुक्लमहोदयानाम्

सृष्टिचक्रं किलेदमनादि। तद् येभ्यो जीवेभ्यः प्रवर्तते, तेऽप्यनादयोऽनन्ताश्च। ते हि पूर्वस्यां सृष्टौ विहितनिषिद्धकर्मानुष्ठाने यानि सुकृतानि दुष्कृतानि पुण्यपापापर-नामान्यदृष्टशब्दव्यपदेश्यान्यर्जयन्ति, तदनुसारेण परमेश्वर उत्तरां सृष्टिं निर्माय समुत्पाद्य च नानाविधानुच्चावचान् प्राणिनस्तेषु ग्रहणधारणानुष्ठानक्षमतया वरिष्ठान् मनुष्यानुद्दिश्य प्राणभृतामनुग्रहाय "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चे" ति चतस्रो विद्या उपदिशति। यथोक्तं — न्यायसूत्रवात्स्यायनभाष्ये "इमाश्चतस्रो विद्याः प्राणभृतामनुग्रहायोपदिश्यन्ते" इति।

विद्यास्वासु प्रथमा पदार्थशास्त्रम्, द्वितीया आचारशास्त्रम्, तृतीया अर्थशास्त्रम्, चतुर्थी च राजशास्त्रम्। जनजीवनस्य सामग्र्येणाभिरेव निर्वाह्यमाणतया नान्यः काचिदन्या विद्या। नामान्तरैरन्यविद्यात्वेन यत्र तत्र वर्ण्यमानानां सर्वासामेव विद्यानामासु चतसृष्वेवान्तर्भावात्।

तत्रान्वीक्षिकीं निर्ब्रुवता वात्स्यायनेन न्यायसूत्रभाष्ये तावदिदमुक्तं यत् 'प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा, तया प्रवर्तते या विद्या, सान्वीक्षिकी। इयमेव न्यायविद्या, न्यायशास्त्रं, तर्कशास्त्रं च। यतो विद्येयं पदार्थशास्त्रम्, अनयैव पदार्थाः परिच्छेद्यन्ते। पदार्थपरिच्छेदपरतन्त्रमेव च सर्वं कार्यजातमतो विद्येयं सर्वविद्यानां मूर्धन्यभूता। यथोक्तमाचार्यकौटिल्येन "प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्। आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता" इति।

तदेवं विद्याया अस्या विधेयं प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणं, तच्च प्रमाणैरर्थ-परीक्षणं, स एव न्यायः। अनेन विधिना परीक्ष्य निर्णीता अर्था एव आन्वीक्षिकी-शास्त्रस्य न्यायशास्त्रस्य तर्कशास्त्रस्य वा प्रतिपाद्याः सिद्धान्तभूता विषयाः। एषामेव सङ्क्षेपतोऽवबोधाय तत्रभवता प्रतिभावता अन्नम्भट्टेन 'तर्कसङ्ग्रह' नामा प्रकरणग्रन्थः प्रणीतः। यदुल्लेखः तर्कसङ्ग्रहस्यारम्भभागे "निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्। बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः॥" इति।

In Public domain. Digitization Muthulakshmi Research Academy

'तर्कसङ्ग्रह' इत्यत्र तर्कशब्दस्तर्कशास्त्रप्रतिपाद्यपरस्तर्कानुग्राह्यपरो वा। सङ्ग्रह-शब्दश्च संक्षिप्तग्रहसाधनपरः। तथा च तर्कसङ्ग्रहो नाम तर्कानुगृहीतप्रमाणैः परिच्छिन्नानां तर्कशास्त्रप्रतिपाद्यानां बोधकः संक्षिप्तः शब्दसमूहः। स च बालशब्देन विवक्षितानां समधीतकाव्यकोशव्याकरणादीनामनधीततर्कशास्त्राणां च जनानां तत्तत्पदार्थस्याक्लेशेन बोधनाय ग्रन्थकृता प्रयुक्तः। तमेवाधिकृत्य सुधिया गोवर्धनेन न्यायबोधिनीनामा व्याख्याग्रन्थो विरचितः। यथोक्तं तदुपक्रमे तेनैव "अखिलागमसञ्चारि श्रीकृष्णाख्यं परं महः। ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम् ॥" इति।

तत्र न्यायो नाम न्यायभाष्यानुसारेण 'प्रमाणैरर्थपरीक्षणं न्यायः', न्यायवार्तिकानुसारेण 'वाक्यभावमापन्नानि प्रत्यक्षादीनि प्रमाणान्येव न्यायः', प्राचीनपरिभाषानुसारेण 'समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यं न्यायः', तत्त्वचिन्तामणिकृतो गङ्गेशोपाध्यायस्यानुसारेण 'अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः' दीधितिकृतो रघुनाथस्यानुसारेण 'उचितानुपूर्वीकप्रतिज्ञादिवाक्यपञ्चकं न्यायः'। किन्त्वेषु न्यायबोधिनीशब्दघटको न्यायशब्दो न कमप्यभिधत्ते, किन्तु न्यायनिर्णीतमर्थसार्थं ब्रूते, तस्यैव बोधनाय व्याख्याग्रन्थस्यास्य प्रवृत्तेः। तर्कसङ्ग्रहो हि व्याख्येयग्रन्थः, न्यायबोधिनी च व्याख्याग्रन्थः, व्याख्येयव्याख्याग्रन्थयोश्च समानविषयत्वं सर्वसम्मतम्। अतस्तर्कशास्त्रप्रतिपाद्या न्यायशास्त्रप्रतिपाद्याश्च अर्था अभिन्नाः, तेषामेव सुखाववोधार्थमुभयोः ग्रन्थयोरवतारः।

बालानां सुखबोधाय प्रणीतस्यापि तर्कसङ्ग्रहस्य भविष्यति काले दुर्गमतां विभाव्य तन्निराचिकीर्षया तर्कसङ्ग्रहेणाहत्य बोधनानर्हाणां बहूनामर्थानां प्रतिपिपादयिषया च न्यायबोधिनी निर्मिता तत्रभवता विद्वद्वरेण गोवर्धनेन। वर्तमाने काले न्यायबोधिन्या अपि दुर्बोधतां विभाव्य सारल्येन तद्वर्णनीयार्थानामनायासं सुस्पष्टञ्च बुबोधयिषया वर्तमानेषु व्युत्पन्ननैयायिकेष्वन्यतमेन पण्डितप्रवरेण काशीहिन्दूविश्वविद्यालयस्य संस्कृतमहाविद्यालये दर्शनविभागाध्यक्षेण श्रीकेदारनाथत्रिपाठिना कलानाम्नीं तद्व्याख्यां विधाय न्यायशास्त्रस्य समग्रो विद्यार्थिवर्गो बहुलः शिक्षकवर्गश्च स्थाने उपचिकीर्षितः।

श्रीत्रिपाठिना पदार्थानां सरलीकरणस्य या कला आत्मनः कलायां प्रदर्शिता, सा कलाशालासु छात्राणामविकलं कलं जनयितुं भृशं कुशलेति कतिपयोदाहरणोपन्यासेन प्रमाणयितुं शक्यते। यथा–षष्ठे पृष्ठे 'अयं भाव' इत्यादिना ग्रन्थेन लक्ष्यत्वलक्षणत्वादीनां बोधनम्, अष्टमनवमपृष्ठयोः 'अत्रायं भाव' इत्यादिना ग्रन्थेन वायुलक्षणघटकस्य रूपत्वावच्छिन्नप्रतियोगिताकाभावस्य बोधनम्, द्वात्रिंशपृष्ठे 'अयं भाव' इत्यादिना त्रयस्त्रिंशे पृष्ठे 'अयमाशय' इत्यादिना च समवायिकारणत्वादीनां बोधनम्, अष्टचत्वारिंशे पृष्ठे 'अयमाशय' इत्यादिना उद्देश्यत्वविधेयत्वादीनां बोधनम्, षट्सप्ततितमे पृष्ठे परिष्कृतस्यानुभवजन्यत्वस्य बोधनम्, द्व्यशीतितमे पृष्ठे 'एतेषां कथं सप्तस्वन्तर्भाव इति चेत्, इत्थम्' इत्यादिना ग्रन्थेन प्रमाणादीनां द्रव्यादिपदार्थेष्वन्तर्भावबोधनम्।

In Public domain. Digitization Muthulakshmi Research Academy

तर्कसङ्ग्रहः पदकृत्याख्यव्याख्यया सह बहुत्र शिक्षासंस्थानेषु पाठ्यग्रन्थतया निर्धारितो वर्तते, किन्तु पदकृत्यग्रन्थस्य संक्षिप्तकायतयाऽनेकत्र दुरवबोधता सर्वविदिताऽतस्तदपाचिकीर्षया श्रीत्रिपाठिमहोदयेन भूयसां तदंशानां राष्ट्रभाषया विस्फोरणं कृतं, यद् विद्यार्थिवर्गस्यात्यन्तमुपकारकम्। यदि ग्रन्थ एष श्रीत्रिपाठिना साकल्येन राष्ट्रभाषयाऽवतार्येत, तदा तेन महीयानुपकारो विद्यार्थिनां स्यादिति मे धारणा। एवञ्चैतत्संस्करणगता त्रुटिर्नूनं संस्करणान्तरे परिह्रियेतेत्याशासे।

एभिरेव शब्दैः श्रीत्रिपाठिभिः प्रस्तुतायाः कृतेः परिचयं वितन्वन् तस्या विद्वज्जनस्तुत्यतां विद्यार्थिनिवहोपादेयताञ्च कामयमानस्तदर्थं श्रीत्रिपाठिमहोदयमहं सानन्दमभिनन्दयामि अनुरुणध्मि च यत्तेनान्या अप्येवंविधाः कृतयः प्रस्तोतव्या, येन न्यायविद्या लोकस्य सुखप्राप्या भवेत्।

बदरीनाथशुक्लः
[न्यायवैशेषिकविभागाध्यक्षः]
वाराणसेयसंस्कृतविश्वविद्यालये
वाराणसी

जुलाई, १९७४

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रमणिका

न्यायबोधिन्यां संस्कृत-हिन्दीकलाद्वयोपेतायाम्

प्रत्यक्षपरिच्छेदः

विषयः	पृष्ठम् हिन्दी-कला	पृष्ठम् संस्कृत-कला
१, मङ्गलार्थनिरूपणम्	१	८३
२. पदार्थविभागनिरूपणम्	२	८४
३. सप्तग्रहणप्रयोजननिरूपणम्	२	८४–८५
४. शक्तेरतिरिक्तपदार्थत्वखण्डनम्	२	८५
५. तमसो दशमद्रव्यत्वखण्डनम्	३–४	८५–८६
६. पृथिवीलक्षणं प्रसङ्गात् लक्ष्यतादिनिरूपणञ्च	५	८६–८८
७. वायुलक्षणं प्रसङ्गादव्याप्त्यादिस्वरूपनिरूपणञ्च	७–८	८८–८९
८. अव्याप्त्यादीनां निष्कृष्टलक्षणानि	८–९	८९–९०
९. आकाशलक्षणनिरूपणम्	९	९०
१०. विभुत्व-मूर्तत्व-भूतत्वनिरूपणम्	९	९१
११. काललक्षणनिरूपणम्	१०	९१
१२. आत्मलक्षणनिरूपणम्	११	९१
१३. प्रसङ्गात् सम्बन्धानां निरूपणम्		९१–९२
१४. मनोलक्षणनिरूपणम्	११	९२
१५. रूपलक्षणनिरूपणम्	१२–१४	९२–९४
१६. रसलक्षणनिरूपणम्	१४–१५	९४
१७. गन्धलक्षणनिरूपणम्	,,	,,
१८. स्पर्शलक्षणनिरूपणम्	१५	९४
१९. रूपादिचतुष्टयस्य पाकजत्वादिनिरूपणम्	१५–१६	९४–९५
२०. विभागलक्षणनिरूपणम्	१७	९६
२१, गुरुत्वलक्षणनिरूपणम्	१८	९६
२२. स्नेहलक्षणनिरूपणम्	१९	९६–९७
२३. शब्दलक्षणनिरूपणम्	१९–२०	९७
२४. बुद्धिस्मृत्योर्लक्षणनिरूपणम्	२०–२१	९७–९८
२५. अनुभवलक्षणनिरूपणम्	२१	९८
२६. यथार्थानुभवलक्षणनिरूपणम्	२२–२३	९८–१०१
२७. अयथार्थानुभवलक्षणनिरूपणम्	२३	१०१–१०२

In Public domain. Digitization Muthulakshmi Research Academy

विषयः	पृष्ठम् हिन्दी-कला	पृष्ठम् संस्कृत-कला
२८. यथार्थानुभवानां तत्करणानां च चातुर्विध्यम्	२४–२५	१०२–१०३
२९. करणलक्षणनिरूपणम्	२५	१०३–१०४
३०. कारणलक्षणनिरूपणम्	२६	१०४
३१. कार्यलक्षणनिरूपणम्	२६	१०४
३२. समवायिकारणलक्षणनिरूपणम्	२७	१०४–१०६
३३. असमवायिकारणलक्षणनिरूपणम्	२८–३०	१०६–१०८
३४. निमित्तकारणलक्षणम्	३१	१०८
३५. करणलक्षणे व्यापारवत्त्वविशेषणप्रयोजनम्	३१	१०८
३६ प्रत्यक्षप्रमाणलक्षणनिरूपणम्	३२	१०८–१०९
३७. प्रत्यक्षप्रमालक्षणनिरूपणम्	३३	१०९
३८. सविकल्पकनिर्विकल्पकलक्षणनिरूपणम्	३३–३४	१०९–११०
३९. षड्विधसन्निकर्षनिरूपणम्	३५–३८	११०–११२
अनुमानपरिच्छेदः		
४०. अनुमानलक्षणनिरूपणम्	३९	११३
४१. अनुमितिलक्षणनिरूपणम्	३९	११३
४२. परामर्शलक्षणनिरूपणम्	४०–४१	११३–११४
४३. अनुमितिपरामर्शयोः कार्यकारणभावनिरूपणम्	४१–४२	११५–११६
४४. व्याप्तिस्वरूपनिरूपणम्	४२–४४	११६
४५ स्वार्थानुमानपरार्थानुमानस्वरूपनिरूपणम्	४४–४५	११८
४६. न्यायस्वरूपनिरूपणम्	४५	११८
४७. पञ्चावयवनिरूपणम्	४६	११८
४८. त्रिविधलिङ्गस्वरूपनिरूपणम्	४६–५०	११८–१·१
४९. पक्षलक्षणनिरूपणम्	५१	१२१
५०. सपक्षविपक्षस्वरूपनिरूपणम्	५२	१२१
५१. हेत्वाभाससामान्यनिरूपणम्	५२–५३	१२२
५२. सव्यभिचारसामान्यनिरूपणम्	५३	१२३
५३. साधारणासाधारणयोः स्वरूपनिरूपणम्	५३–५४	१२३
५४. अनुपसंहारिलक्षणनिरूपणम्	५४–५५	१२३
५५. विरुद्धस्वरूपनिरूपणम्	५६	१२४
५६. सत्प्रतिपक्षस्वरूपनिरूपणम्	५६–५७	१२४
५७. त्रिविधासिद्धनिरूपणम्	५७–५८	१२४

In Public domain. Digitization Muthulakshmi Research Academy

विषयः	पृष्ठम् हिन्दी-कला	पृष्ठम् संस्कृत-कला
५८. उपाधिस्वरूपनिरूपणम्	५८–५९	१२४–१२५
५९. बाधितस्वरूपनिरूपणम्	६०	१२५
उपमानपरिच्छेदः		
६०. उपमानोपमित्योः स्वरूपनिरूपणम्	६१	१२६
शब्दपरिच्छेदः		
६१. शब्दप्रमाणनिरूपणम्	६२	१२७
६२. शक्तिस्वरूपनिरूपणम्	६३	१२७
६३. लक्षणास्वरूपनिरूपणम्	६३–६४	१२८
६४. आकाङ्क्षादिस्वरूपनिरूपणम्	६४–६५	१२८
६५. योग्यतासन्निध्योः निरूपणम्	६५–६६	
६६. प्रमाणवाक्यानां भेदनिरूपणम्	६६	
अवशिष्टपरिच्छेदः		
६७. संशयविपर्ययतर्काणां स्वरूपनिरूपणम्	६७–६८	१३०
६८. स्मृतिभेदनिरूपणम्	६८	
६९. सुखदुःखयोः स्वरूपनिरूपणम्	६८–६९	१३०–१३१
७०. आत्मविशेषगुणानां निरूपणम्	७०	
७१. संस्कारभेदानां स्वरूपनिरूपणम्	७०–७४	१३१–१३३
७२. सामान्यलक्षणनिरूपणम्	७५	१३३
७३. विशेषलक्षणनिरूपणम्	७६–७७	१३३–१३४
७४. समवायनिरूपणम्	७७	१३४–१३५
७५. अभावभेदनिरूपणम्	७८–७९	१३५
७६. सर्वपदार्थानां सप्तस्वन्तर्भावनिरूपणम्	७९–८०	१३५–१३७
पदकृत्ये		
प्रत्यक्षपरिच्छेदः		
७७. बालशब्दार्थनिरूपणम्		१३९
७८. उद्देशलक्षणपरीक्षाणां स्वरूपनिरूपणम्		१४०
७९. द्रव्यसामान्यलक्षणम्		१४०–१४१
८०. अव्याप्त्यादिस्वरूपनिरूपणम्		१४१–१४२
८१. नित्यलक्षणनिरूपणम्		१४२
८२. शरीरलक्षणनिरूपणम्		१४२
८३. विषयलक्षणम्		१४३

In Public domain. Digitization Muthulakshmi Research Academy

विषयः	पृष्ठम्
८४. अपां लक्षणनिरूपणम्	१४३
८५. तेजोलक्षणनिरूपणम्	१४३–१४४
८६. वायुलक्षणनिरूपणम्	१४४
८७. आकाशलक्षणनिरूपणम्	१४४–१४५
८८. काललक्षणनिरूपणम्	१४५
८९. दिग्लक्षणनिरूपणम्	१४५
९०. आत्मलक्षणनिरूपणम्	१४५–१४६
९१. मनोलक्षणनिरूपणम्	१४६
९२. रूपलक्षणनिरूपणम्	१४६
९३. रसलक्षणनिरूपणम्	१४७
९४. गन्धलक्षणनिरूपणम्	१४७
९५. स्पर्शलक्षणनिरूपणम्	१४८
९६. संख्यालक्षणनिरूपणम्	१४८
९७. परिमाणस्वरूपतद्भेदनिरूपणम्	१४८–१४९
९८. पृथक्त्वस्वरूपनिरूपणम्	१४९
९९. संयोगलक्षणनिरूपणम्	१४९
१००. विभागलक्षणनिरूपणम्	१४९
१०१. परत्वापरत्वस्वरूपतद्भेदनिरूपणम्	१५०
१०२. गुरुत्वलक्षणनिरूपणम्	१५०
१०३. द्रवत्वलक्षणनिरूपणम्	१५०
१०४. स्नेहलक्षणनिरूपणम्	१५०
१०५. शब्दलक्षणनिरूपणम्	१५१
१०६. बुद्धिलक्षणनिरूपणम्	१५१
१०७. स्मृतिलक्षणनिरूपणम्	१५१–१५२
१०८. अनुभवस्य यथार्थानुभवस्य च स्वरूपनिरूपणम्	१५२
१०९. अयथार्थानुभवलक्षणनिरूपणम्	१५३
११०. यथार्थानुभवे विभिन्नमतानि	१५३
१११. करणलक्षणनिरूपणम्	१५४
११२. कार्यलक्षणनिरूपणम्	१५४
११३. कारणभेदनिरूपणम्	१५५
११४. समवायिकारणलक्षणनिरूपणम्	१५५
११५. असमवायिकारणलक्षणनिरूपणम्	१५५

In Public domain. Digitization Muthulakshmi Research Academy

विषयः	पृष्ठम्
११६. निमित्तकारणलक्षणनिरूपणम्	१५६
११७. प्रत्यक्षप्रमाणलक्षणनिरूपणम्	१५६
११८. प्रत्यक्षप्रमालक्षणनिरूपणम्	१५६–१५७
११९. निर्विकल्पकप्रत्यक्षलक्षणनिरूपणम्	१५७
१२०. सविकल्पकप्रत्यक्षलक्षणनिरूपणम्	१५७
१२१. प्रत्यक्षज्ञानहेतुसन्निकर्षभेदानां निरूपणम्	१५७–१५९

अनुमानपरिच्छेदः

१२२. अनुमानलक्षणनिरूपणम्	१६०
१२३. अनुमितिलक्षणनिरूपणम्	१६०
१२४. परामर्शस्वरूपनिरूपणम्	१६०
१२५. व्याप्तिस्वरूपनिरूपणम्	१६०
१२६. पक्षधर्मतास्वरूपनिरूपणम्	१६१
१२७. स्वार्थानुमानस्वरूपनिरूपणम्	१६२
१२८. परार्थानुमानस्वरूपनिरूपणम्	१६२
१२९. पञ्चावयवनिरूपणम्	१६३
१३०. त्रिविधलिङ्गनिरूपणम्	१६३–१६५
१३१. पक्षलक्षणनिरूपणम्	१६५
१३२. सपक्षलक्षणनिरूपणम्	१६६
१३३. विपक्षलक्षणनिरूपणम्	१६६
१३४. हेत्वाभासभेदनिरूपणम्	१६६
१३५. सव्यभिचारलक्षणस्य सभेदनिरूपणम्	१६६
१३६ साधारणलक्षणनिरूपणम्	१६७
१३७. असाधारणलक्षणनिरूपणम्	१६७
१३८. अनुपसंहारिलक्षणनिरूपणम्	१६७
१३९. विरुद्धलक्षणनिरूपणम्	१६७
१४०. सत्प्रतिपक्षलक्षणनिरूपणम्	१६८
१४१. असिद्धभेदनिरूपणम्	१६८
१४२. आश्रयासिद्धलक्षणनिरूपणम्	१६८
१४३. स्वरूपासिद्धलक्षणनिरूपणम्	१६८
१४४. व्याप्यत्वासिद्धलक्षणनिरूपणम्	१६९
१४५. उपाधिलक्षणनिरूपणम्	१६९

In Public domain. Digitization Muthulakshmi Research Academy

विषयः	पृष्ठम्
१४६. उपाधिभेदनिरूपणम्	१७०
१४७. बाधितलक्षणनिरूपणम्	१७१
उपमानपरिच्छेदः	
१४८. उपमानस्वरूपनिरूपणम्	१७२
१४९. उपमितिस्वरूपनिरूपणम्	१७२
शब्दपरिच्छेदः	
१५०. शब्दप्रमाणस्वरूपनिरूपणम्	१७३
१५१. शक्तिलक्षणनिरूपणम्	१७३
१५२. लक्षणास्वरूपतद्भेदनिरूपणम्	१७३
१५३. आकाङ्क्षास्वरूपनिरूपणम्	१७४
१५४. योग्यतास्वरूपनिरूपणम्	१७४
१५५. सन्निधिस्वरूपनिरूपणम्	१७४
१५६. शाब्दबोधस्वरूपनिरूपणम्	१७५
अवशिष्टपरिच्छेदः	
१५७. अयथार्थानुभवभेदानां संशयविपर्ययतर्काणां प्रत्येकं स्वरूपनिरूपणम्	१७६
१५८. स्मृतिभेदनिरूपणम्	१७७
१५९. सुखदुःखेच्छानां स्वरूपनिरूपणम्	१७७
१६०. द्वेषप्रयत्नधर्माधर्माणां स्वरूपनिरूपणम्	१७७–१७८
१६१. आत्ममात्रवृत्तिविशेषगुणानां निरूपणम्	१७८
१६२. संस्कारसामान्यलक्षणनिरूपणम्	१७८–१७९
१६३. वेगलक्षणनिरूपणम्	१७९
१६४. भावनालक्षणनिरूपणम्	१७९
१६५. स्थितिस्थापकलक्षणनिरूपणम्	१७९
१६६. गुणसामान्यलक्षणनिरूपणम्	१७९
१६७. कर्मसामान्यविशेषाणां स्वरूपनिरूपणम्	१८०
१६८. समवायलक्षणनिरूपणम्	१८१
१६९. अयुतसिद्धस्वरूपनिरूपणम्	१८१
१७०. प्रागभावध्वंसात्यन्ताभावानां स्वरूपनिरूपणम्	१८१
१७१. अन्योन्याभावस्वरूपनिरूपणम्	१८२
१७२. मोक्षस्वरूपनिरूपणम्	१८२–१८४

In Public domain. Digitization Muthulakshmi Research Academy

तर्कसंग्रहः

In Public domain. Digitization Muthulakshmi Research Academy

स्मृतिमात्रेण शेषेषु
पादपद्मेषु पूज्ययोः ।
पित्रोः समर्पितेयं स्यात्
कृतिर्मे प्रीतये तयोः ॥

In Public domain. Digitization Muthulakshmi Research Academy

ॐ

तर्कसंग्रहः

सानुवादः

न्यायबोधिनी-कलाद्वयसंवलितः

(हिन्दीव्याख्यासहितपदकृत्योपेतश्च)

प्रत्यक्षपरिच्छेदः

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ।।

हृदय में विश्व के स्वामी परमात्मा को रख कर तथा गुरु की वन्दना कर बालकों को सुखपूर्वक न्याय-पदार्थों का बोध कराने के लिए तर्कसंग्रहनामक ग्रन्थ की रचना की जा रही है ।

न्यायबोधिनी

अखिलागमसञ्चारि श्रीकृष्णाख्यं परं महः ।
ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम् ।।

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति – निधायेति ।

हिन्दी-कला

यस्मिन् ध्याते भवेत् सिद्धिर्गणनाथे गजानने ।
सो ऽनुगृह्णातु नस्तूर्णं बुद्धिराशिर्गुणालयः ।।

समस्त आगमों के प्रतिपाद्यतत्त्व श्रीकृष्णनामक सर्वोत्कृष्ट (लोकोत्तर) तेज का ध्यान कर गोवर्धननामक न्यायशास्त्र के विद्वान् न्यायाभिमत पदार्थों का बोधक होने के कारण "न्यायबोधिनी" इस यथार्थनामवाली विस्तृत व्याख्या को निर्मित करते हैं ।

प्रस्तुत व्याख्येय ग्रन्थ तर्कसंग्रह की व्याख्या के प्रारम्भ में मूल ग्रन्थ के कर्ता श्रीअन्नंभट्टद्वारा किये गये इष्टदेवतानमस्कारात्मक मङ्गल का प्रयोजन दर्शाते हुए गोवर्धन सुधी कहते हैं कि चिकीर्षित (निर्माण के लिए अभीष्ट)

In Public domain. Digitization Muthulakshmi Research Academy

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः ।

द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय और अभाव ये सात पदार्थ हैं ।

न्यायबोधिनी

अथ पदार्थान् विभजते—द्रव्येति । तत्र सप्तग्रहणं पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्याप्तिलाभाय ।

ननु शक्तिपदार्थस्याष्टमस्य सत्त्वात् कथं सप्तैवेति । तथाहि वह्निसंयुक्तेन्धनादौ सत्यपि मणिसंयोगे दाहो न जायते, तच्छून्येन तु जायते । अतो मणिसमवधाने शक्तिर्नश्यति मण्यभावदशायां दाहानुकूला शक्तिरुत्पद्यत इति कल्प्यते । तस्मात् शक्तिरतिरिक्तः पदार्थ इति चेत्, न, मणेः प्रतिबन्धकत्वेन मण्यभावस्य कारणत्वेनैव निर्वाहे मणिसमवधानासमवधानाभ्यामनन्तशक्ति-तद्ध्वंस-तत्प्रागभावकल्पनाया अन्याय्यत्वात् । तस्मात् सप्तैवेति सिद्धम् ।

हिन्दी-कला

ग्रन्थ (तर्कसंग्रह) की निर्विघ्न परिसमाप्ति के लिए ग्रन्थकार श्रीअन्नंभट्ट मन में किये गये मङ्गल को शिष्यों की शिक्षा के लिये, अर्थात् शिष्यगण भी कार्यारम्भ में मंगल किया करें इस अभिप्राय से, ग्रन्थ के आदि में "निधाय हृदि विश्वेशम्" इस श्लोक के रूप में उल्लिखित करते हैं ।

अब पदार्थों का विभाग करते हैं—द्रव्य गुण कर्म इत्यादि । अर्थात् द्रव्य गुण-कर्म आदि पदार्थ सात होते हैं । यहाँ पदार्थों का विभाग-बोध तो द्रव्य-गुण आदि के पृथक्-पृथक् नामोल्लेख से ही हो जायगा, अतः 'सप्त' इस संख्यावाचक पद का उल्लेख व्यर्थ है— ऐसी शङ्का नहीं की जा सकती है । क्योंकि "पदार्थत्वधर्म द्रव्यादिसप्तान्यतमत्व का व्याप्य है" इस व्याप्ति का बोध कराने के लिये मूलकार ने सप्त-ग्रहण किया है । अर्थात् "जहाँ-जहाँ पदार्थत्व है, वहाँ-वहाँ द्रव्यादिसप्तान्यतमत्व है" इस व्याप्ति का लाभ होने से सभी पदार्थ द्रव्यादि सात के अन्तर्गत ही समाविष्ट हैं, इनसे अतिरिक्त कोई पदार्थ नहीं है, यह सूचित करने के लिये मूल में 'सप्त' पद का उल्लेख किया गया है ।

शङ्का—मीमांसक आदि को अभिमत शक्ति भी एक अष्टम पदार्थ है, अतः 'सप्तैव पदार्थाः यह कथन कैसे संगत है ? क्योंकि काष्ठादिरूप इन्धन में अग्नि का संयोग रहने पर भी यदि उसमें चन्द्रकान्तमणि का संयोग हो जाय, तो दाह नहीं होता है । किन्तु मणिसंयोग का अभाव रहने पर उस अग्नि से दाह हो जाता है । इसलिये यह कल्पना की जाती है कि मणिसन्निधान की दशा में अग्नि की दाहकता-

In Public domain. Digitization Muthulakshmi Research Academy

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव। रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः।

पदार्थों के अन्तर्गत द्रव्य नव ही होते हैं, पृथिवी-अप् (जल)-तेज-वायु-आकाश-काल-दिक् (दिशा) आत्मा और मन।

रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग—परत्व-अपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दु:ख-इच्छा-द्वेष-प्रयत्न-धर्म-अधर्म और संस्कार ये चौवीस गुण हैं।

न्यायबोधिनी

द्रव्याणि विभजते—पृथिवीति। नन्वन्धकारस्य दशमद्रव्यस्य सत्त्वात् कथं नवैवेति? तथाहि नीलं तमश्चलतीति प्रतीतेर्नीलरूपाश्रयत्वेन क्रियाश्रयत्वेन च द्रव्यत्वं सिद्धम्। न च क्लृप्तद्रव्येष्वन्तर्भावात् कुतो दशमद्रव्यत्वमिति वाच्यम्। तमसो रूपवत्त्वात् आकाशादिपञ्चकस्य वायोश्च नीरूपत्वान्न तेष्वन्तर्भावः। तमसो निर्गन्धत्वान्न पृथिव्यामन्तर्भावः। जलतेजसोः शीतोष्णस्पर्शवत्त्वान्न तयोरन्तर्भावः। तस्मात्तमसो दशमद्रव्यत्वं सिद्धमिति चेत्, न, तेजोऽभावरूपत्वेनैवोपपत्तावतिरिक्ततत्कल्पनायां मानाभावात्।

हिन्दी-कला

शक्ति नष्ट हो जाती है और मणि के हट जाने पर उसमें पुन: दाहानुकूल शक्ति उत्पन्न हो जाती है। इससे सिद्ध होता है कि शक्तिनामक अतिरिक्त आठवां पदार्थ भी है।

समाधान—दाह के प्रति मणि के प्रतिबन्धक होने से प्रतिबन्धकाभाव के रूप में मण्यभाव को भी सहकारी कारण मानने से ही काम चल जायगा। ऐसी स्थिति में बार-बार मणि के समवधान और असमवधान के कारण अनन्तशक्ति की तथा उसके अनन्त ध्वंस की और अनन्त प्रागभाव की कल्पना अनुचित है। अत: सात ही पदार्थ हैं, यह सिद्ध है।

शङ्का—अन्धकार भी दशम द्रव्य है, तब नव ही द्रव्य है, यह कैसे कहा? क्योंकि "नीलं तमश्चलति" ऐसी प्रतीति होने से नीलरूप एवं चलन क्रिया का आश्रय होने के कारण अन्धकार में भी द्रव्यत्व सिद्ध है। यहाँ ऐसा नहीं कह सकते कि निश्चित पृथिवी आदि नव द्रव्यों में ही तम का भी अन्तर्भाव होने से वह दशम द्रव्य कैसे होगा? क्योंकि अन्धकार के रूपयुक्त होने से तथा आकाशादि पांच तथा वायु के रूपरहित होने से इनमें अन्धकार का समावेश नहीं हो सकता है। एवं जल और तेज के क्रमश: शीत और उष्ण स्पर्शवाला होने के कारण स्पर्शहीन

In Public domain. Digitization Muthulakshmi Research Academy

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ।

परमपरञ्चेति द्विविधं सामान्यम् । नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव । समवायस्त्वेक एव ।

अभावश्चतुर्विधः प्रागभावः, प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति । इत्युद्देशग्रन्थः ।

उत्क्षेपण-अपक्षेपण-आकुञ्चन-प्रसारण और गमन ये पाँच कर्म हैं ।

पर और अपर दो प्रकार के सामान्य (जाति) होते हैं । नित्य द्रव्य में ही रहने वाले विशेष हैं और वे अनन्त हैं । समवाय एक ही है ।

अभाव चार प्रकारका होता है, प्रागभाव-प्रध्वंसाभाव-अत्यन्ताभाव और अन्योन्याभाव ।

यहाँ तक उद्देशग्रन्थ है । अर्थात् यहाँ तक पदार्थों के नाममात्र का कथन किया गया । इनका लक्षण और विशेष विचार आगे होगा ।

न्यायबोधिनी

न च विनिगमनाविरहात् तेज एव तमोऽभावस्वरूपमस्त्विति वाच्यम्, तेजसोऽभावस्वरूपत्वे सर्वानुभूतोष्णस्पर्शाश्रयद्रव्यान्तरकल्पने गौरवात् । तस्मादुष्णस्पर्शगुणाश्रयतया तेजसो द्रव्यत्वं सिद्धम् । तमसि नीलत्वादिप्रतीतिस्तु भ्रान्तिरेव, दीपापसरणक्रियाया एव तत्र भानात् ।

हिन्दी-कला

तम का इन दोनों में भी अन्तर्भाव नहीं हो सकता है । अतः दशम द्रव्य के रूप में तम सिद्ध हो जाता है ।

समाधान——तम को तेज का अभावरूप मान लेने से ही काम चल जायगा, अतः अतिरिक्त द्रव्य के रूप में उसकी कल्पना करने में कोई प्रमाण नहीं है । यह नहीं कह सकते कि एकतरपक्षपातिनी युक्ति के अभाव में तेज ही तम का अभाव रूप है और तम द्रव्य है । क्योंकि तेज यदि स्वतन्त्र द्रव्य न होकर तम का अभाव रूप हो तो सभी को अनुभूयमान उष्णस्पर्श का आश्रय कौन होगा ? अर्थात् तब उष्णस्पर्श के आश्रय के रूप में तेज से अतिरिक्त किसी दूसरे द्रव्य की कल्पना करनी पड़ जायगी और वैसा करने में गौरवदोष होगा ।

इसलिये प्रतीयमान उष्णस्पर्श-गुण के आश्रय के रूप में तेज को तो द्रव्य मानना ही होगा और तम उसका अभावरूप होगा । तम में नीलता की प्रतीति भ्रम है तथा क्रिया की प्रतीति भी दीपक के चलने के कारण भ्रान्ति ही है ।

In Public domain. Digitization Muthulakshmi Research Academy

तत्र गन्धवती पृथिवी । सा द्विविधा । नित्या अनित्या च । नित्या परमाणुरूपा । अनित्या कार्यरूपा । पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणम् नासाग्रवर्ति । विषयो मृत्पाषाणादिः ।

नौ द्रव्यों के अन्तर्गत पृथिवी गन्धवती है । अर्थात् जिसमें गन्ध हो, वह पृथिवी है । वह दो प्रकार की होती है—नित्य पृथिवी और अनित्य पृथिवी । नित्य पृथिवी परमाणुरूप है । अनित्य पृथिवी कार्यरूप है । शरीर-इन्द्रिय और विषय के भेद से कार्यरूप अनित्य पृथिवी फिर तीन प्रकार की होती है । हम लोगों का शरीर अनित्य पृथिवी का एक भेद है । गन्ध को ग्रहण करने वाला तथा नासिका के अग्रभाग में रहने वाला घ्राण इन्द्रियरूप पृथिवी है । मिट्टी पाषाण (पत्थर) आदि विषय रूप पृथिवी है ।

न्यायबोधिनी

गन्धवतीति । गन्धवत्त्वं पृथिव्या लक्षणम् । लक्ष्या पृथिवी । पृथिवीत्वं लक्ष्यतावच्छेदकम् । यद्धर्मावच्छिन्नं लक्ष्यं स धर्मो लक्ष्यतावच्छेदकः । यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्नः । तथा च लक्ष्यतावच्छेदकं पृथिवीत्वं चेत्—लक्ष्यता पृथिवीत्वावच्छिन्ना । गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं पृथिव्या लक्षणम् ।

हिन्दी-कला

गन्धवत्त्व पृथिवी का लक्षण है, पृथिवी लक्ष्य है और पृथिवीत्वधर्म पृथिवी में रहने वाली लक्ष्यता का अवच्छेदक हैं । क्योंकि जिस धर्म से अवच्छिन्न (युक्त) लक्ष्य होता है, वह धर्म लक्ष्यता का अवच्छेदक होता है । तथा जो धर्म जिसका अवच्छेदक होता है, उस धर्म से वह अवच्छिन्न कहाता है । जैसे, पृथिवीवृत्ति लक्ष्यता का अवच्छेदक पृथिवीत्व है, अतः पृथिवीगत लक्ष्यता पृथिवीत्व धर्म से अवच्छिन्न हुई । यहाँ का विशेष विचार संस्कृत-कला व्याख्या में द्रष्टव्य है ।

मूलोक्त गन्धवत्त्वलक्षण अव्याप्तिदोष से ग्रस्त है । क्योंकि उत्पत्तिकालीन घट में गन्ध नहीं होता है । "उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठति" यह नैयायिकों की मान्यता है । इसलिये न्यायबोधिनीकार पृथिवी के उक्त लक्षण का परिष्कृत रूप स्पष्ट करते हैं—

"गन्धसमानाधिकरण-द्रव्यत्व-व्याप्यजातिमत्त्वं पृथिवीत्वम्" यह पृथिवी का निष्कृष्ट लक्षण है । अर्थात् गन्ध के समान अधिकरण में रहनेवाली (जहाँ गन्ध रहता है, वहाँ रहनेवाली) द्रव्यत्व की व्याप्या (न्यूनदेशवृत्ति) पृथिवीत्वजाति जिसमें रहे, वह पृथिवी है । द्रव्यों के अन्तर्गत गन्ध के साथ रहने वाली जाति जिसमें हो, वह पृथिवी है, यह सारांश है ।

In Public domain. Digitization Muthulakshmi Research Academy

शीतस्पर्शवत्य आपः । ता द्विविधाः । नित्याः अनित्याश्च । नित्याः परमाणुरूपाः अनित्याः कार्य्यरूपाः । पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः सरित्समुद्रादिः ।

उष्णस्पर्शवत्तेजः । तच्च द्विविधम् । नित्यमनित्यञ्च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके प्रसिद्धम् । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति । विषयश्चतुर्विधो भौमदिव्योदर्याकरजभेदात् । भौमं वह्न्यादिकम् । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरुदर्यम् । आकरजं सुवर्णादि ।

शीतल स्पर्श जिसका है, वह जल है । वह दो प्रकार का होता है – नित्य जल और अनित्य जल । नित्य जल परमाणुरूप है । अनित्य जल कार्यरूप है । शरीर-इन्द्रिय और विषय के भेद से कार्यरूप अनित्य जल फिर तीन प्रकार का होता । जल का शरीर वरुणलोक में होता है । रस को ग्रहण करने वाली तथा जिह्वा के अग्रभाग में रहने वाली रसना नामक इन्द्रिय जल की है । नदी समुद्र आदि विषयरूप जल है ।

जिसका उष्ण स्पर्श है, ऐसा द्रव्य तेज है । वह भी दो प्रकार का होता है— नित्य तेज और अनित्य तेज । नित्य तेज परमाणु रूप है । अनित्य तेज कार्यरूप होता है । कार्यरूप अनित्य तेज फिर तीन प्रकार का होता है—शरीर-इन्द्रिय और विषय के भेद से । शरीररूप अनित्य तेज अर्थात् तैजस शरीर आदित्य लोक में प्रसिद्ध (शास्त्र प्रसिद्ध) है । इन्द्रिय रूप तेज चक्षु है, जो रूप का ग्रहण करता है और चक्षुर्गोलक के अन्तर्गत कृष्णतारा के अग्रभाग में स्थित रहता है । विषय रूप तेज चार प्रकार का होता है—भौम-दिव्य-उदर्य और आकरज के भेद से । अग्नि आदि भौम तेज है जल ही जिसका इन्धन है, ऐसा विद्युत् आदि दिव्य तेज है । खाये हुए पदार्थ के परिपाक का हेतु तेज उदर्य तेज है । तथा सुवर्ण आदि आकरज (खान से पैदा हुआ, खनिज) तेज है ।

न्यायबोधिनी

एवं शीतस्पर्शवत्त्वादिलक्षणेषु जलादीनां लक्ष्यता जलत्वादीनां लक्ष्यतावच्छेदकत्वं च बोध्यम् ।

हिन्दी-कला

इसी प्रकार "शीतस्पर्शवत्य आपः" आदि अग्रिम लक्षणों में जल और तेज में लक्ष्यता है तथा जलत्व और तेजसत्व धर्म में लक्ष्यतावच्छेदकत्व है, ऐसा ऐसा समझना चाहिये ।

In Public domain. Digitization Muthulakshmi Research Academy

रूपरहितस्पर्शवान् वायुः। स द्विविधः। नित्योऽनित्यश्च। नित्यः परमाणुरूपः। अनित्यः कार्यरूपः। पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते।

रूप से रहित हो और स्पर्श वाला हो, ऐसा द्रव्य वायु है। वह दो प्रकार का होता है – नित्य और अनित्य। नित्य वायु परमाणु रूप है और अनित्य वायु कार्यरूप है। कार्यरूप अनित्य वायु का फिर तीन भेद है—शरीर-इन्द्रिय और विषय। शरीरात्मक वायु वायु लोक में होता है। वायवीय इन्द्रिय त्वचा है, जो स्पर्श का ग्राहक है और समस्त शरीर में व्याप्त है। विषय के रूप में वायु वह है, जो वृक्षादि के कम्पन का हेतु बनता है। वह शरीर के अन्दर सञ्चरण करने वाली विषयभूत वायु प्राण है। वह प्राणवायु एक होता हुआ भी हृदय आदि उपाधि के भेद से पाँच प्रकार का होता है और प्राण-अपान-समान-व्यान और उदान संज्ञा को प्राप्त कर जाता है।

न्यायबोधिनी

एवं पृथिव्यादित्रिकं निरूप्य वायुं निरूपयति—रूपरहितेति। रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणम्। सति सप्तम्या विशिष्टार्थकतया सामानाधिकरण्यसम्बन्धेन रूपत्वावच्छिन्नप्रतियोगिताकाभावविशिष्टस्पर्शवत्त्व वायोर्लक्षणम्। विशेषणांशानुपादाने स्पर्शवत्त्वमात्रस्य लक्षणत्वे पृथिव्यादित्रिकेऽतिव्याप्तिः, तद्वारणाय विशेषणोपादानम्। तावन्मात्रोपादाने आकाशादावतिव्याप्तिः, तद्वारणाय विशेष्योपादानम्।

हिन्दी-कला

इस प्रकार पृथिवी आदि तीन का स्वरूप बताने के बाद मूलकार वायु का स्वरूप बताते हैं—"रूपरहितस्पर्शवान् वायुः" इत्यादि द्वारा। अर्थात् "रूपरहितत्वे सति स्पर्शवत्त्वम्" यह वायु का लक्षण हुआ। यहाँ रूपरहितत्व का अर्थ है—रूपाभाव, अर्थात् रूपत्वावच्छिन्न-प्रतियोगिताकअभाव। 'सति' इस सप्तम्यन्त पद का अर्थ है—विशिष्ट, जिसका स्पर्श पदार्थ के साथ अन्वय होगा। यहाँ रूपाभाव-विशिष्ट स्पर्श का अभिप्राय है—सामानाधिकरण्यसम्बन्ध से रूपाभाव-विशिष्ट स्पर्श। अर्थात् समान अधिकरण में रूपाभाव और स्पर्श का रहना अभिप्रेत है। वायु अधिकरण में रूपाभाव के साथ स्पर्श रहता है, इसलिये रूपाभाव-विशिष्ट स्पर्शवत्त्व अर्थात् 'रूपत्वावच्छिन्नप्रतियोगिताकाभाव-विशिष्ट स्पर्शवत्त्व' यह वायु का परिष्कृत लक्षण निष्पन्न हुआ। विशेष संस्कृत-कला व्याख्या में देखिये।

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

अतिव्याप्तिर्नाम-अलक्ष्ये लक्षणसत्त्वम्। यथा गोः शृङ्गित्वं लक्षणं कृतञ्चेत्-लक्ष्यभूतगोभिन्नमहिष्यादावतिव्याप्तिः, तत्रापि शृङ्गित्वस्य विद्यमानत्वात्। अव्याप्तिर्नाम-लक्ष्यैकदेशावृत्तित्वम्। लक्ष्यैकदेशे=लक्ष्य-तावच्छेदकाश्रयीभूते क्वचिल्लक्ष्ये लक्षणासत्त्वमव्याप्तिरित्यर्थः। यथा गोर्नीलरूपवत्त्वं लक्षणं कृतंचेल्लक्ष्यतावच्छेदकाश्रयीभूतश्वेतगवि अव्याप्तिः, तत्र नीलरूपाभावात्। असंभवो नाम लक्ष्यमात्रे कुत्रापि लक्षणासत्त्वम्। यथा गोरेकशफवत्त्वम्। गोसामान्यस्य द्विशफवत्त्वेन एकशफवत्त्वस्य कुत्राप्यसत्त्वात्। अतिव्याप्त्यव्याप्त्यसंभवानां निष्कृष्टलक्षणानि—लक्ष्यतावच्छेदकसमानाधिकरणत्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगि-ताकभेदसामानाधिकरण्यमतिव्याप्तिः।

अव्याप्तिस्तु लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वम्। असंभवस्तु लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम्।

हिन्दी-कला

इस लक्षण में 'रूपाभाव' विशेषण न दिया जाय और स्पर्शवत्त्वमात्र वायु का लक्षण किया जाय तो वायुलक्षण की पृथिवी जल और तेज में अतिव्याप्ति हो जायगी, क्योंकि स्पर्शमात्र तो पृथिवी आदि में भी है। इसका वारण करने के लिये 'रूपाभाव' विशेषण दिया एवं रूपाभावमात्र वायु का लक्षण करने पर आकाश आदि में वायुलक्षण की अतिव्याप्ति हो जायगी। अतः इसका वारण करने के लिये स्पर्शवत्त्वरूप विशेष्य का सन्निवेश किया गया।

लक्षण के तीन दोष होते हैं--अतिव्याप्ति, अव्याप्ति और असंभव। अलक्ष्य में लक्षण की सत्ता अतिव्याप्ति है। जैसे, 'शृङ्गित्व' यदि गौ का लक्षण किया जाय तो यह लक्षण गौ से भिन्न महिषी आदि में भी चला जायगा। क्योंकि वहाँ भी शृङ्गित्व विद्यमान है। लक्ष्य के एक भाग में लक्षण का न रहना अव्याप्तिदोष है। अर्थात् लक्ष्यतावच्छेदक जो गोत्व, उसके आश्रयभूत किसी एक गौ में लक्षण का नहीं रहना अव्याप्ति है। जैसे, गौ का लक्षण यदि 'नीलरूपवत्त्व' किया जाय तो लक्ष्यतावच्छेदक-गोत्व का आश्रयीभूत श्वेत-गौ में लक्षण की अव्याप्ति हो जायगी, क्योंकि उसमें नीलरूप का अभाव है।

लक्ष्यमात्र में कहीं भी लक्षण का न रहना असंभव दोष है। जैसे, गौ का लक्षण यदि 'एक शफवत्त्व' किया जाय, तो यह लक्षण असंभवदोष से ग्रस्त होगा। क्योंकि सभी गौओं के दो खुर होने से 'एकशफवत्त्व' किसी भी गौ में नहीं है। नव्यन्याय की शैली में अतिव्याप्ति-अव्याप्ति एवं असंभव के निष्कृष्ट लक्षण यों हैं—लक्ष्यवच्छेक

In Public domain. Digitization Muthulakshmi Research Academy

शब्दगुणकमाकाशम् । तच्चैकं, विभु नित्यञ्च ।

शब्द जिसका गुण है, ऐसा द्रव्य आकाश है। वह एक, विभु और नित्य है।

न्यायबोधिनी

आकाशं लक्षयति—शब्दगुणकमिति । गुणपदमाकाशे शब्द एव विशेषगुण इति द्योतनाय न त्वतिव्याप्तिवारणाय, समवायेन शब्दवत्त्वमात्रस्य सम्यक्त्वात् ।

तच्चैकमिति । अनेकत्वे मानाभावादिति भावः । विभ्वति । सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम् । मूर्तत्वं च क्रियावत्त्वम् । पृथिव्यप्तेजोवायुमनांसि मूर्तानि । पृथिव्यप्तेजोवाय्वाकाशेतिपञ्चकं भूतपदवाच्यम् । भूतत्वं नाम बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् ।

हिन्दी-कला

के अधिकरण में रहते हुए लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताक-भेद के अधिकरण में भी लक्षण का रहना अतिव्याप्ति है। अर्थात् लक्ष्य में रहते हुए लक्ष्य से भिन्न में भी लक्षण का रहना अतिव्याप्ति है।

लक्ष्यतावच्छेदक के अधिकरण में रहनेवाला जो अभाव, उसका प्रतियोगी होना अव्याप्ति है। अर्थात् लक्ष्य में ही कहीं लक्षण का अभाव रहना अव्याप्ति है। और लक्ष्यतावच्छेदक का व्यापकीभूत जो अभाव, उसका प्रतियोगी होना असंभवदोष है। अर्थात् लक्ष्यमात्र में जिस लक्षण का अभाव हो, वह लक्षण असंभवदोष से ग्रस्त है।

'शब्दगुणकत्व' आकाश का लक्षण है। अर्थात् शब्द जिसका गुण है, वह आकाश है। यद्यपि 'शब्द गुण है' यह बात सुप्रसिद्ध ही है, अतः शब्द को गुण शब्द से यहाँ उल्लेख करना अनावश्यक है, तथापि "आकाश में शब्द ही एकमात्र विशेषगुण है" यह सूचित करने के लिये ही गुण पद कहा है, न कि कहीं अतिव्याप्ति का वारण करने के लिये। क्योंकि अतिव्याप्तिवारण के लिये तो 'समवायसम्बन्ध से शब्दाश्रयत्व' मात्र ही लक्षण पर्याप्त होता।

वह आकाश एक है और विभु है, क्योंकि अनेक होने में कोई प्रमाण नहीं है। सभी मूर्त-द्रव्यों के साथ संयुक्त होना विभुत्व है। क्रियायुक्त होना मूर्तत्व है। क्रियायुक्त होने के कारण पृथिवी, जल, तेज, वायु और मन ये पांच मूर्त द्रव्य कहे जाते हैं। अब तक पृथिवी-जल-तेज-वायु और आकाश के लक्षण किये गये। पृथिवी आदि पाँच 'भूत' पद से कहे जाते हैं। जिसका विशेषगुण बहिरिन्द्रिय से (चक्षुरादि से) ग्राह्य हो, वह भूत है। जैसे, पृथिवी का विशेषगुण गन्ध घ्राणरूप-बाह्येन्द्रिय से गृहीत होने के कारण पृथिवी भूत है। इसी प्रकार जल, तेज, वायु और आकाश को भी भूत समझना चाहिये।

In Public domain. Digitization Muthulakshmi Research Academy

अतीतादिव्यवहारहेतुः कालः । स चैको विभुर्नित्यश्च ।

प्राच्यादिव्यवहारहेतुर्दिक् । सा चैका नित्या विभ्वी च ।

ज्ञानाधिकरणमात्मा । स द्विविधः । जीवात्मा परमात्मा चेति । तत्रेश्वरः सर्वज्ञः परमात्मा एक एव । जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च ।

अतीत आदि (भूत, भविष्यत् और वर्तमान) व्यवहार का हेतु काल है । वह भी एक, विभु और नित्य है ।

प्राची आदि (पूर्व, पश्चिम, उत्तर, दक्षिण आदि) व्यवहार का हेतु दिक् है । वह भी एक, विभु और नित्य है ।

ज्ञान का अधिकरण (आश्रय) आत्मा है । वह दो प्रकार का होता है—जीवात्मा और परमात्मा । उनमें परमात्मा ईश्वर (ऐश्वर्य से युक्त) है, सवज्ञ (सव कुछ जानने वाला) है और एक है । किन्तु जीव (जीवात्मा) प्रत्येक शरीर में भिन्न भिन्न है विभु (कारक) है और नित्य है ।

न्यायबोधिनी

कालं लक्षयति—अतीतेति । व्यवहारहेतुत्वस्य लक्षणत्वे घट इति व्यवहारहेतुभूतघटादावतिव्याप्तिः । तद्वारणाय अतीतादीति विशेषणोपादानम् ।

दिशो लक्षणमाह—प्राच्येति । उदयाचलसन्निहिता या दिक् सा प्राची । अस्ताचलसन्निहिता या दिक् सा प्रतीची । मेरोः सन्निहिता या दिक् सोदीची । मेरोर्व्यवहिता या दिक् साऽवाची ।

हिन्दी-कला

अतीत अनागत आदि व्यवहार का हेतु काल है । यहाँ यदि व्यवहारहेतुत्वमात्र काल का लक्षण किया जाय तो 'घटः' इस व्यवहार का हेतु घटविषय में भी काललक्षण की अतिव्याप्ति हो जायगी । अतः इस दोष का वारण करने के लिये "अतीत आदि" यह व्यवहार का विशेषण कहा गया । काल भी एक, विभु और नित्य द्रव्य है ।

प्राची प्रतीची (पूर्व पश्चिम) आदि व्यवहार का हेतु दिक् (दिशा) है । उदयाचल (उदयपर्वत) से सन्निहित दिशा प्राची है । अस्ताचल से सन्निहित दिशा प्रतीची है । सुमेरु से सन्निहित दिशा उदीची है और मेरु से व्यवहित दिशा अवाची (दक्षिण) है ।

In Public domain. Digitization Muthulakshmi Research Academy

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च।

चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात् सप्तविधम्। पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि।

सुख दुःख आदि की उपलब्धि (प्रत्यक्ष) का साधनभूत इन्द्रिय मन है। वह मन प्रत्येक आत्मा के साथ नियत (संबद्ध) होने के कारण अनन्त है परमाणुरूप और नित्य है।

केवल चक्षुरिन्द्रिय से ग्रहण किया जाने वाला गुण रूप है। वह रूप शुक्ल-नील-पीत-रक्त (लाल) हरित-कपिश (भूरा) और चित्र (चितकबरा) के भेद से सात प्रकार का होता है। रूप पृथिवी-जल और तेज में रहता है। पृथिवी में पूर्वोक्त सातों प्रकार का रूप रहता है। जल में नहीं चमकने वाला शुक्ल रूप रहता है और तेज में चमकने वाला शुक्ल रूप रहता है।

न्यायबोधिनी

आत्मानं निरूपयति—ज्ञानाधिकरणमिति। अधिकरणपदं समवायेन ज्ञानाश्रयत्वलाभार्थम्।

मनो निरूपयति-सुखादीति। उपलब्धिर्नाम साक्षात्कारः। तथा च सुख-दुःखादिसाक्षात्कारकारणत्वे सति इन्द्रियत्वम् मनसो लक्षणम्। इन्द्रियत्वमात्रोक्तौ चक्षुरादावतिव्याप्तिरतः सुखादिसाक्षात्कारकारणत्वविशेषणम्। विशेष्यानुपादाने आत्मन्यतिव्याप्तिः, आत्मनः सुखादिकं प्रति समवायिकारणत्वात्। अत इन्द्रियत्वरूपविशेष्योपादानम्।

हिन्दी-कला

'ज्ञानाधिकरणत्व' यह आत्मा का लक्षण है। यहाँ अधिकरणपद देने से समवाय सम्बन्ध से ज्ञानाश्रयत्व का लाभ होता है। अन्यथा ज्ञान का सम्बन्धी तो विषय भी है, किन्तु वह आत्मा नहीं है।

सुखादि के साक्षात्कार का साधन इन्द्रिय मन है। अर्थात् सुख दुःखादि के साक्षात्कार का कारण होते हुए इन्द्रिय होना मनका लक्षण है। यहाँ लक्षण में यदि इन्द्रित्वमात्र कहा जाय तो चक्षुः आदि में भी मन का लक्षण अतिव्याप्त हो जायगा। अतः इस अतिव्याप्ति के निवारणार्थ "सुखादि-साक्षात्कार-कारणत्व" यह विशेषण दिया। यदि इन्द्रियत्वरूप विशेष्य का सन्निवेश न किया जाय तो आत्मा में भी मनलक्षण की अतिव्याप्ति हो जायगी। क्योंकि सुखादि के प्रति आत्मा के समवायिकारण होने से वह भी सुखादि के साक्षात्कार में हेतु होता ही है। इस अतिव्याप्ति दोष के निवा-

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

रूपं लक्षयति—चक्षुरिति। चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वं रूपस्य लक्षणम्। विशेष्यमात्रोपादाने रसादावतिव्याप्तिः, अतश्चक्षुर्मात्रग्राह्यत्व-विशेषणम्। तावन्मात्रोपादाने रूपत्वेऽतिव्याप्ति। यो गुणो यदिन्द्रियग्राह्य-स्तन्निष्ठा जातिस्तदिन्द्रियग्राह्येति नियमात् तद्वारणाय विशेष्योपादानम्।

चक्षुर्मात्रग्राह्यत्वं नाम चक्षुर्भिन्नेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वम्। मात्रपदानुपादाने संख्यादिसामान्यगुणेऽतिव्याप्तिः चक्षुर्ग्राह्यत्वविशिष्टगुण-त्वस्य तत्रापि सत्त्वात्, अतस्तद्वारणाय मात्रपदम्। सङ्ख्यादेश्चक्षुर्भिन्न-त्वगिन्द्रियग्राह्यत्वात् चक्षुर्मात्रग्राह्यत्वं नास्ति। अतीन्द्रियगुरुत्वादावति-व्याप्तिवारणाय चक्षुर्ग्राह्येति। अत्र लक्षणे ग्राह्यत्वं नाम प्रत्यक्षविषय-त्वम्। अग्राह्यत्वं नाम तदविषयत्वम्। तथा च चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षा-विषयत्वे सति चक्षुर्जन्यप्रत्यक्षविषयत्वमिति फलितोऽर्थः।

ननु प्रभाघटसंयोगे रूपलक्षणस्यातिव्याप्तिस्तस्य चक्षुर्मात्रग्राह्यगुणत्वा-दिति चेन्न, गुणपदस्य विशेषगुणपरत्वात्। न चैवं विशेषगुणत्वघटितलक्षणे सङ्ख्यादावतिव्याप्त्यभावान्मात्रपदवैयर्थ्यमिति वाच्यम्, जलमात्रवृत्तिसांसिद्धिकद्रवत्वादावतिव्याप्तिवारणाय तदुपादानात्।

अथवा चक्षुर्मात्रग्राह्यजातिमद्गुणत्वस्य लक्षणत्वान्न प्रभाघटसंयोगादाव-तिव्याप्तिः, संयोगत्वजातेश्चक्षुर्मात्रग्राह्यत्वाभावात्। घटपटसंयोगस्य त्वगि-न्द्रियग्राह्यत्वात् तद्गतजातेरपि त्वगिन्द्रियग्राह्यत्वात्। यो गुणो यदिन्द्रिय-ग्राह्यस्तन्निष्ठजातेरपि तदिन्द्रियग्राह्यत्वात्। अत्र जातिघटितलक्षणे गुणत्वानुपादाने चक्षुर्मात्रग्राह्यजातिमति सुवर्णादावतिव्याप्तिरतस्तद्-वारणाय तदुपादानम्। एवं रसादिलक्षणे विशेषणानुपादाने लक्ष्यभिन्न-गुणादावतिव्याप्तिः। विशेष्यानुपादाने लक्ष्यमात्रवृत्तिरसत्वगन्धत्वादावति-व्याप्तिः, अतो विशेषणविशेष्ययोरुभयोरुपादानम्।

हिन्दी-कला

रण के लिये 'इन्द्रियत्व' रूप विशेष्यपद का उल्लेख किया। आत्मा तो इन्द्रिय नहीं है।

'चक्षुर्मात्रग्राह्यत्व-विशिष्ट गुणत्व' यह रूप का लक्षण है। यहाँ यदि 'गुणत्व' इस विशेष्यमात्र का ग्रहण किया जाय तो रसादि में भी रूपलक्षण की अतिव्याप्ति हो जायगी। क्योंकि रसादि भी गुण है। इस दोष का निवारण करने के लिये 'चक्षु-र्मात्रग्राह्यत्व' विशेषण कहा। यदि यह विशेषणमात्र दिया जाय और 'गुणत्व' विशेष्य न कहा जाय तो रूपत्व में भी रूपलक्षण की अतिव्याप्ति होने लगेगी। क्योंकि "जो गुण जिस इन्द्रिय से ग्राह्य होता है, उसमें रहने वाली जाति भी उसी

In Public domain. Digitization Muthulakshmi Research Academy

हिन्दी-कला

इन्द्रिय से ग्राह्य होती है" इस नियम के अनुसार रूपत्व-जाति भी चक्षुर्मात्रग्राह्य है। अतः रूपत्व में रूपलक्षण की अतिव्याप्ति का वारण करने के लिये 'गुणत्व' यह विशेष्य कहा। रूपत्व तो गुण नहीं है, किन्तु एक जाति है।

यहाँ रूपलक्षण में चक्षुर्मात्रग्राह्यत्व का अर्थ है—चक्षु से भिन्न जो रसना-घ्राण आदि इन्द्रियाँ हैं, उनसे अग्राह्य होते हुए चक्षु से ग्राह्य होना। इतना अर्थ मात्रपद के देने से निकलता है। यदि मात्रपद न दिया जाय तो संख्या आदि सामान्यगुणों में रूपलक्षण की अतिव्याप्त हो जायगी। क्योंकि 'चक्षुर्ग्राह्यगुणत्व' संख्यादि में भी है। अतः इस दोष के निवारणार्थ मात्रपद दिया। क्योंकि संख्यादि सामान्यगुण चक्षु से भिन्न त्वगिन्द्रिय से भी ग्राह्य होने से चक्षुर्मात्र ग्राह्य नहीं है। अतीन्द्रिय गुरुत्वादि-गुण में लक्षण की अतिव्याप्ति न हो, इसके लिए चक्षुर्ग्राह्यत्व पद दिया। गुरुत्वगुण तो चक्षुर्ग्राह्य नहीं है।

इस लक्षण में ग्राह्यत्व का अर्थ है 'प्रत्यक्ष का विषय होना' तथा अग्राह्यत्व का अर्थ है 'प्रत्यक्ष का अविषय होना'। इस प्रकार "चक्षु से भिन्न जो घ्राणादि इन्द्रिय, उससे जन्य प्रत्यक्षका जिसमें अविषयत्व हो तथा चक्षुरिन्द्रियजन्य प्रत्यक्ष का विषयत्व जिस गुण में हो, वह रूप है। यह रूपलक्षण का फलितार्थ है।

शङ्का—उक्त लक्षण की अतिव्याप्ति प्रभा-घट के संयोग में हो जायगी, क्योंकि प्रभाघट का संयोग भी चक्षुर्मात्रग्राह्य गुण है।

समाधान—लक्षण में गुणपद के विशेषगुणपरक होने से यह दोष नहीं होगा। क्योंकि संयोग विशेषगुण नहीं है।

शङ्का—लक्षण में विशेषगुणत्व का निवेश करने पर संख्या आदि सामान्यगुण में स्वतः अतिव्याप्ति न होगी, ऐसी स्थिति में चक्षुर्मात्रग्राह्यत्व न कहकर 'चक्षुर्ग्राह्यत्व' इतना ही कहना चाहिये, मात्रपद व्यर्थ है।

समाधान—जलमात्र में रहनेवाले सांसिद्धिकद्रवत्व में रूपलक्षण की अतिव्याप्ति के वारण के लिये मात्रपद का उपादान आवश्यक है। अन्यथा सांसिद्धिक-द्रवत्व के विशेषगुण होने से मात्रपद के बिना उसमें अतिव्याप्ति का निवारण न हो पाता।

अथवा जो जाति चक्षुर्मात्र से ग्राह्य हो, तादृशजातिमद् (जातिविशिष्ट) गुणत्व रूप का लक्षण है। अतः गुणपद को विशेषगुणपरक माने बिना भी प्रभाघटसयोग में रूपलक्षण की अतिव्याप्ति न होगी। क्योंकि संयोगत्वजाति चक्षुर्मात्रग्राह्य जाति नहीं है। कारण, प्रभाघटसंयोग भले ही चक्षुर्मात्रग्राह्य हो किन्तु तद्गत सयोगत्व-जाति चक्षुर्मात्रग्राह्य नहीं है। क्योंकि घट और पट का संयोग चक्षु से भी ग्राह्य होता है और त्वगिन्द्रिय से भी ग्राह्य होता है। अतः उस संयोग में रहनेवाली संयोगत्वजाति भी त्वगिन्द्रिय ग्राह्य होगी। क्योंकि "जो गुण जिस इन्द्रिय से गृहीत होता है, उसमें रहनेवाली जाति भी उस इन्द्रिय से ग्राह्य होती है" यह नियम है।

In Public domain. Digitization Muthulakshmi Research Academy

रसनग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्त-भेदात् षड्विधः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां षड्विधः। जले मधुर एव।

घ्राणग्राह्यो गुणो गन्धः। स च द्विविधः। सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः।

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः, शीतोष्णाऽनुष्णाऽशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाऽशीतः पृथिवीवाय्वोः।

रसना-इन्द्रिय से ग्रहण किया जानेवाला गुण रस है। और वह मधुर (मीठा) अम्ल (खट्टा) लवण (नमकीन) कटु (कड़ुआ) कषाय (कसैला) तिक्त (तीता) के भेद से छः प्रकार का होता है। रस-गुण पृथिवी और जल में रहता है। पृथिवी में पूर्वोक्त छहों प्रकार का रस रहता है। जल में केवल मधुर रस रहता है।

घ्राण इन्द्रिय से ग्रहण किया जाने वाला गुण गन्ध है। वह दो प्रकार का होता है—सुरभि (सुगन्ध) और असुरभि (दुर्गन्ध) गन्ध-गुण केवल पृथिवी में रहता है।

त्वगिन्द्रिय (त्वचा इन्द्रिय) मात्र से ग्रहण किया जानेवाला गुण स्पर्श है। वह शीत-उष्ण और अनुष्णाशीत भेद से तीन प्रकार का होता है। स्पर्श-गुण पृथिवी-जल-तेज और वायु में रहता है। उनमें शीतस्पर्श जल में रहता है, उष्णस्पर्श तेज में रहता है और अनुष्णाशीत (न उष्ण न शीत) स्पर्श पृथिवी और वायु में रहता है।

हिन्दी-कला

एवं प्रभाघटसंयोग में तथा घटपटसंयोग में एक ही संयोगत्व जाति है। ऐसी स्थिति में प्रभा-घटसंयोग के चक्षुर्मात्रग्राह्यजातिमान् गुण नहीं होने से प्रभा-घट-संयोग में अतिव्याप्ति न होगी। अतः इस जातिघटित लक्षणपक्ष में गुणपद को विशेषगुणपरक मानने की कोई आवश्यकता नहीं है।

इस जातिघटितलक्षण में भी 'गुणत्व' पद देना ही होगा, अन्यथा सुवर्ण में रूप-लक्षण की अतिव्याप्ति हो जायगी। क्योंकि सुवर्ण में रहनेवाली सुवर्णत्वजाति चक्षुर्मात्रग्राह्य जाति है। रूप के समान सुवर्ण के भी चक्षुर्मात्रग्राह्यजातिमान् होने से उसमें रूपलक्षण की अतिव्याप्ति का वारण करने के लिये 'गुणत्व' पद देना आवश्यक है।

रूप के समान ही रसादि के लक्षण में भी विशेषणभाग न देने पर लक्ष्य से भिन्न गुण में अतिव्याप्ति हो जायगी तथा विशेष्यभाग न देने पर लक्ष्यमात्र में

In Public domain. Digitization Muthulakshmi Research Academy

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यञ्च । अन्यत्रापाकजं नित्यमनित्यञ्च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् ।

रूप आदि (रूप-रस-गन्ध-स्पर्श) चार पृथिवी में पाक से (विलक्षण तेज़ के संयोग से) उत्पन्न होते हैं और अनित्य हैं। और पृथिवी से भिन्न में अपाकज होते हैं तथा नित्य भी हैं और अनित्य भी हैं। नित्य द्रव्य में रहने वाले रूपादि नित्य होते हैं और अनित्य द्रव्य में रहने वाले रूपादि अनित्य होते हैं।

न्यायबोधिनी

स्पर्शं लक्षयति त्वगिन्द्रियमात्रग्राह्य इति। अत्रापि मात्रपदं संख्यादि-सामान्यगुणादावतिव्याप्तिवारणाय। अन्यविशेषणकृत्यं पूर्ववद्बोध्यम्। ग्राह्यत्वपदार्थोऽपि पूर्ववदेव प्रत्यक्षविषयत्वरूप एव बोध्यः।

रूपादिचतुष्टयमिति। एतत्तत्त्वनिर्णयश्चेत्थम्—पाको नाम विजातीयतेजः संयोगः। स च नानाजातीयरूपजनको विजातीयः तेजःसयोगः। तदपेक्षया रसजनको विजातीयः। एवं गन्धजनकोऽपि ततो विजातीय एव। एवं स्पर्शजनकोऽपि तथैव। एवं प्रकारेण भिन्नभिन्नजातीयाः पाकाः कार्यवैलक्षण्येन कल्पनीयाः।

यथा तृणपुञ्जनिक्षिप्त आम्रादौ उष्णलक्षणविजायतीयतेजःसंयोगात् पूर्वहरितरूपनाशेन रूपान्तरस्य पीतादेरुत्पत्तिर्न तु रसादेरुत्पत्तिः। पूर्वरसस्याम्लस्यैवानुभवात्। क्वचित् पूर्वहरितरूपसत्त्वेऽपि रसपरावृत्तिर्दृश्यते। विजातीयतेजःसंयोगरूपपाकवशात् पूर्वतनाम्लरसनाशेन मधुररसस्यानुभवात्। तस्माद् रूपजनकापेक्षया रसजनको विलक्षण एवाङ्गीकार्यः।

एवं गन्धजनको विलक्षण एव, रूपरसयोरपरावृत्तावपि पूर्वगन्धनाशेऽपि विजातीयपाकवशात् सुरभिगन्धोपलब्धेः। एवं स्पर्शजनकपाकवशात् कठिनस्पर्शनाशेन मृदुस्पर्शानुभवात्। तस्माद्रूपादिजनका विजातीया एव पाकाः। अत एव पार्थिवपरमाणूनामेकजातीयत्वेऽपि पाकमहिम्ना विजातीयद्रव्यान्तरानुभवः। यथा गोभुक्ततृणादीनामापरमाण्वन्तभङ्गे

हिन्दी-कला

में रहनेवाली रसत्व-गन्धत्व आदि जाति में रसादिलक्षण की अतिव्याप्ति हो जायगी। अतः रसादि के लक्षण में भी विशेषण-विशेष्य दोनों का उपादान आवश्यक है। ऐसा जानना चाहिये।

त्वगिन्द्रियमात्रग्राह्यगुणत्व स्पर्श का लक्षण है। यहाँ भी मात्रपद का उपादान संख्या आदि सामान्यगुणों में अतिव्याप्तिवारण के लिये है। अन्य विशेषणों का प्रयोजन रूपलक्षण के समान ही समझना चाहिये। 'ग्राह्यत्व' पद का अर्थ भी पूर्व के समान ही प्रत्यक्षविषयत्वरूप जानना चाहिये।

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

तृणारम्भकपरमाणुषु विजातीयतेजःसयोगात् पूर्वरूपादिचतुष्टयनाशे तदनन्तरं दुग्धे यादृशं रूपादिकं वर्तते, तादृशरूपरसगन्धस्पर्शजनकास्तेजःसंयोगाः जायन्ते । तदुत्तरं तादृशरूपरसादय उत्पद्यन्ते । तादृशरूपरसादिविशिष्टपरमाणुभिर्दुग्धद्व्यणुकमारभ्यते, ततस्त्र्यणुकादिक्रमेण महादुग्धारम्भः । एवं दुग्धारम्भकैः परमाणुभिरेव दध्यारभ्यते । एवं पाकमहिम्ना दध्यारम्भकैरेव परमाणुभिर्नवनीतादिकमिति दिक् ।

हिन्दी-कला

रूप-रस-गन्ध और स्पर्श ये चारों गुण पृथिवी में पाकज (पाक से होनेवाले) एवं अनित्य हैं। इसका स्पष्टीकरण यों है—विलक्षण तेज का सयोग पाक है। यह तेजः-संयोग भी विलक्षण ही होता है, जिससे रूप में ही नील-पीत आदि अनेकविध रूप की उत्पत्ति होती है। ऐसे ही रूपजनक तेज संयोग की अपेक्षा रसजनक तेजः-संयोग विलक्षण ही होता है। ऐसे ही गन्धजनक तेजःसंयोग उससे विलक्षण और स्पर्शजनक तेजःसंयोग उससे विलक्षण होता है। इस प्रकार कार्य की विलक्षणता को देखते हुए भिन्न-भिन्न जाति के विलक्षण पाकों (तेजःसंयोगों) की कल्पना की जाती है।

जैसे, तृण की ढेर में रखे किसी आम आदि फल में ऊष्मानामक विलक्षण तेज के संयोग से पूर्व हरा रूप का नाश होकर पीले रूप की उत्पत्ति हो जाती है, किन्तु रस ज्यों का त्यों खट्टा ही रह जाता है, क्योंकि उसमें खट्टापन का ही अनुभव होता है। कहीं तो पूर्व हरितरूप ज्यों का त्यों रह जाता है और रस में परिवर्तन हो जाता है। क्योंकि वहाँ विजातीय तेजःसंयोगरूप पाक के कारण खट्टे रस के नाश से मधुर रस का ही अनुभव होता है। इससे यह स्वीकार करना पड़ता है कि रूपजनक पाक की अपेक्षा रसजनक पाक विलक्षण है।

ऐसे ही गन्धजनक तेजःसंयोग भी विलक्षण ही होता है। क्योंकि रूप-रस के नहीं बदलने पर भी पूर्वगन्ध का नाश होकर सुरभिगन्ध की उत्पत्ति देखी जाती है। एवं स्पर्शजनक भी पाक विलक्षण ही है। क्योंकि वहाँ कठिनस्पर्श का नाश होकर मृदुस्पर्श की अनुभूति होती है। इसलिये रूपादि के जनक पाक विलक्षण ही होते हैं। इसीलिये पार्थिव परमाणु के समान होने पर भी पाक की महिमा से विजातीय द्रव्यान्तर का अनुभव होता है।

जैसे गायद्वारा चर्वित तृण आदि का परमाणुपर्यन्त भंग हो जाने पर तृण के उत्पादक परमाणुओं में विजातीय तेजःसंयोग से पूर्व के रूप-रस-गन्ध और स्पर्श नष्ट हो जाते हैं और बाद में दूध के अनुरूप रूप-रस-गन्ध-स्पर्श के जनक तेजःसंयोग पैदा होने के बाद दूध के परमाणुओं में रूप-रस-गन्ध और स्पर्श पैदा हो जाते हैं।

In Public domain. Digitization Muthulakshmi Research Academy

एकत्वादिव्यवहारहेतुः संख्या । सा नवद्रव्यवृत्तिः, एकत्वादि-परार्धपर्य्यन्ता । एकत्वं नित्यमनित्यञ्च । नित्यगतं नित्यमनित्यगतमनित्यम् । द्वित्वादिकन्तु सर्वत्रानित्यमेव ।

मानव्यवहारासाधारणं कारणं परिमाणम् । नवद्रव्यवृत्ति । तच्चतुर्विधम्—अणु, महद्, दीर्घं, ह्रस्वं चेति ।

पृथग्व्यवहारासाधारणकारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति । संयुक्तव्यवहारहेतुः संयोगः सर्वद्रव्यवृत्तिः ।

संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ।

एकत्व द्वित्व आदि व्यवहार का हेतुभूत गुण संख्या है। वह पृथिवी आदि नवों द्रव्यों में रहती है। एकत्व से लेकर परार्धपर्यन्त संख्या व्यवहार में आती है। एकत्व-संख्या नित्य भी है और अनित्य भी है। नित्य में रहने वाली एकत्व-संख्या नित्य है तथा अनित्य में रहने वाली एकत्व-संख्या अनित्य है। द्वित्व आदि संख्या तो सर्वत्र अनित्य ही है, क्योंकि द्वित्वादि-संख्या अपेक्षाबुद्धि से जन्य होती है।

मान-(माप-) व्यवहार का असाधारण कारण जो गुण, वह परिमाण है। वह नवों द्रव्यों में रहता है। परिमाण चार प्रकार का होता है—अणु-महत्-दीर्घ और ह्रस्व।

पृथक्-व्यवहार का असाधारण कारण जो गुण, वह पृथक्त्व है। पृथक्त्व-गुण सभी द्रव्यों में रहता है।

संयुक्त व्यवहार का हेतुभूत गुण संयोग है। वह सभी द्रव्यों में रहने वाला है।

संयोग का नाश करने वाला गुण विभाग है। विभागनामक गुण सभी द्रव्यों में रहता है।

न्यायबोधिनी

विभागं लक्षयति संयोगेति। संयोगनाशकत्वविशिष्टगुणत्वं विभागस्य लक्षणम्। विशेषणमात्रोपादाने क्रियाया अपि संयोगनाशकत्वात् तत्राति-

हिन्दी-कला

और वैसे परमाणु से वैसा ही दुग्ध का द्व्यणुक पैदा होता है। और वैसे द्व्यणुक से वैसा ही त्र्यणुक चतुरणुकादि क्रम से महादुग्ध का आरम्भ हो जाता है। ऐसे दुग्धारम्भक परमाणुओं से ही दधिका आरम्भ और पाक की महिमा से दधि के आरम्भक परमाणुओं से नवनीत घृत आदि उत्पन्न होते हैं।

संयोगनाशकत्वविशिष्ट-गुणत्व विभाग का लक्षण है। लक्षण में विशेषणमात्र कहने पर क्रिया भी संयोग की नाशिका होती है, अतः उसमें विभागलक्षण की अति-

In Public domain. Digitization Muthulakshmi Research Academy

परापरव्यवहारासाधारणकारणे परत्वापरत्वे । पृथिव्यादिचतुष्टयमनोवृत्तिनी । ते च द्विविधे दिक्कृते कालकृते चेति । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वम् । कनिष्ठे कालकृतमपरत्वम् ।

आद्यपतनासमवायिकारणं गुरुत्वम् । पृथिवीजलवृत्ति ।

आद्यस्यन्दनासमवायिकारणं द्रवत्वम् । पृथिव्यप्तेजोवृत्ति । तद्द्विविधम्—सांसिद्धिकं नैमित्तिकञ्च । सांसिद्धिकं जले । नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम् । तेजसि सुवर्णादौ ।

पर-(दूर या ज्येष्ठ-) व्यवहार का असाधारण कारण परत्व है और अपर-(समीप या कनिष्ठ-) व्यवहार का असाधारण कारण अपरत्व है । वे परत्व और अपरत्व-गुण पृथिवी आदि (पृथिवी-जल-तेज-वायु) चार एवं मन में रहते हैं । परत्व-अपरत्व दो दो प्रकार के होते हैं—दिक्कृत और कालकृत । दूरस्थ वस्तु में दिक्कृत परत्व होता है । समीपस्थ वस्तु में दिक्कृत अपरत्व होता है । ज्येष्ठ में कालकृत परत्व होता है । कनिष्ठ में कालकृत अपरत्व होता है ।

आद्यपतन का असमवायिकारण गुण गुरुत्व है । वह पृथिवी और जल में रहता है ।

आद्यस्पन्दन का असमवायिकारण गुण द्रवत्व है । वह पृथिवी, जल और तेज में रहता है । द्रवत्व दो प्रकार का होता है—सांसिद्धिक और नैमित्तिक । सांसिद्धिक-द्रवत्व जल में और नैमित्तिक-द्रवत्व पृथिवी और तेज में रहता है । घृत आदि पृथिवी

न्यायबोधिनी

व्याप्तिस्तद्वारणाय गुणत्वमिति विशेष्योपादानम् ।

गुरुत्वं लक्षयति आद्येति । द्वितीयपतनक्रियायां वेगस्यासमवायिकारणत्वात्तत्रातिव्याप्तिवारणायाद्येति । उत्तरत्र स्यन्दने आद्यविशेषणमपि

हिन्दी-कला

व्याप्ति हो जायगी, इसके निवारण के लिये 'गुणत्व' इस विशेष्य का उल्लेख किया । क्रिया में गुणत्वधर्म नहीं होने से अतिव्याप्ति नहीं हुई ।

आद्यपतन का असमवायिकारण होते हुए गुणत्व गुरुत्व का लक्षण है । द्वितीय पतन का असमवायिकारण गुण वेग भी है, अतः वेग में लक्षण की अतिव्याप्ति का वारण करने के लिये 'आद्य' यह पतन का विशेषण दिया । आगे द्रवत्व के लक्षण में भी स्यन्दन में 'आद्य' विशेषण देने का प्रयोजन समझना चाहिये ।

In Public domain. Digitization Muthulakshmi Research Academy

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ।

श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः । स द्विविधः—

में अग्निसंयोग से द्रवत्व उत्पन्न होता है तथा सुवर्ण आदि तेज में भी अत्यन्त अग्नि-संयोग से द्रवत्व उत्पन्न होता है ।

चूर्ण आदि के पिण्डीभाव (बन्धन) का हेतु जो गुण, वह स्नेह है । वह जलमात्र में रहता है ।

श्रोत्र-इन्द्रिय से ग्रहण-योग्य गुण शब्द है । वह आकाशमात्र में रहता है ।

न्यायबोधिनी

पूर्ववदेव योज्यम् ।

स्नेहं लक्षयति–चूर्णादीति । चूर्णादिपिण्डीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम् । पिण्डीभावो नाम-चूर्णादेर्धारणाकर्षणहेतुभूतो विलक्षणः संयोगः । तादृशसंयोगे स्नेहस्यैवासाधारणकारणत्वं न तु जलादिगतद्रवत्वस्य । तथा सति द्रुतसुवर्णादिसंयोगेन चूर्णादेः पिण्डीभावापत्तेरतः स्नेह एवासाधारणं कारणम् । विशेषणमात्रोपादाने कालादावतिव्याप्तिरतस्तद्वारणाय विशेष्योपादानम् । वस्तुतस्तु द्रुतजलसंयोगस्यैव पिण्डीभावहेतुत्वं, स्नेहस्य हेतुत्वे मानाभावात् । जले द्रुतत्वविशेषणात् करकादिव्यावृत्तिः ।

शब्दं लक्षयति—श्रोत्रेति । शब्दत्वेऽतिव्याप्तिवारणाय 'गुण' इति ।

हिन्दी-कला

चूर्णादि के पिण्डीभाव का हेतु होते हुए गुणत्व स्नेह का लक्षण है। पिण्डीभाव का अर्थ है – चूर्णादि को एक में परस्पर बाँधने और उसके आकर्षण का हेतुभूत विलक्षण संयोग। ऐसे विलक्षण संयोग के प्रति स्नेह ही असाधारण कारण है, न कि जलादिगत द्रवत्व कारण है। क्योंकि द्रवत्व के कारण होने पर पिघले हुए सुवर्णादि के संयोग से भी चूर्ण में पिण्डीभाव होना चाहिये, किन्तु वैसा नहीं होता है। अतः पिण्डीभाव के प्रति स्नेह ही असाधारण कारण है।

इस लक्षण में यदि विशेषणमात्र का उपादान हो तो कालादि में भी स्नेहलक्षण की अतिव्याप्ति हो जायगी, अतः उसके वारण के लिये 'गुणत्व' इस विशेष्यपद का ग्रहण किया गया। काल में गुणत्व-धर्म नहीं है। वस्तुतः तो पिघले हुए जल का संयोग ही पिण्डीभाव का हेतु है, क्योंकि स्नेह के हेतु होने में प्रमाण नहीं है। कारण, यदि स्नेह पिण्डीभाव का हेतु हो तो ओले में भी जल होने से स्नेह है, तब ओले से भी सक्तु आदि का पिण्ड बन जाना चाहिये। जल में 'द्रुतत्व' इस विशेषण के देने से ओले आदि की व्यावृत्ति हो जायगी। ऐसी स्थिति में स्नेह का कुछ और ही लक्षण करना होगा।

मूलोक्त शब्दलक्षण में गुणपद का उपादान शब्दत्व में अतिव्याप्ति का वारण

In Public domain. Digitization Muthulakshmi Research Academy

ध्वन्यात्मको वर्णात्मकश्च । तत्र ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः ।

सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् । सा द्विविधा—स्मृतिरनुभवश्च ।

शब्द दो प्रकार का होता है—ध्वन्यात्मक शब्द और वर्णात्मक शब्द। उनमें ध्वन्यात्मक शब्द भेरी (नगाड़े) आदि में होता है और वर्णात्मक शब्द संस्कृतभाषा आदि स्वरूप है।

समस्त व्यवहारों का हेतुभूत गुण बुद्धि है। बुद्धि को ज्ञान भी कहते हैं। बुद्धि दो प्रकार की होती है—स्मृति और अनुभव।

न्यायबोधिनी

रूपादावतिव्याप्तिवारणाय—श्रोत्रेति। स त्रिविधः संयोगजो, विभागजः, शब्दजश्चेति। यथा भेरीदण्डसंयोगजो झाङ्कारादिशब्द, हस्ताभिघातसंयोगजन्यो मृदङ्गादिशब्दः। वंशे पाटचमाने दलद्वयविभागजश्चटचटाशब्द। शब्दोत्पत्तिदेशमारभ्य श्रोत्रदेशपर्यन्तं वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा निमित्तपवनेन शब्दधारा जायन्ते। तत्र उत्तरोत्तरशब्दे पूर्वपूर्वशब्दः कारणम्।

बुद्धेर्लक्षणमाह—सर्वव्यवहारेति। व्यवहारः शब्दप्रयोगः। ज्ञानं विना शब्दप्रयोगासंभवात् शब्दप्रयोगरूपव्यवहारहेतुत्वं ज्ञानस्य लक्षणम्। बुद्धिं विभजते सा द्विविधेति।

हिन्दी-कला

के लिये किया गया है। रूपादि गुण में शब्दलक्षण की अतिव्याप्ति रोकने के लिये 'श्रोत्र' पद दिया। शब्द के तीन भेद हैं—संयोगज शब्द, विभागज शब्द और शब्दज शब्द। जैसे, भेरी-दण्ड के संयोग से होनेवाला झङ्कार आदि शब्द तथा हस्त के सयोग से होनेवाला मृदङ्गादिका शब्द संयोगज है। वाँस के फाड़ते समय उसके दोनों टुकड़ों के विभाग से उत्पन्न 'चटचटा' शब्द विभागज शब्द है। तथा शब्दोत्पत्तिस्थल से लेकर श्रोत्रपर्यन्त वीचीतरङ्गन्याय से या कदम्बमुकुलन्याय से वायु के कारण शब्द की धारा उत्पन्न हो जाती है। यह शब्दज शब्द है। क्योंकि उत्तरोत्तर शब्द के प्रति पूर्व-पूर्व शब्द कारण होता है।

समस्त व्यवहारों का हेतुभूत गुण बुद्धि है। इसे ही ज्ञान भी कहते हैं। यहाँ व्यवहार का अर्थ शब्दप्रयोग है। चूंकि ज्ञान के विना शब्दप्रयोग नहीं हो सकता, इसलिये 'शब्दप्रयोगरूपव्यवहारहेतु गुणत्व' ज्ञान का लक्षण है।

In Public domain. Digitization Muthulakshmi Research Academy

संस्कारमात्रजन्यं ज्ञानं स्मृतिः । तद्भिन्नं ज्ञानमनुभवः । स द्विविधः—यथार्थोऽयथार्थश्च ।

संस्कारमात्र से उत्पन्न होने वाला ज्ञान स्मृति है। और स्मृति से भिन्न ज्ञान अनुभव है। अनुभव दो प्रकार का होता है—यथार्थ और अयथार्थ।

न्यायबोधिनी

स्मृतिं लक्षयति—संस्कारेति। संस्कारमात्रजन्यत्वविशिष्टज्ञानत्वं स्मृतेर्लक्षणम्। विशेषणानुपादाने प्रत्यक्षानुभवेऽतिव्याप्तिरतस्तद्वारणाय विशेषणोपादानम्। संस्कारध्वंसेऽतिव्याप्तिवारणाय विशेष्योपादानम्। ध्वंसं प्रति प्रतियोगिनः कारणत्वात् संस्कारध्वंसेऽपि संस्कारजन्यत्वस्य सत्त्वात्। प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रपदम्।

अनुभवं लक्षयति—तद्भिन्नमिति। तद्भिन्नत्वं नाम स्मृतिभिन्नत्वम्। तथा च स्मृतिभिन्नत्वविशिष्टज्ञानत्वमनुभवस्य लक्षणम्। तत्र विशेषणानुपादाने स्मृतावतिव्याप्तिः, विशेष्यानुपादाने घटादावतिव्याप्तिरतस्तद्वारणाय विशेषणविशेष्ययोरुभयोरुपादानम्। अनुभवं विभजते—स द्विविध इति।

हिन्दी-कला

'संस्कारमात्रजन्यत्वविशिष्ट ज्ञानत्व' यह स्मृति का लक्षण है। यहाँ विशेषण का ग्रहण न करने पर प्रत्यक्ष अनुभव में अतिव्याप्ति हो जायगी, अतः उसे रोकने के लिये 'संस्कारमात्रजन्यत्व' विशेषण दिया। संस्कार के ध्वंस में स्मृतिलक्षण की अतिव्याप्ति न हो जाय, इसके लिये 'ज्ञानत्व' इस विशेष्य का उपादान किया। कारण, ध्वंस के प्रति प्रतियोगी कारण होता है, इसलिये संस्कार-ध्वंस में भी संस्कार-जन्यत्व के होने से उसमें स्मृति-लक्षण की अतिव्याप्ति हो जाती। अतः 'ज्ञान' पद देना आवश्यक है। प्रत्यभिज्ञा भी संस्कारजन्य होती है, अतः उसमें अतिव्याप्ति-वारण के लिये मात्रपद दिया। प्रत्यभिज्ञा के प्रति संस्कार के साथ-साथ वहिरिन्द्रियाँ भी कारण होती हैं, अतः प्रत्यभिज्ञा संस्कारमात्रजन्य नहीं हुई। संस्कारमात्र-जन्यत्व का अर्थ है—"वहिरिन्द्रियाजन्यत्वे सति संस्कारजन्यत्व।"

स्मृति से भिन्न ज्ञान अनुभव है। इस प्रकार 'स्मृतिभिन्नत्वविशिष्ट ज्ञानत्व' अनुभव का लक्षण है। इसमें 'स्मृतिभिन्नत्व' विशेषण नहीं देने पर स्मृति में लक्षण की अतिव्याप्ति हो जायगी। 'ज्ञानत्व' रूप विशेष्य न देने पर घटादि में अतिव्याप्ति हो जायगी। इसलिये इन अतिव्याप्तियों का वारण करने के लिये विशेषण-विशेष्य दोनों का उपादान किया गया। अनुभव दो हैं—यथार्थानुभव और अयथार्थानुभव।

In Public domain. Digitization Muthulakshmi Research Academy

तद्वति तत्प्रकारकोऽनुभवो यथार्थः । सैव प्रमेत्युच्यते ।

तद्वान् (उससे युक्त) में तत्प्रकारक (इसे विशेषण बनाने वाला) अनुभव यथार्थानुभव है । जैसे, रजत में (रजतत्व से युक्त में) "इदं रजतम्" यह रजतत्व-प्रकारक (रजतत्व-धर्म को विशेषण बनाने वाला) ज्ञान (अनुभव) यथार्थानुभव है । यथार्थ अनुभव ही प्रमा शब्द से कहा जाता है ।

न्यायबोधिनी

यथार्थानुभवं लक्षयति—तद्वतीति । तद्वतीत्यत्र सप्तम्यर्थो विशेष्य-त्वम् । तच्छब्देन प्रकारीभूतो धर्मो धर्तव्यः ।

तथा च तद्वद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वं यथार्थानुभवस्य लक्षणमित्यर्थः ।

उदाहरणम्—रजते 'इदं रजतमिति' ज्ञानम् । अत्र रजतत्ववद्विशेष्यकत्वे सति रजतत्वप्रकारकत्वस्य सत्त्वाल्लक्षणसमन्वयः । तद्वन्निष्ठविशेष्यतानि-रूपिततन्निष्ठप्रकारताशालित्वमिति तु निष्कर्षः ।

अन्यथा यथाश्रुते रङ्गरजतयोरिमे रजतरङ्गे इत्याकारकसमूहालम्बन-भ्रमेऽतिव्याप्तिः, तत्रापि रजतत्ववद्विशेष्यकत्वरजतत्वप्रकारकत्वयोः रङ्ग-त्ववद्विशेष्यकत्वरङ्गत्वप्रकारकत्वयोः सत्त्वात् ।

हिन्दी-कला

तद्वति तत्प्रकारक अनुभव यथार्थ अनुभव कहाता है । 'तद्वति' यहां सप्तमी-विभक्ति का अर्थ विशेष्यत्व है । तथा 'तत्' शब्द से प्रकारीभूत (विशेषणीभूत) धर्म लेना चाहिये । इस प्रकार "तद्वद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्व" यह यथार्थानुभव का लक्षण बना । इसका उदाहरण—रजत में 'इदं रजतम्' यह ज्ञान है । अर्थात् यह ज्ञान यथार्थ अनुभव है । क्योंकि रजतत्ववद्विशेष्यक होते हुए रजतत्व-प्रकारक होने से इस ज्ञान में यथार्थानुभव का उपर्युक्त लक्षण समन्वित (घटित) हो जाता है । नव्यन्याय की पद्धति में उक्त लक्षण का निष्कर्ष यों होता है—तद्वत्-निष्ठ-विशेष्यता-निरूपिता जो तत्निष्ठ प्रकारता, तादृश प्रकारताशाली जो ज्ञान, वह यथार्थानुभव है । इसका विशेष विवेचन 'संस्कृत-कला' व्याख्या में द्रष्टव्य है ।

लक्षण के इस निष्कृष्ट स्वरूप के न मानने पर अर्थात् मूलोक्त लक्षण को ही ज्यों का त्यों स्वीकार कर लेने पर क्रमशः सम्मुख वर्तमान रङ्ग (रांगा) और रजत में उलट कर 'इमे रजतरङ्गे' इस समूहालम्बन भ्रमज्ञान में यथार्थानुभवलक्षण की अतिव्याप्ति हो जायगी । क्योंकि भले ही इस ज्ञान में रङ्ग को रजत समझ लिया गया है, और रजत को रङ्ग समझ लिया गया है (कारण दोनों की चमक एक सी है) फिर भी सामूहिक रूप में यह ज्ञान रजतत्वद्विशेष्यक भी है और रजतत्व-प्रकारक भी है तथा रङ्गत्ववद्विशेष्यक भी है और रङ्गत्वप्रकारक भी है ।

In Public domain. Digitization Muthulakshmi Research Academy

तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः ।

उसके अभाव वाले में अर्थात् जहाँ उसका अभाव है, उसी में तत्प्रकारक (उसे विशेषण बनाने वाला) अनुभव अयथार्थ अनुभव कहाता है। अयथार्थ अनुभव ही 'अप्रमा' शब्द से व्यवहृत होता है।

न्यायबोधिनी

उक्तनिष्कर्षे तु नातिव्याप्तिः, तज्ज्ञानस्य रजतत्वप्रकारताया रजतत्ववद्विशेष्यतानिरूपितत्वाभावात्, एवं रङ्गत्वप्रकारताया रङ्गत्ववद्विशेष्यतानिरूपितत्वाभावात्। किन्तु समूहालम्बनभ्रमस्य रङ्गांशे रजतत्वावगाहित्वेन रजतत्वप्रकारताया रङ्गत्ववद्विशेष्यतानिरूपितत्वात्। एवं रजतांशे रङ्गत्वावगाहित्वेन रङ्गत्वप्रकारताया रजतत्ववद्विशेष्यतानिरूपितत्वाच्चेति। नानामुख्यविशेष्यताशालिज्ञानं समूहालम्बनम्।

अयथार्थानुभवं लक्षयति—तदभाववतीति। अत्रापि पूर्ववत् तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालिज्ञानत्वं विवक्षणीयम्। अन्यथा रङ्गरजतयोरिमे रङ्गरजते इत्याकारकसमूहालम्बनप्रमायामतिव्याप्तिः।

हिन्दी-कला

उक्त प्रकार का लक्षण का निष्कर्ष होने पर यहाँ अतिव्याप्ति नहीं होगी। क्योंकि उक्त ज्ञान में अपनी अपनी प्रकारता अपनी अपनी विशेष्यता से निरूपित न होकर एक दूसरे की विशेष्यता से निरूपित हो गयी है। अर्थात् रजतत्वनिष्ठा प्रकारता रजतत्ववद्विशेष्यता से निरूपित नहीं है और रङ्गत्वनिष्ठप्रकारता रङ्गत्ववद्-विशेष्यता से निरूपित नहीं है। बल्कि इस समूहालम्बन भ्रम के अन्तर्गत रङ्गांश में रजतत्वप्रकार का अवगाहन होने से रजतत्ववाली प्रकारता रङ्गत्ववद्निष्ठ विशेष्यता से निरूपित हो गयी है। तथा रजतांश में रङ्गत्वरूप प्रकार का अवगाहन होने से रङ्गत्ववाली प्रकारता रजतत्ववद्निष्ठ विशेष्यता से निरूपित हो गयी है। इस प्रकार उक्त समूहालम्बन ज्ञान में प्रकार-विशेष्य का परस्पर अदला-बदली हो जाने के कारण यह ज्ञान यथार्थानुभव नहीं है। अनेक मुख्य-विशेष्यता वाला ज्ञान समूहालम्बन ज्ञान कहाता है। जैसे "इमे रजतरङ्गे" यहाँ रजत और रङ्ग दो विशेष्य हैं, इसलिये यह ज्ञान समूहालम्बन ज्ञान है। विशेष जानकारी के लिये 'संस्कृत-कला' द्रष्टव्य है।

अयथार्थानुभव का लक्षण करते हैं—तदभाववति तत्प्रकारकोऽनुभवो अयथार्थः' यह। यहाँ भी पूर्वके समान सप्तमी-विभक्ति का अर्थ 'विशेष्यता' है और 'तत्' पदसे प्रकारीभूत (विशेषणीभूत) धर्म लेना चाहिये। इसलिये पूर्व सरणी के अनुसार 'तदभाववान् में रहने वाली जो विशेष्यता उससे निरूपिता जो तत् में (प्रकारीभूत धर्म में) रहने वाली प्रकारता, तादृश प्रकारताशालिज्ञानत्व" अयथार्थानुभव का लक्षण है। इस प्रकार यदि विशेष्यता और प्रकारता को परस्पर निरूप्यनिरूपक-

In Public domain. Digitization Muthulakshmi Research Academy

यथार्थानुभवश्चतुर्विधः—प्रत्यक्षानुमित्युपमितिशाब्दभेदात् ।

यथार्थानुभव चार प्रकार का होता है – प्रत्यक्ष-अनुमिति-उपमिति और शाब्द-ज्ञान के भेद से ।

न्यायबोधिनी

एतत्समूहालम्बनस्य रङ्गरजतोभयविशेष्यकत्वेन रजतत्वरङ्गत्वोभयप्रकारकत्वेन च रजतत्वाभाववद्रङ्गविशेष्यकत्वरजतत्वप्रकारकत्वयो रङ्गत्वाभाववद्रजतविशेष्यकत्वरङ्गत्वप्रकारकत्वयोश्च सत्त्वात् । उक्तनिष्कर्षे तु तादृशप्रमायाः रजतांशे रजतत्वावगाहित्वेन रङ्गांशे रङ्गत्वावगाहित्वेन च रजतत्वप्रकारताया रजतत्वाभाववद्रङ्गविशेष्यतानिरूपितत्वाभावात्, एवं रङ्गत्वप्रकारताया रङ्गत्वाभाववद्रजतविशेष्यतानिरूपितत्वाभावात् नातिव्याप्तिः । उदाहरणम्—यथा शुक्तौ इदं रजतमिति ।

यथार्थानुभवं विभजते—चतुर्विध इति ।

हिन्दी-कला

भावापन्न के रूप में न कहा जाय तो रङ्ग और रजत में "इमे रङ्गरजते" इस आकार वाले समूहालम्बन प्रमा (यथार्थ अनुभव में) उपर्युक्त अयथार्थानुभवलक्षण की अतिव्याप्ति होने लगेगी । क्योंकि उक्त समूहालम्बनज्ञान रङ्ग-रजत उभयविशेष्यक है, साथ ही रङ्ग में नहीं रहनेवाला जो रजतत्व, तत्प्रकारक है तथा रजत में नहीं रहने वाला जो रङ्गत्व, तत्प्रकारक भी है । इस तरह व्युत्क्रमदृष्टि से उक्त समूहालम्बन प्रमाज्ञान में रजतत्वाभाववद् जो रङ्ग, तद्विशेष्यकत्व और रजतत्व-प्रकारकत्व चला गया तथा रङ्गत्वाभाववान् जो रजत, तद्विशेष्यकत्व और रङ्गत्वप्रकारकत्व चला गया । अतः "तदभाववति तत्प्रकारकत्व" रूप मूलोक्त लक्षण की अतिव्याप्ति उक्त प्रमाज्ञान में भी हो जाती है ।

किन्तु उक्त प्रकार से परस्पर निरूप्यनिरूपकभावापन्न करके परिष्कृत लक्षण करने पर अतिव्याप्ति नहीं होगी । क्योंकि उक्त समूहालम्बनात्मक प्रमाज्ञान में रजतांश में रजतत्व का अवगाहन होने से तथा रङ्गांश में रङ्गत्व का अवगाहन होने से रजतत्व वाली प्रकारता रजतत्वरहित रङ्गनिष्ठ विशेष्यता से निरूपित नहीं हुई तथा रङ्गत्व वाली प्रकारता रङ्गत्वरहित रजतनिष्ठ विशेष्यता से निरूपित नहीं हुई; किन्तु अपने से सम्बद्ध विशेष्यता से ही दोनों प्रकारतायें निरूपित हो रही हैं । इसलिये परिष्कृत लक्षण में अतिव्याप्ति दोष नहीं है ।

उक्त अयथार्थानुभवलक्षण का उदाहरण (लक्ष्य) शुक्ति में होनेवाला "इदं रजतम्" यह ज्ञान है । यहाँ शुक्ति में रजतत्व धर्म नहीं है और उसमें प्रकार होकर रजतत्व भासित हो रहा है, अतः यह ज्ञान अयथार्थ अनुभव है । अर्थात् अप्रमा है ।

अयथार्थानुभव (अप्रमा) के भेद बाद में बताये जायेंगे । यहाँ यथार्थानुभव

In Public domain. Digitization Muthulakshmi Research Academy

तत्करणमपि चतुर्विधम्—प्रत्यक्षानुमानोपमानशब्दभेदात् ।

असाधारणं कारणं करणम् ।

उपर्युक्त चतुर्विध यथार्थानुभव का करण भी चार प्रकार का होता है—प्रत्यक्ष-अनुमान-उपमान और शब्द के भेद से। (ये चारों प्रमाण कहे जाते हैं।)

कार्य के प्रति जो असाधारण कारण है, उसे करण कहते हैं।

न्यायबोधिनी

तत्करणमिति। फलीभूतप्रत्यक्षादिकरणं चतुर्विधमित्यर्थः। प्रत्यक्षादिचतुर्विधप्रमाणानां प्रमाकरणत्वं सामान्यलक्षणम्। एकैकप्रमाणलक्षणन्तु वक्ष्यते प्रत्यक्षज्ञानेत्यादिना।

करणलक्षणमाह—असाधारणमिति। व्यापारवदसाधारणं कारणं करणमित्यर्थः। असाधारणत्वञ्च कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वम्। यथा—दण्डादेर्घटादिकं प्रत्यसाधारणकारणत्वम्। कार्यत्वातिरिक्तो घटत्वादिरूपो धर्मः, तदवच्छिन्नकार्यता घटे, तन्निरूपिता कारणता दण्डे। अतो घटं प्रति दण्डोऽसाधारणं कारणम्। भ्रम्यादिरूपव्यापारवत्वाच्च करणम्। साधारणत्वञ्च कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वम्। ईश्वरादृष्टादेःकार्यत्वावच्छिन्नं प्रत्येव कारणत्वात् साधारणकारणत्वम्।

हिन्दी-कला

(प्रमा) के चार भेद बताते हैं—प्रत्यक्ष अनुमिति-उपमिति और शाब्द। इसके करण भी चार होते हैं—प्रत्यक्ष-अनुमान-उपमान और शब्द। यही न्यायशास्त्र में चार प्रमाण कहे जाते हैं, क्योंकि प्रमा के ये करण हैं। इसीलिये उक्त चतुर्विध प्रमाणों का सामान्य लक्षण है – "प्रमाकरणत्वम् प्रमाणत्वम्"। एक एक प्रमाण का लक्षण तो आगे बताया जायगा।

मूलोक्त करणलक्षण का परिष्कृत अर्थ न्यायबोधिनीकार करते हैं "व्यापारवान् होता हुआ असाधारण कारण करण है" ऐसा। असाधारणत्व का परिष्कृत स्वरूप है—कार्यत्व से अतिरिक्त जो धर्म घटत्व आदि, उससे अवच्छिन्न जो घटादिवृत्ति कार्यता, तादृश कार्यता से निरूपित जो दडादिनिष्ठ कारणता, उससे युक्त होना असाधारणत्व है। अतः घट के प्रति असाधारण कारण होने से तथा भ्रमि (भ्रमण) रूप व्यापारवान् होने से दण्ड घट का करण है।

साधारणकारणत्व का स्वरूप बताते हैं—कार्यत्व-धर्म से अवच्छिन्न (विशिष्ट) जो कार्यता, उससे निरूपित जो कारणता तादृश कारणताशालित्व असाधारणत्व है। इसके अनुसार कार्यत्व-धर्म से अवच्छिन्न कार्यमात्र के प्रति कारण होने से ईश्वर अदृष्ट (धर्माधर्म) काल आदि साधारणकारण कहे जाते हैं।

In Public domain. Digitization Muthulakshmi Research Academy

कार्यनियतपूर्ववृत्ति कारणम् ।
कार्यं प्रागभावप्रतियोगि ।
कारणं त्रिविधं—समवाय्यसमवायिनिमित्तभेदात् ।

कार्य से नियत रूप में जो पूर्ववर्ती होता है, उसे कारण कहते हैं ।

प्रागभाव के प्रतियोगी को कार्य कहते हैं । अर्थात् जिस वस्तु का पहले अभाव होता है और बाद में भाव हो जाता है, वह कार्य है ।

कारण तीन प्रकार का होता है—समवायिकारण, असमवायिकारण और निमित्तकारण के भेद से ।

न्यायबोधिनी

कारणं लक्षयति— कार्यनियतेति । कार्यं प्रति नियतत्वे सति पूर्ववृत्तित्वम् । नियतत्वविशेषणानुपादाने पूर्ववर्तिनो रासभादेरपि घटादिकारणत्वं स्यात्. अतो नियतत्वे सतीति विशेषणम् । नियतपूर्ववर्तिनो दण्डरूपादेरपि घटकारणत्वं स्यादतोऽनन्यथासिद्धपदमपि कारणलक्षणे निवेशनीयम् । दण्डरूपादीनां त्वन्यथासिद्धत्वात् ।

कार्यं लक्षयति—कार्यमिति । प्रागभावप्रतियोगित्वं कार्यस्य लक्षणम् । कार्योत्पत्तेः पूर्वम् 'इह घटो भविष्यति' इति प्रतीतिर्जायते, एतत्प्रतीतिविषयीभूतो योऽभावः स प्रागभावस्तत्प्रतियोगि घटादिरूपं कार्यम् ।

हिन्दी-कला

मूलोक्त कारणलक्षण का अर्थ है—कार्य के प्रति नियत होते हुए उसके पूर्वक्षण में रहना कारणत्व है । अर्थात् जो कार्य के पूर्व में नियमतः रहे, वह कारण है । यहाँ नियतत्व विशेषण न देने पर कदाचित् मट्टी आदि लाने के उपयोग में आया रासभादि भी घटादि का कारण होने लगेगा, अतः नियतत्वे सति यह विशेषण कहा । किन्तु जैसे दण्ड घटके नियत पूर्व में रहता है, वैसे दण्डगत रूप भी दण्ड के साथ ही घट के नियत पूर्व में वर्तमान रहता है, अतः दण्डरूप भी घट का कारण होने लगेगा : इस दोष का निवारण करने के लिये उक्त कारण लक्षण में 'अनन्यथासिद्ध' पद का भी निवेश कर देना चाहिये, दण्ड का रूप तो घट के प्रति अन्यथासिद्ध है । इस प्रकार "अन्यथासिद्धभिन्नत्वे सति कार्यं प्रति नियत पूर्ववृत्तित्वम्" यह कारण का निकृष्ट लक्षण हुआ । अन्यथासिद्धों की गणना न्यायसिद्धान्तमुक्तावली आदि ग्रन्थों में की गयी है ।

'प्रागभाव-प्रतियोगित्व' कार्य का लक्षण है । कार्य उत्पन्न होने के पूर्व 'इह घटो भविष्यति' ऐसी प्रतीति अनुभवसिद्ध हैं । इस प्रतीति का विषय जो अभाव है, वह प्रागभाव कहाता है । और इस प्रागभाव का प्रतियोगी होने से घट आदि कार्य हैं । 'यस्याभावः स प्रतियोगी' यह प्रतियोगी का स्वरूप है ।

In Public domain. Digitization Muthulakshmi Research Academy

यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम् । यथा तन्तवः पटस्य । पटश्च स्वगतरूपादेः ।

जिसमें समवायसम्बन्ध से रहता हुआ कार्य उत्पन्न होता है, वह उस कार्य के प्रति समवायिकारण होता है । जैसे, तन्तु पट का समवायिकारण होता है और पट अपने रूप का समवायिकारण होता है ।

न्यायबोधिनी

कारणं विभजते—कारणमिति । समवायिकारणमसमवायिकारणं निमित्तकारणञ्चेति ।

समवायिकारणं लक्षयति-यत्समवेतमिति । यस्मिन् समवेतं सत्=समवायेन सम्बद्धं सत् कार्यमुत्पद्यते. तत्समवायिकारणमित्यर्थः। उदाहरणम्—यथा तन्तव इति । तन्तुषु समवायेन सम्बद्धं सत् पटात्मकं कार्यमुत्पद्यतेऽतस्तन्तवः समवायिकारणमित्यर्थः ।

सामान्यलक्षणन्तु—समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वं समवायिकारणत्वमिति ।

हिन्दी-कला

कारण तीन प्रकार के होते हैं—समवायिकारण (उपादानकारण) असमवायिकारण और निमित्तकारण ।

जिसमें समवेत होकर अर्थात् समवायसम्बन्ध से सम्बद्ध होता हुआ कार्य पैदा होता है, उसे समवायिकारण कहते हैं । जैसे तन्तु (सूता) में समवायसम्बन्ध से सम्बद्ध ही होकर पटात्मक कार्य पैदा होता है, इसलिये तन्तु पट का समवायिकारण है ।

समवायिकारण का परिष्कृत सामान्यलक्षण निम्नलिखित है—

समवायसम्बन्ध से अवच्छिन्न जो कार्यता, उससे निरूपित एवं तादात्म्यसम्बन्ध से अवच्छिन्न कारणत्व ही समवायिकारणत्व है । जैसे समवायेन घटरूपी कार्य का समवायिकारण तादात्म्येन कपाल है। क्योंकि घटरूपी कार्य समवायसम्बन्ध से कपाल में रहता है. और कपाल का कपाल से तादात्म्य है। अत: समवायसम्बन्ध से अवच्छिन्न तथा घटत्वधर्म से अवच्छिन्न जो घटवृत्ति कार्यता है, उससे निरूपित जो तादात्म्यसम्बन्ध से अवच्छिन्ना कारणता, वह कपाल में है । इस प्रकार समवायिकारण के लक्षण का समन्वय कपाल में हो गया । इसी प्रकार पट का समवायिकारण तन्तु बनता है । इसका विशेष स्पष्टीकरण 'संस्कृत-कला' व्याख्या में द्रष्टव्य है ।

इसी रीति से पट अपने रूप के प्रति समवायिकारण होता है । क्योंकि समवायसम्बन्ध से जन्यभावत्वावच्छिन्न (जन्यभावमात्र) के प्रति तादात्म्यसम्बन्ध से द्रव्य ही कारण होता है । जन्यभाव पदार्थ तीन हैं–द्रव्य, गुण और कर्म । अत: द्रव्य, गुण

In Public domain. Digitization Muthulakshmi Research Academy

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम् । यथा तन्तुसंयोगः पटस्य । तन्तुरूपं पटरूपस्य ।

कार्य के साथ या कारण के साथ एक पदार्थ में समवायसम्बन्ध से रहता हुआ जो कारण, वह असमवायिकारण है । जैसे तन्तुओं का संयोग पट का असमवायिकारण होता है और तन्तु का रूप पट के रूप के प्रति असमवायिकारण होता है ।

न्यायबोधिनी

समवायसम्बन्धेन घटाधिकरणे कपालादौ कपालादेः तादात्म्यसम्बन्धेनैव सत्त्वात्, समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणतायाः कपालादौ सत्त्वाल्लक्षणसमन्वयः ।

समवायेन जन्यभावत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन द्रव्यस्यैव कारणत्वात् जन्यभावेषु द्रव्यगुणकर्मसु त्रिषु द्रव्यमेव समवायिकारणम् । द्रव्ये तु द्रव्यावयवाः समवायिकारणम् । गुणादावपि द्रव्यमेव समवायिकारणमित्याशयेनाह—पटश्च स्वगतरूपादेरिति । समवायिकारणमित्यनुषज्यते ।

असमवायिकारणं लक्षयति—कार्येणेति । कार्येण सहैकस्मिन्नर्थे समवेतं सत् यत् कारणं तदसमवायिकारणमित्यन्वयः । कारणेन सहैकस्मिन्नर्थे समवेतं सत् यत् कारणं तदसमवायिकारणमित्यन्वयः । अत्र 'कारणेन' इत्यस्य स्वकार्यसमवायिकारणेनेत्यर्थः । जन्यद्रव्यमात्रेऽवयवसंयोगस्यैवास-

हिन्दी-कला

और कर्म के प्रति द्रव्य ही समवायिकारण होता है । द्रव्यसमवायिकारणता का उदाहरण कपाल को पहले बताया जा चुका है । वहां घटात्मक द्रव्य के प्रति समवायिकारण उसका अवयवभूत कपाल भी द्रव्य ही है । इस प्रकार द्रव्य का समवायिकारण द्रव्य हुआ, यह स्पष्ट हो गया ।

उक्त नियम के अनुसार गुणस्वरूप जन्यभाव के प्रति भी द्रव्य समवायिकारण होता है । इसका उदाहरण मूल में बताया गया है—कि पट अपने रूप के प्रति समवायिकारण है । यहाँ पट का रूप गुण है । इसी प्रकार कर्म का समवायिकारण भी द्रव्य होता है, इसका उदाहरण है—अश्व आदि । घोड़ा अपनी गमन क्रिया (कर्म) के प्रति समवायिकारण होता है । क्योंकि समवायसम्बन्ध से गमनक्रिया अश्व में ही उत्पन्न होती है ।

असमवायिकारण का लक्षण बताते हैं—कार्य के साथ एक अर्थ में समवेत होता हुआ (समवायसम्बन्ध से रहता हुआ) जो कारण होता है, वह असमवायिकारण है । अथवा कारण के साथ एक अर्थ में समवेत होता हुआ जो कारण होता है वह भी असमवायिकारण है । यहाँ कारण के साथ का अर्थ है—अपने कार्य का जो समवायि-

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

मवायिकारणत्वात् पटात्मककार्ये तदवयवतन्तुसंयोगस्यैवासमवायिकारणत्वमिति दर्शयति—यथा तन्तुसंयोगः पटस्येति। पटात्मककार्येण सहैकस्मिन्नर्थे तन्तौ समवेतं सत् समवायसम्बन्धेन वर्तमानं सत् पटात्मककार्यं प्रति तन्तुसंयोगात्मकं कारणमसमवायिकारणमित्यर्थः। द्वितीयमसमवायिकारणं कारणेन सहेत्यादिना यत् पूर्वोक्तं, तदुदाहरति—तन्तुरूपमिति। कारणेन सह पटरूपसमवायिकारणीभूतपटेन सह एकस्मिन्नर्थे तन्तुरूपेऽर्थे समवेतं सत् समवायसम्बन्धेन वर्तमानं सत् तन्तुरूपं पटगतरूपं प्रति कारणं भवति अतोऽसमवायिकारणं तन्तुरूपं पटगतरूपस्य। सामान्यलक्षणन्तु—समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता या समवाय-स्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्ना कारणता तदाश्रयत्वमसमवायिकारणत्वमिति।

हिन्दी-कला

कारण है, उसके साथ अर्थात् अपने समवायिकारण के साथ एक अर्थ में रहने वाला कारण असमवायिकारण है। इस प्रकार दो तरह का असमवायिकारण होता है।

प्रथम का उदाहरण तन्तुसंयोग है। क्योंकि जन्यद्रव्यमात्र के प्रति अवयवों के संयोग के ही असमवायिकारण होने से पटस्वरूप कार्य के प्रति उसके अवयवभूत तन्तुओं का संयोग ही असमवायिकारण होता है। यहाँ पटात्मक कार्य के साथ तन्तु-स्वरूप एक अर्थ में समवायसम्बन्ध से तन्तु का संयोग वर्तमान है। अतः पट के प्रति तन्तुसंयोग असमवायिकारण हुआ।

पूर्वोक्त द्वितीय असमवायिकारण का उदाहरण मूलकार देते हैं—जैसे तन्तु का रूप पटरूप का असमवायिकारण है। लक्षण का समन्वय यों हैं—यहाँ तन्तुरूप का कार्य पटरूप है और पटरूप का समवायिकारण पट है। अतः कारण के साथ अर्थात् पटरूप का समवायिकारण जो पट, उसके साथ एक अर्थ में तन्तु में, समवेत अर्थात् समवाय-सम्बन्ध से वर्तमान होता हुआ तन्तुरूप पटरूप के प्रति कारण होता है। इसलिये तन्तु का रूप पट के रूप के प्रति असमवायिकारण हुआ।

पूर्व में उदाहृत उभय प्रकार के असमवायिकारण का सामान्यलक्षण (एक लक्षण) न्यायबोधिनीकार परिष्कृत करते हैं समवायसम्बन्धावच्छिन्ना जो कार्यता, (पटगत कार्यता या पटरूपगत कार्यता) उससे निरूपिता जो समवायसम्बन्ध या स्वसमवायि-समवेतत्वसम्बन्ध में किसी एक सम्बन्ध से अवच्छिन्ना कारणता (क्रमशः तन्तुसंयोग-गत या तन्तुरूपगत कारणता) उसका आश्रयत्व असमवायिकारणत्व है। इसके अनुसार पट के प्रति तन्तुसंयोग और पटरूप के प्रति तन्तुरूप असमवायिकारण सिद्ध हुआ। विशेष विवेचन संस्कृत-कला' में द्रष्टव्य है।

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

द्रव्यासममवायिकारणीभूतावयवसंयोगादौ तु समवायसम्बन्धावच्छिन्न-घटत्वावच्छिन्नकार्यतानिरूपिता समवायसम्बन्धावच्छिन्ना कपालद्वयसंयोग-निष्ठा कारणता कपालद्वयसयोगे वर्तते ।

एवमाद्यपतनक्रियायामाद्यस्यन्दनक्रियायां च गुरुत्वद्रवत्वे असमवायि-कारणे भवतः । आद्यपतनक्रियां प्रति आद्यस्यन्दनक्रियां प्रति च समवाय-सम्बन्धेनैव तयोः कारणत्वात् । अवयविगुणादौ त्ववयवगुणादेःस्वसमवायि-समवेतत्वसम्बन्धेनैव कारणत्वात्, तत्सम्बन्धावच्छिन्नकारणताश्रयत्वमवय-वगुणादौ वर्तते । अवयवगुण-कपालतन्तुरूपादेः स्वशब्दग्राह्य-कपालरूपतन्तु-रूप-समवायिकपालतन्तुसमवेतत्वसम्बन्धेन घटपटादौ सत्त्वात् ।

हिन्दी-कला

असमवायिकारण के लक्षण को वोधिनीकार उदाहरणान्तर में उपपादित करते हैं—द्रव्यमात्र का समवायिकारण उसके अवयव का संयोग होता है। अत: समवायसम्बन्धा-वच्छिन्ना और घटत्वधर्मावच्छिन्ना जो घटनिष्ठ कार्यता, उससे निरूपिता जो सम-वायसम्बन्धावच्छिन्ना कपालद्वयसंयोगनिष्ठा कारणता, तादृशकारणता कपालद्वय-संयोग में है । अत: घट के प्रति कपालद्वयसंयोग असमवायिकारण हुआ ।

इसी तरह आद्यपतनक्रिया के प्रति गुरुत्व एवं आद्यस्यन्दन (बहाव) क्रिया के प्रति द्रवत्व असमवायिकारण होता है। क्योंकि आद्यपतनक्रिया के प्रति तथा आद्यस्यन्दनक्रिया के प्रति समवायसम्बन्ध से ही क्रमशः गुरुत्व और द्रवत्व कारण होते हैं।

किन्तु अवयवी के रूपादि गुण के प्रति अवयव का रूपादि गुण स्वसमवायि-समवेतत्वसम्बन्ध से ही कारण होता है, न कि समवायसम्बन्ध से। अत: स्वसम-वायिसमवेतत्वसम्बन्धावच्छिन्नकारणता का आश्रय अवयवगत रूपादि गुण ही है। क्योंकि अवयव का गुण जो कपाल और तन्तु का रूप है, वह स्वसमवायिसमवेतत्व-सम्वन्ध मे स्वशब्द से ग्राह्य कपालरूप और तन्तुरूप, उसका समवायिकारण कपाल और तन्तु में समवेत घट और पट में है। अतः द्वितीय सम्वन्ध अर्थात् स्वसमवायि-समवेतत्वसम्वन्ध से कपाल और तन्तु का रूप घट और पट में है। तथा वहीं समवाय सम्बन्ध से घट-पट का रूप भी रहता है। इस प्रकार उक्त सम्बन्धों के द्वारा कपाल-तन्तुरूप (कारण) तथा घटपटरूप (कार्य) का घट और पट में जाकर सामानाधिकरण्य बन जाता है। अत: कारण और कार्य का सामानाधिकरण्य वन जाने के कारण कपाल और तन्तु का रूप घट और पट के रूप के प्रति असमवायिकारण बन जाता है।

In Public domain. Digitization Muthulakshmi Research Academy

तदुभयभिन्नं कारणं निमित्तकारणम् । यथा तुरीवेमादिकं पटस्य । तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं, तदेव करणम् ।

समवायिकारण और असमवायिकारण से भिन्न जो कारण, वह निमित्तकारण होता है । जैसे, तुरी-वेमा आदि पट का निमित्तकारण होता है ।

इन तीनों कारणों के मध्य जो असाधारण कारण होता है, वही करण है ।

न्यायबोधिनी

निमित्तकारणं लक्षयति–तदुभयभिन्नमिति । समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति कारणत्वं निमित्तकारणत्वम् ।

तदेतदिति । यदसाधारणमिति । व्यापारवत्त्वे सतीत्यपि पूरणीयम् । अन्यथा तन्तुकपालसंयोगयोरतिव्याप्तिः, तन्तुकपालसंयोगयोरपि कार्यत्वातिरिक्तपटत्वघटत्वावच्छिन्नं प्रति कारणत्वादसाधारणत्वमस्त्येवेत्यतस्तत्र करणत्ववारणाय 'व्यापारवत्त्वे सतीति' करणलक्षणे विशेषणं देयम् । व्यापारत्वञ्च तज्जन्यत्वे सति तज्जन्यजनकत्वम् । भवति हि दण्डजन्यत्वे सति दण्डजन्यघटजनकत्वाद् भ्रम्यादेर्व्यापारत्वम् । एवं कपालसंयोगतन्तुसंयोगादेरपि कपालतन्तुव्यापारत्वम्, कपालतन्तुजन्यत्वे सति कपालतन्तुजन्य-

हिन्दी-कला

मूलोक्त निमित्तकारण के लक्षण को बोधिनीकार स्पष्ट करते हैं—समवायिकारण से भिन्न होते हुए तथा असमवायिकारण से भिन्न होते हुए कारण होना निमित्तकारण का लक्षण है । जैसे पट के प्रति तुरी-वेम-कुविन्द आदि तथा घट के प्रति दण्ड, चक्र, कुलाल आदि निमित्त कारण हैं ।

इन त्रिविध कारणों के अन्तर्गत जो असाधारण कारण है, वही कार्य के प्रति करण होता है । करण का लक्षण पूर्व में सविस्तर बताया जा चुका है । उस लक्षण में "व्यापारवत्त्वे सति" इतना जोड़ना आवश्यक है । नहीं तो तन्तु और कपाल के संयोग भी पट और घट के प्रति करण होने लगेंगे । अर्थात् करणलक्षण की अतिव्याप्ति हो जायगी । क्योंकि तन्तु-कपालसंयोग कार्यत्व से भिन्न जो पटत्व-घटत्वधर्म, उससे अवच्छिन्न पटघटात्मक कार्य के प्रति कारण होने से असाधारण कारणरूप बन जाते हैं । अतः तन्तु-कपालसंयोग में करणत्व का वारण करने के लिये "व्यापारवत्त्वे सति" यह विशेषण देना चाहिये । ऐसा करण घट के प्रति दण्ड है ।

"तज्जन्यत्वे सति तज्जन्यजकत्व" यह व्यापार का लक्षण है । यहाँ 'तद्' पद से करण गृहीत होता है । अर्थात् जो करण से पैदा हो और करण से उत्पन्न होने वाले कार्य का जनक हो, वह व्यापार है । जैसे, दण्ड से जन्य होते हुए दण्ड का कार्य घट

In Public domain. Digitization Muthulakshmi Research Academy

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् ।

उन चारों प्रमाणों में प्रत्यक्ष ज्ञान के प्रति जो करण (असाधारण कारण) होता है, वह प्रत्यक्ष प्रमाण है ।

न्यायबोधिनी

घटपटजनकत्वात् । करणलक्षणेऽसाधारणत्वविशेषणानुपादाने ईश्वरादृष्टादेरपि व्यापारवत्कारणत्वस्य सत्त्वात् तत्रातिव्याप्तिवारणायासाधारणेति विशेषणम् ।

षड्विधेन्द्रियभूतप्रत्यक्षप्रमाणस्य लक्षणमाह—तत्रेति । प्रमाभूतेषु प्रत्यक्षात्मकं यज्ज्ञानं चाक्षुषादिप्रत्यक्षं, तत्प्रति व्यापारवदसाधारणं कारणमिन्द्रियं भवति । अतः प्रत्यक्षज्ञानकरणत्वं प्रत्यक्षस्य लक्षणम् । आद्यसन्निकर्षातिरिक्तचतुर्विधसन्निकर्षाणां समवायरूपत्वेनेन्द्रियजन्यत्वाभावाद् व्यापारत्वं न संभवतीति इन्द्रियमनःसंयोगस्यैव बाह्यप्रत्यक्षे जननीये इन्द्रियव्यापारता बोध्या । मानसप्रत्यक्षे त्वात्ममनःसंयोगस्यैव सा बोध्या ।

हिन्दी-कला

का जनक होने से चक्रभ्रमि आदि व्यापार कहे जाते है । इसी प्रकार कपालसंयोग और तन्तुसंयोग आदि भी कपाल और तन्तु के व्यापार हैं । क्योंकि उक्त संयोग कपाल-तन्तु से उत्पन्न होते हुए कपाल-तन्तु के कार्य घट-पट के जनक भी हैं । करण-लक्षण में 'असाधारणत्व' विशेषण यदि न दिया जाय तो करण-लक्षण की अतिव्याप्ति ईश्वर अदृष्ट आदि साधारणकारण में हो जायगी । क्योंकि ईश्वरादि में भी व्यापारवत्कारणत्व है । ईश्वर-अदृष्ट आदि जगत् के समस्त कार्य के प्रति साधारण कारण हैं ।

न्यायमत में चक्षु आदि षड्विध इन्द्रियाँ 'प्रत्यक्षप्रमाण' पद से कही जाती हैं । क्योंकि प्रमा का करण प्रमाण है । चतुर्विध प्रमा के अन्तर्गत प्रत्यक्षात्मक जो ज्ञान चाक्षुष-रासन आदि प्रत्यक्ष हैं, उनके प्रति व्यापारवान् असाधारण कारण इन्द्रियाँ ही हैं । अत: प्रत्यक्षज्ञानकरणत्वरूप प्रत्यक्षप्रमाण का लक्षण इन्द्रियों में घटित हो गया ।

इन्द्रिय का व्यापार क्या है ? इसे स्पष्ट करते हैं—प्रत्यक्ष में षड्विध संनिकर्ष कारण होते हैं, इसे आगे बतायेंगे । उनमें आदि सन्निकर्ष जो संयोग है, उससे अतिरिक्त चार सन्निकर्ष समवायरूप होने से इन्द्रियजन्य नहीं होने से व्यापार नहीं बन सकते, अत: इन्द्रिय-मन का संयोग ही बाह्य प्रत्यक्ष को उत्पन्न करने में व्यापार है । मानसप्रत्यक्ष के प्रति तो आत्ममन का संयोग ही व्यापार होता है । ऐसा जानना चाहिये ।

In Public domain. Digitization Muthulakshmi Research Academy

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् [ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् ।]

तद् द्विविधम्—निर्विकल्पकं सविकल्पकञ्चेति । तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् ।

इन्द्रिय और अर्थ (विषय) के सयोग से उत्पन्न ज्ञान प्रत्यक्ष प्रमा है। [अथवा ज्ञान जिस ज्ञान में करण न हो, वह ज्ञान प्रत्यक्ष प्रमा है। प्रत्यक्ष प्रमा में इन्द्रियाँ करण होती हैं ज्ञान नहीं।] वह दो प्रकार का होता है—सविकल्पक प्रत्यक्ष और निर्विकल्पक प्रत्यक्ष।

उन दोनों प्रकार के प्रत्यक्षों में प्रकारता से शून्य ज्ञान को निर्विकल्पक प्रत्यक्ष कहते हैं। जैसे, अन्धकार में अस्पष्ट दिखाई पड़ने वाला "यह कुछ है" ऐसा ज्ञान निर्विकल्पक प्रत्यक्ष है।

न्यायबोधिनी

प्रत्यक्षप्रमाणलक्षणमुक्त्वा प्रत्यक्षप्रमालक्षणमाह–इन्द्रियार्थसन्निकर्षेति। जन्यप्रत्यक्षस्यैव लक्ष्यत्वमित्यभिप्रायेणेदं लक्षणम्। ज्ञानाकरणकमिति। क्षेपकं लक्षणमिदम्। ज्ञानं=व्याप्तिज्ञानं सादृश्यज्ञानं पदज्ञानं च, तदेव करणं येषां तानि ज्ञानकरणकानि, अनुमित्युपमितिशाब्दानि, तद्भिन्नं ज्ञानाकरणकं यज्ज्ञानं तत्त्वम् प्रत्यक्षप्रमाया लक्षणम्। प्रत्यक्षे इन्द्रियाणामेव करणत्वात् न तु ज्ञानस्य करणत्वमिति समन्वयः। इदं लक्षणमीश्वरप्रत्यक्षसाधारणम्, ईश्वरप्रत्यक्षस्य ज्ञानाकरणकत्वात्।

प्रत्यक्षं विभजते–निर्विकल्पकमिति। तल्लक्षयति–तत्र निष्प्रकारकमिति।

हिन्दी-कला

प्रत्यक्षप्रमाण का लक्षण कहने के बाद अब प्रत्यक्षप्रमा का लक्षण मूलकार बताते हैं—इन्द्रिय और अर्थ के सन्निकर्ष से उत्पन्न ज्ञान प्रत्यक्षप्रमा है। इस लक्षण का लक्ष्य जन्यप्रत्यक्ष ही हो सकता है, ईश्वरप्रत्यक्ष छूट जायगा। अतः जन्य-नित्य उभय-साधारण लक्षण करते हैं—ज्ञानाकरणक ज्ञान प्रत्यक्ष है। अर्थात् जिस ज्ञान में कोई ज्ञान करण नहीं होता हो, वह ज्ञान प्रत्यक्ष है। जैसे अनुमिति में व्याप्तिज्ञान करण होता है, उपमिति में सादृश्यज्ञान करण होता है तथा शाब्दबोध में पदज्ञान करण होता है। इसलिए उक्त तीनों ज्ञान ज्ञानकरणक हुए। अतः इनसे भिन्न जो ज्ञानाकरणक ज्ञान, तादृशज्ञानत्व ही प्रत्यक्षप्रमा का लक्षण है। प्रत्यक्ष के प्रति इन्द्रिय ही करण होता है, न कि कोई ज्ञान। अतः यह लक्षण प्रत्यक्ष में समन्वित है। जन्यत्व-विशेषणघटित नहीं होने से यह ज्ञानाकरणक-ज्ञानत्वरूप लक्षण ईश्वरप्रत्यक्ष में भी संगत हो जाता है। क्योंकि ईश्वरप्रत्यक्ष भी ज्ञानाकरणक है।

निर्विकल्पक प्रत्यक्ष और सविकल्पक प्रत्यक्ष के भेद से प्रत्यक्ष ज्ञान दो प्रकार का

In Public domain. Digitization Muthulakshmi Research Academy

सप्रकारकं ज्ञानं सविकल्पकम् । यथा डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति ।

प्रकारता से युक्त ज्ञान सविकल्पक प्रत्यक्ष है । जैसे, यह डित्थ है, यह ब्राह्मण है, यह श्याम है--इत्यादि ज्ञान सविकल्पक प्रत्यक्ष है । क्योंकि यहाँ डित्थत्व-ब्राह्मणत्व-श्यामत्वरूप प्रकार (विशेषण) भासित हो रहा है ।

न्यायबोधिनी

प्रकारताशून्यज्ञानत्वमेव निर्विकल्पकत्वमित्यर्थः । निर्विकल्पके चतुर्थी विषयता स्वीक्रियते न तु त्रिविधविषयतामध्ये कापि तत्रास्ति । अतो विशेष्यता-शून्यज्ञानत्वं, संसर्गताशून्यज्ञानत्वमित्यपि लक्षणं संभवति ।

सविकल्पकं लक्षयति - सप्रकारकमिति । विषयताया ज्ञाननिरूपितत्वात् ज्ञानस्य विषयतानिरूपकत्वेन प्रकारतानिरूपकज्ञानत्वं सविकल्पकस्य लक्षणम् ।

एवं विशेष्यतानिरूपकज्ञानत्वमित्यपि लक्षणं सम्भवति । उदाहरणम्-यथेति । इदन्त्वावच्छिन्नविशेष्यतानिरूपितडित्थत्वप्रकारताशालिज्ञानम्, इदन्त्वावच्छिन्नविशेष्यतानिरूपितब्राह्मणत्वप्रकारताशालिज्ञानं च सविकल्पकमित्यर्थः ।

हिन्दी-कला

होता है । इनमें निष्प्रकारक ज्ञान निर्विकल्पक है । अर्थात् प्रकारताशून्यज्ञानत्व निर्विकल्पकत्व है । सविकल्पक ज्ञान में तीन तरह की विषयता होती है—प्रकारताख्य विषयता, विशेष्यताख्य विषयता और संसर्गताख्य विषयता । किन्तु निर्विकल्पक ज्ञान में इन तीनों में कोई भी विषयता नहीं होने से एक विलक्षण चतुर्थी विषयता रहती है । इसीलिए प्रकारताशून्यज्ञानत्व जैसे निर्विकल्पक का लक्षण है, वैसे विशेष्यता-शून्यज्ञानत्व तथा संसर्गताशून्यज्ञानत्व भी लक्षण हो सकता है । जैसे—परस्पर प्रकार-विशेष्यभावरहित 'घटघटत्वे' ऐसा ज्ञान निर्विकल्पक प्रत्यक्ष है ।

सप्रकारक ज्ञान सविकल्पक प्रत्यक्ष है । घटादि विषय में रहनेवाली विषयता ज्ञान से निरूपित होती है और ज्ञान उस विषयता का निरूपक होता है, प्रकारता-निरूपक ज्ञानत्व सविकल्पक का लक्षण है । अर्थात् प्रकारताख्यविषयतानिरूपक ज्ञानत्व सविकल्पक ज्ञान का लक्षण है । ऐसे ही विशेष्यताख्यविषयतानिरूपक ज्ञानत्व तथा संसर्गताख्यविषयतानिरूपक ज्ञानत्व भी सविकल्पक का लक्षण हो सकता है । क्योंकि सविकल्पक ज्ञान में उक्त तीनों प्रकार की विषयता होती है । सविकल्पक का उदाहरण 'डित्थोऽयम्', 'ब्राह्मणोऽयम्' इत्यादि ज्ञान है । यहाँ इदन्त्वावच्छिन्ना जो विशेष्यता डित्थ तथा ब्राह्मणनिष्ठा है, उससे निरूपिता डित्थत्व

In Public domain. Digitization Muthulakshmi Research Academy

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायो, विशेषणविशेष्यभावश्चेति ।

चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः ।

घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपस्य समवायात् ।

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपं समवेतं, तत्र रूपत्वस्य समवायात् ।

प्रत्यक्षज्ञान का हेतुभूत इन्द्रिय और अर्थ का सन्निकर्ष छै प्रकार का होता है—संयोग, संयुक्तसमवाय, संयुक्तसमवेतसमवाय, समवाय, समवेतसमवाय और विशेषण-विशेष्यभाव ।

चक्षुः इन्द्रिय से घट का प्रत्यक्ष करने में संयोग संनिकर्ष कारण होता है ।

चक्षुः इन्द्रिय से घट के रूप का प्रत्यक्ष करने में संयुक्तसमवाय संनिकर्ष कारण होता है । क्योंकि चक्षु से संयुक्त घट में रूप समवायसम्वन्ध से है ।

चक्षुः से घटरूपगत रूपत्वसामान्य (जाति) का प्रत्यक्ष करने में संयुक्तसमवेत-समवायसम्वन्ध कारण है । क्योंकि चक्षुःसंयुक्त घट में रूप समवेत है और उस रूप में रूपत्वका समवाय है। अर्थात् रूप में रूपत्व समवायसम्बन्ध से रहता है ।

न्यायबोधिनी

चाक्षुषादिषड्विधप्रत्यक्षकारणीभूतान् षड्विधसन्निकर्षान्विभजते—संयोग इत्यादि । द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयोगस्य कारणत्वम् । द्रव्यसमवेतवृत्तिलौकिकविषयतासम्ब धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवायस्य हेतुत्वम् । द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवेतसमवायस्य हेतुत्वम् ।

हिन्दी-कला

और ब्राह्मणत्वनिष्ठा प्रकारता है, अतः तादृशप्रकारताशाली होने के कारण उक्त ज्ञान सविकल्पक है ।

चाक्षुष रासन घ्राणज आदि छै प्रकार के प्रत्यक्षों के कारणभूत छै प्रकार के सन्निकर्षो का विभाजन मूल में करते हैं—संयोग, संयुक्तसमवाय आदि । इनमें द्रव्य-वृत्तिलौकिकविषयतासम्बन्ध से होनेवाले चाक्षुष प्रत्यक्ष के प्रति अर्थात् द्रव्यविषयक लौकिक चाक्षुष-प्रत्यक्ष के प्रति चक्षुःसंयोगरूप सन्निकर्ष कारण होता है। एवं द्रव्य में

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

द्रव्यग्राहकाणीन्द्रियाणि चक्षुस्त्वङ्मनांसि त्रीण्येव, अन्यानि घ्राणरसनश्रवणानि गुणग्राहकाणि। अतस्त्वगिन्द्रियस्थले द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन त्वाचप्रत्यक्षत्वावच्छिन्नं प्रति त्वक्संयोगस्य हेतुता। एवं द्रव्यसमवेतत्वाचप्रत्यक्षत्वावच्छिन्नं प्रति त्वक्संयुक्तसमवायस्य हेतुता। द्रव्यसमवेतसमवेतोष्णत्वशीतत्वादिजातिस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायस्य हेतुता। एवमात्ममानसप्रत्यक्षे मनःसंयोगस्य हेतुता। आत्मसमवेतसुखादिमानसप्रत्यक्षे मनःसंयुक्तसमवायस्य हेतुता। आत्मसमवेतसमवेतसुखत्वादिमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायस्य हेतुता। रसनघ्राणयोस्तु रसगन्धतद्गतजातिग्राहकत्वेन द्वितीयतृतीययोः सन्निकर्षयोरेव तत्र हेतुता वाच्या।

हिन्दी-कला

जो समवेत रूपादि, उसमें रहनेवाली जो लौकिकविषयता उस सम्बन्ध से होनेवाले चाक्षुष-प्रत्यक्ष के प्रति अर्थात् द्रव्यसमवेतरूपादिविषयक लौकिक चाक्षुषप्रत्यक्ष के प्रति चक्षुःसंयुक्तसमवायनामक सन्निकर्ष हेतु होता है। ऐसे ही द्रव्यसमवेत रूपादि, उसमें समवेत रूपत्वादि में रहनेवाली जो लौकिकविषयता, उस सम्बन्ध से होनेवाले चाक्षुष के प्रति अर्थात् रूपत्वादिविषयक लौकिक चाक्षुष-प्रत्यक्ष के प्रति चक्षुःसमवेतसमवाय सन्निकर्ष हेतु होता है।

द्रव्य का ग्रहण कराने वाली तीन ही इन्द्रियाँ होती हैं—चक्षुः त्वक् और मन। शेष तीन इन्द्रियाँ---घ्राण रसना और श्रोत्र तो गुणका ग्रहण कराती हैं द्रव्य का नहीं। अतः चक्षुः के समान त्वगिन्द्रिय-स्थल में भी द्रव्यविषयक लौकिक त्वाचप्रत्यक्ष के प्रति त्वक्संयोग कारण है। तथा द्रव्यसमवेत जो स्पर्शादि गुण, तद्विषयक लौकिक त्वाच-प्रत्यक्ष के प्रति त्वक्संयुक्तसमवाय सन्निकर्ष कारण होता है। इसी प्रकार द्रव्यसमवेत जो स्पर्शादि, उसमें समवेत जो शीतलत्वादि जाति, उसके लौकिक त्वाच-प्रत्यक्ष के प्रति त्वक्संयुक्तसमवेतसमवायनामक सन्निकर्ष कारण होता है।

इसी प्रकार आत्मविषयक मानस प्रत्यक्ष के प्रति आत्मा के साथ मन का संयोग हेतु होता है। तथा आत्मसमवेतसुखादि के मानस प्रत्यक्ष के प्रति मनःसंयुक्तसमवाय हेतु होता है। तथा आत्म-समवेतसुखादिसमवेतसुखत्वादि जाति के मानस प्रत्यक्ष के प्रति मनःसंयुक्तसमवेतसमवायनामक सन्निकर्ष हेतु होता है।

रसनेन्द्रिय और घ्राणेन्द्रिय तो रस और गन्ध गुण का तथा तद्गत रसत्वगन्धत्वादि जाति की ही ग्राहिका होती हैं, अतः वहाँ संयोग-सन्निकर्ष को छोड़कर संयुक्तसमवाय एवं संयुक्तसमवेतसमवायनामक द्वितीय और तृतीय सन्निकर्ष ही कारण होते हैं।

In Public domain. Digitization Muthulakshmi Research Academy

श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः, कर्णविवरवर्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वाद् गुणगुणिनोश्च समवायात् ।

शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः, श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।

अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः, घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।

श्रोत्रद्वारा शब्द का प्रत्यक्ष करने में समवाय सन्निकर्ष कारण होता है। क्योंकि कान के विवर (बिल) में वर्तमान आकाश ही श्रोत्र है और शब्द आकाश का गुण है तथा गुण और गुणी में समवायसम्बन्ध होता है।

शब्दगत-शब्दत्व जाति के साक्षात्कार (प्रत्यक्ष) में समवेतसमवाय सन्निकर्ष कारण है। क्योंकि श्रोत्ररूप आकाश में शब्द समवेत है और उस शब्द में शब्दत्व समवेत है। अर्थात् आकाश में शब्द का और शब्द में शब्दत्व का समवाय है।

अभाव के प्रत्यक्ष में विशेषणविशेष्यभाव सन्निकर्ष कारण होता है। क्योंकि "घटाभाववद् भूतलम्" इस ज्ञान में चक्षु:संयुक्त भूतल में घटाभाव विशेषण है।

न्यायबोधिनी

श्रवणेन्द्रियस्याकाशरूपत्वेन शब्दस्याकाशगुणत्वेन श्रवणेन्द्रियेण समं समवायः सन्निकर्षः। शब्दवृत्तिशब्दत्वकत्वखत्वादिजातिविषयकश्रावणप्रत्यक्षे समवेतसमवायस्य हेतुता च बोध्या।

अभावप्रत्यक्ष इति। अभावप्रत्यक्षे विशेषणविशेष्यभावो नाम विशेषणतासन्निकर्षः। पञ्चविधसन्निकर्षेषु मध्ये संयोगस्थाने संयुक्तपदं समवायस्थाने समवेतपदं च घटयित्वा अभावस्थले निर्वाह्यम्। तथाहि—द्रव्याधिकरणका-

हिन्दी-कला

शब्द के साथ श्रवणेन्द्रिय का संयोग सम्बन्ध नहीं हो सकता है। क्योंकि श्रवणेन्द्रिय आकाशरूप है, और शब्द आकाश का गुण है। इसलिये शब्द और श्रवणेन्द्रिय में गुणगुणिभाव होने के कारण श्रवणेन्द्रिय के साथ शब्द का समवाय सन्निकर्ष होगा। अत: शब्द के प्रत्यक्ष में समवायसन्निकर्ष कारण होता है। एवं शब्द में रहने वाली शब्दत्व-कत्व-खत्व आदि जातियों के श्रावण-प्रत्यक्ष में समवेतसमवायसन्निकर्ष को हेतु जानना चाहिये।

अभाव के प्रत्यक्ष में विशेषणविशेष्यभाव नामक विशेषणतासन्निकर्ष कारण होता है। पूर्वोक्त पाँच प्रकार के सन्निकर्षों में आये संयोग के स्थान में 'संयुक्त' पद देकर तथा समवाय के स्थान में 'समवेत' देकर अभावस्थल के सन्निकर्षों का निरूपण

In Public domain. Digitization Muthulakshmi Research Academy

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं, तत्करणमिन्द्रियम् । तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।

इस प्रकार उक्त षड्विध सन्निकर्षों से उत्पन्न ज्ञान प्रत्यक्ष-प्रमा है और उसका करण इन्द्रिय है । अतः इन्द्रियाँ प्रत्यक्षज्ञान का करण होने से प्रत्यक्षप्रमाण हैं, यह सिद्ध हुआ ।

॥ इति प्रत्यक्षपरिच्छेदः ॥

न्यायबोधिनी

भावप्रत्यक्षे इन्द्रियसंयुक्तविशेषणता । द्रव्यसमवेताधिकरणकाभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतविशेषणता, द्रव्यसमवेतसमवेताधिकरणकाभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता च सन्निकर्षः । तत्र घटे पटत्वाभावः संयुक्तविशेषणतया गृह्यते । घटसमवेतघटत्वादौ पृथिवीत्वाभावः संयुक्त-समवेतविशेषणतया गृह्यते । घटसमवेतसमवेतरूपत्वादौ नीलत्वाभावश्च संयुक्तसमवेतसमवेतविशेषणतया गृह्यत इति संक्षेपः ।

हिन्दी-कला

करना चाहिये । जैसे—द्रव्यस्वरूप अधिकरण में यदि किसी अभाव का प्रत्यक्ष करना हो तो वहाँ इन्द्रियसंयुक्तविशेषणता सन्निकर्ष हेतु होगा । वहाँ इन्द्रियसंयुक्त वह द्रव्य होगा और उसमें अभाव विशेषण होगा । इस प्रकार द्रव्य में अभाव का प्रत्यक्ष इन्द्रियसंयुक्तविशेषणता सन्निकर्ष से होता है । इसी प्रकार द्रव्यसमवेत रूपादि में अभाव का प्रत्यक्ष करना हो तो वहाँ इन्द्रियसंयुक्तसमवेतविशेषणता सन्निकर्ष कारण होगा । यहाँ भी इन्द्रियसंयुक्त द्रव्य, उसमें समवेतरूपादि गुण, उसमें समवेत-रूपत्वादि जाति और उसमें विशेषणीभूत अभाव घटाभाव आदि है । इस प्रकार रूपत्वादि में घटाभावादि का प्रत्यक्ष इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता सन्निकर्ष से होता है ।

अभाव-प्रत्यक्ष में विशेषणता-सन्निकर्ष की कारणता का उदाहरण न्यायबोधिनी-कार स्वयं देते है—घट में पटत्वाभाव का प्रत्यक्ष संयुक्तविशेषणता सन्निकर्ष से होता है । घटसमवेत घटत्व में पृथिवीत्वाभाव का प्रत्यक्ष संयुक्तसमवेतविशेषणता सन्निकर्ष से होता है । तथा घटसमवेत (रूप) में समवेत जो रूपत्वादि, उसमें नीलत्वाभाव का प्रत्यक्ष सयुक्तसमवेत-समवेत-विशेषणता सन्निकर्ष से होता है । यही षड्विध सन्निकर्षों का संक्षिप्त स्वरूप है ।

इति तर्कसंग्रहन्यायबोधिन्याः 'हिन्दी-कला' व्याख्यायां प्रत्यक्षपरिच्छेदः ।

—:※:—

In Public domain. Digitization Muthulakshmi Research Academy

अथानुमानपरिच्छेदः

अनुमितिकरणमनुमानम् ।

परामर्शजन्यं ज्ञानमनुमितिः ।

अनुमिति के करण (असाधारण कारण) को 'अनुमान' कहते हैं ।
परामर्श से जन्य (उत्पन्न) ज्ञान को 'अनुमिति' कहते हैं ।

न्यायबोधिनी

अनुमानं लक्षयति–अनुमितीति । अनुमितौ व्याप्तिज्ञानं करणं, परामर्शो व्यापारः, अनुमितिः फलं कार्यमित्यर्थः । परामर्शस्य व्याप्तिज्ञानजन्यत्वे सति व्याप्तिज्ञानजन्यानुमितिजनकत्वात्तज्जन्यत्वे सति तज्जन्यजनकत्वरूप-व्यापारत्वमुपपन्नम् । अनुमितिकरणत्वमनुमानस्य लक्षणम् । अनुमानं व्याप्तिज्ञानम् । एतस्य परामर्शरूपव्यापारद्वारा अनुमितिं प्रत्यसाधारणका-रणतयाऽमितिकरणत्वमुपपन्नम् ।

परामर्शजन्यमिति । परामर्शजन्यत्वविशिष्टज्ञानत्वमनुमितेर्लक्षणम् । अत्र ज्ञानत्वमात्रोपादाने प्रत्यक्षादावतिव्याप्तिः, अतस्तद्वारणाय परामर्श-जन्यत्वे सतीति विशेषणोपदानम् । परामर्शजन्यत्वमात्रोक्तौ परामर्शध्वंसे-

हिन्दी-कला

अनुमिति के प्रति जो करण है, वह अनुमान प्रमाण है । अनुमिति में व्याप्ति-ज्ञान करण होता है, परामर्श व्यापार है और अनुमितिरूप फल कार्य है । परामर्श व्याप्तिज्ञान रूप करण से जन्य होता हुआ व्याप्तिज्ञान से जन्य अनुमिति का जनक भी होता है । इसलिये 'तज्जन्यत्वे सति तज्जन्यजनकत्वरूप' व्यापार का लक्षण परामर्श में समन्वित हो जाता है । मूल में "अनुमितिकरणत्व" अनुमान का लक्षण कहा गया है । यहां व्याप्तिज्ञान ही अनुमान है । यह व्याप्तिज्ञान परामर्शरूप व्यापार द्वारा अनुमिति के प्रति असाधारण कारण होने से अनुमितिका करण बन गया ।

परामर्शजन्य ज्ञान अनुमिति है । अतः 'परामर्शजन्यत्वविशिष्टज्ञानत्व' अनुमिति का लक्षण हुआ । यहाँ यदि ज्ञानत्वमात्र को अनुमिति का लक्षण माना जाय तो प्रत्यक्ष-ज्ञान में अनुमितिलक्षण की अतिव्याप्ति हो जायगी । अतः अतिव्याप्ति के निवारण के लिये 'परामर्शजन्त्व' विशेषण दिया । प्रत्यक्ष में परामर्शजन्यत्व नहीं होने से अति-व्याप्ति नहीं हुई । एवं यदि 'परामर्शजन्यत्वमात्र' लक्षण माना जाय तो परामर्शःवंस में अतिव्याति हो जायगी, क्योंकि परामर्श का ध्वंस भी परामर्शजन्य होता है । अतः

In Public domain. Digitization Muthulakshmi Research Academy

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः।

व्याप्ति से विशिष्ट (युक्त) पक्षधर्मताज्ञान परामर्श कहाता है। जैसे, 'वह्निव्याप्यधूमवानयं पर्वतः' यह ज्ञान परामर्श है। यहाँ 'वह्निव्याप्य' इससे व्याप्ति विशिष्ट का ज्ञान सूचित हुआ तथा 'धूमवानयं पर्वतः' इससे पक्षधर्मता का ज्ञान सूचित हुआ। अतः यह ज्ञान परामर्श है। इससे उत्पन्न "पर्वतो वह्निमान्" यह ज्ञान अनुमिति है।

न्यायबोधिनी

ऽतिव्याप्तिरतस्तद्वारणाय ज्ञानत्वोपादानम्।

अनुमितिलक्षणघटकीभूतपरामर्शलक्षणमाचष्टे-व्यातिविशिष्टेति। व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानमिति कर्मधारयः। अत्र विशिष्टपदस्य प्रकारतानिरूपकपरत्वात्पक्षधर्मताया ज्ञानमित्यत्र षष्ठ्या विषयत्वबोधनात् धर्मतापदस्य सम्बन्धार्थकत्वात् कर्मधारयसमासेन समस्यमानपदार्थयोरभेदसंसर्गलाभाच्च व्याप्तिप्रकारकाभिन्नं यत्पक्षसम्बन्धिविषयकं ज्ञानं, तत्परामर्श इति लभ्यते। एवं सति धूमो वह्निव्याप्यः आलोकवान्पर्वतः इत्या-

हिन्दी-कला

उस अतिव्याप्ति के वारण के लिये 'ज्ञानत्व' पद दिया। ध्वंस में ज्ञानत्व नहीं होने से अतिव्याप्ति नहीं हुई।

अनुमिति लक्षण के अन्तर्गत समाविष्ट परामर्श का लक्षण मूलकार कहते हैं—व्याप्तिविशिष्ट जो पक्षधर्मताज्ञान, वह परामर्श है। मूलोक्त लक्षणवाक्य में "व्याप्तिविशिष्टं च तत् पक्षधर्मताज्ञानं च व्याप्तिविशिष्टपक्षधर्मताज्ञानम्" ऐसा कर्मधारयसमास है। यहाँ 'विशिष्ट' यह पद "प्रकारतानिरूपक" इस अर्थ में है। एवं "पक्षधर्मताया ज्ञानं पक्षधर्मताज्ञानम्" इस षष्ठीसमास में षष्ठी विभक्ति से विषयत्व सूचित होता है। इससे 'पक्षधर्मताविषयक ज्ञान' यह अर्थ हुआ। पक्षधर्मता में भी 'धर्मता' पद सम्बन्ध अर्थ में है। एवं कर्मधारयसमास में समस्यमान पदार्थों में अभेदसंसर्ग का लाभ होता है। अतः "व्याप्तिविशिष्टपक्षधर्मताज्ञानम्" इस मूल लक्षण से यह निष्कर्ष निकलता है—व्याप्तिप्रकारकाभिन्न जो पक्षसम्बन्धि-(हेतु) विषयक ज्ञान, वह परामर्श है। अर्थात् व्याप्तिप्रकारक-पक्षसम्बन्धिहेतुविशेष्यक-ज्ञान परामर्श है।

किन्तु ऐसा लक्षण करने पर "धूमो वह्निव्याप्यः, आलोकवान् पर्वतः" इस प्रकार के समूहालम्बन ज्ञान में भी परामर्श का उक्त लक्षण चला जाता है और लक्षण की

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

कारकसमूहालम्बनेऽप्युक्तपरामर्शलक्षणमस्तीत्यतिव्याप्तिस्तद्वारणाय पक्षनिष्ठविशेष्यतानिरूपिता या हेतुनिष्ठा प्रकारता, तन्निरूपिता या व्याप्तिनिष्ठा प्रकारता, तच्छालिज्ञानं परामर्शं इति निष्कर्षः। एतादृशपरामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणम्।

अनुमितिपरामर्शयोर्विशिष्य कार्यकारणभावश्चेत्थम्—पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रति, वह्नित्वावच्छिन्नप्रकारतानिरूपितव्याप्तित्वाच्छिन्नप्रकारतानिरूपिता या धूमत्वाच्छिन्नप्रकारता तन्निरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिर्णयः कारणम्। वह्नित्वावच्छिन्नप्रकारतानिरूपितव्याप्तित्वावच्छिन्नविशेष्यतायाः धूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तित्वावच्छिन्नप्रकारतायाश्चाभेदानङ्गीकर्तृमते वह्नित्वावच्छिन्नप्रकारतानिरू-

हिन्दी-कला

अलक्ष्य में अतिव्याप्ति हो जाती है। क्योंकि यहाँ भी व्याप्ति का प्रकारविधया भान होता है और पक्षसम्बन्धी (आलोक) का विषयविधया भान हो रहा है। अतः इस अतिव्याप्तिदोष के निवारणार्थ न्यायबोधिनीकार उक्त लक्षण का परिष्कृत स्वरूप बताते हैं—पक्षनिष्ठविशेष्यतानिरूपिता जो हेतुनिष्ठा प्रकारता, और इस हेतुनिष्ठप्रकारता से निरूपिता जो व्याप्तिनिष्ठा प्रकारता, उस प्रकारतावाला ज्ञान परामर्श है। विशेष विवरण 'संस्कृत-कला' में द्रष्टव्य है। अतः "एवंविधपरामर्शजन्यत्वे सति ज्ञानत्वम्" यह अनुमितिलक्षण बना। यह अनुमिति और परामर्श का सामान्य कार्यकारणभाव प्रदर्शित हुआ। किन्तु विशेष कार्यकारणभाव यों होगा—

पर्वतत्वावच्छिन्ना जो पर्वतनिष्ठा उद्देश्यता, उससे निरूपिता जो संयोगसम्बन्धावच्छिन्ना एवं वह्नित्वधर्मावच्छिन्ना वह्निनिष्ठा विधेयता, तादृशविधेयताक अनुमितित्वावच्छिन्न (अनुमिति) के प्रति—वह्नित्वावच्छिन्ना जो वह्निनिष्ठा प्रकारता, उससे निरूपिता जो व्याप्तित्वावच्छिन्ना व्याप्तिनिष्ठा प्रकारता, उससे निरूपिता जो धूमत्वावच्छिन्ना धूमनिष्ठा प्रकारता, उससे निरूपिता जो पर्वतत्वावच्छिन्ना पर्वतनिष्ठा विशेष्यता, तादृशविशेष्यताशाली निश्चय कारण है। यह परिष्कार जगदीश भट्टाचार्य के मतानुसार है, जो एक में रहने वाली प्रकारता और विशेष्यता में अभेद मानते हैं। इसीलिये उक्त कार्यकारणभाव में सर्वत्र प्रकारतानिरूपिता प्रकारता ही कहते हैं। केवल पर्वत में ही प्रकारतानिरूपिता विशेष्यता का कथन करते हैं; क्योंकि पर्वत किसी के प्रति प्रकार नहीं होता है।

किन्तु गदाधर भट्टाचार्य प्रकारता और विशेष्यता में अभेद न मानकर अवच्छेद्या-

In Public domain. Digitization Muthulakshmi Research Academy

यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः । व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।

"जहाँ-जहाँ धूम है, वहाँ-वहाँ अग्नि है" इस प्रकार के हेतु और साध्य के साहचर्यनियम को (नियत साहचर्य को) व्याप्ति कहते हैं ।

व्याप्य की (वह्निव्याप्ति विशिष्ट धूम आदि की) पर्वतादि पक्ष में वृत्तिता (रहना) को पक्षधर्मता कहते हैं ।

न्यायबोधिनी

पितविशेष्यत्वावच्छिन्नव्याप्तित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नधूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयः कारणमिति वाच्यम् । स च निर्णयः वह्निव्याप्यधूमवान्पर्वत इत्याकारको बोध्यः ।

यत्र यत्रेति । यत्र पदवीप्सा धूमाधिकरणे यावति वह्निमत्त्वलाभाय । यावत्पदमहिम्ना वह्नेर्धूमव्यापकत्वं लब्धम् । तदेव स्पष्टयति—साहचर्यनियम इति । एतदर्थस्तु नियतसाहचर्यं व्याप्तिरिति । नियतत्वं व्यापक-

हिन्दी-कला

वच्छेदकभाव मानते हैं । इनके मतानुसार जो व्याप्ति वह्नि के प्रति विशेष्य है, वही व्याप्ति धूम के प्रति प्रकार है, फिर भी व्याप्ति में रहने वाली विशेष्यता और प्रकारता भिन्न-भिन्न है । इसीलिये व्याप्तिनिष्ठा विशेष्यता- व्याप्तिनिष्ठ प्रकारता का अवच्छेदकरूप में भासित होगी, न कि अभिन्नरूप में । अतः गदाधर भट्टाचार्य के मतानुसार "वह्निव्याप्य-धूमवान् पर्वतः" इस परामर्शात्मक निश्चयज्ञान का स्वरूप यों हुआ—

वह्नित्वावच्छिन्नवह्निनिष्ठप्रकारतानिरूपिता जो व्याप्तिनिष्ठा विशेष्यता, तादृशविशेष्यत्वावच्छिन्ना एवं व्याप्तित्वावच्छिन्ना जो व्याप्तिनिष्ठा प्रकारता, तादृशप्रकारतानिरूपिता जो धूमनिष्ठा विशेष्यता, तादृशविशेष्यत्वावच्छिन्ना एवं धूमत्वावच्छिन्ना जो धूमगत प्रकारता, तादृशप्रकारतानिरूपिता जो पर्वतत्वावच्छिन्ना विशेष्यता, तादृशविशेष्यताशाली निश्चय 'पर्वतो वह्निमान्' इस पर्वतोद्देश्यक वह्नि-विधेयक अनुमिति के प्रति कारण है । विशेष विवेचन 'संस्कृत-कला' में द्रष्टव्य है ।

"यत्र-यत्र धूमस्तत्र तत्राग्निः" इस प्रकार का साहचर्यनियम व्याप्तिपद का अर्थ है । यहाँ 'यत्र' पद की द्विरुक्ति से यावत् धूमाधिकरण में (अर्थात् जितने धूमाधिकरण हैं, सब में) वह्निमत्ता का लाभ होता है । इस प्रकार यावत्पद की महिमा से वह्नि में धूम की व्यापकता प्रतीत होती है । इसी बात का स्पष्टीकरण 'साहचर्य-नियम' पद से मूलकार ने किया है । अर्थात् धूमपदोपलक्षित हेतु और वह्निपदोपलक्षित साध्य का नियतसाहचर्य ही व्याप्ति है । नियतत्व का अर्थ है 'व्यापक त्व

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

त्वम् । साहचर्यं (नाम) सामानाधिकरण्यम् । तथा च धूमनियतवन्हिसामानाधिकरण्यं व्याप्तिरित्यर्थः । अत्र वन्हेर्धूमव्यापकत्वं नाम धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् । तथाहि धूमाधिकरणे पर्वतचत्वरमहानसादौ वर्तमानो योऽभावः, घटत्वाद्यवच्छिन्नप्रतियोगिताकः, न तु वह्नित्वावच्छिन्नप्रतियोगिताकाभावः, कुत ? पर्वतादौ वह्नेः सत्त्वात् । एवं सति धूमाधिकरणे पर्वतचत्वरादौ वर्तमानस्य घटाद्यभावस्य प्रतियोगितावच्छेदकं घटत्वादिकमनवच्छेदकं वह्नित्वं, तद्वत्त्वं वह्नौ वर्ततेऽतो धूमव्यापकत्वं वह्नौ वर्तते । तथा च धूमव्यापकवह्निसामानाधिकरण्यं व्याप्तिरिति फलितमिति । इयमन्वयव्याप्तिः सिद्धान्तानुसारेण ।

पूर्वपक्षव्याप्तिस्तु साध्याभाववदवृत्तित्वम् । साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताक–प्रतियोगितावच्छेदकसम्बन्धा-

हिन्दी-कला

तथा साहचर्य का अर्थ है 'सामानाधिकरण्य' (एक अधिकरण में रहना)। अतः 'नियतसाहचर्य' पद से धूमनियत (व्यापकीभूत) वह्नि के साथ धूम का सामानाधिकरण्य अर्थात् एक अधिकरण में रहना व्याप्ति है ।

वह्नि में धूम की व्यापकता क्या है, इसे न्यायबोधिनीकार बताते हैं—"धूमसमानाधिकरण जो अत्यन्ताभाव, उसकी प्रतियोगिता का अनवच्छेदक जो धर्म, तादृशधर्मवता (तादृश धर्मवाला होना)" यही धूम की वह्नि में व्यापकता है । अर्थात् धूमाधिकरण पर्वत-चत्वर-(चौराहा) महानस आदि में वर्तमान जो अभाव, वह घटत्वादि से अवच्छिन्न-प्रतियोगिता का निरूपक अभाव घटादिका अभाव होगा, न कि वह्नित्वादि से अवच्छिन्न-प्रतियोगिता वाला वह्न्याद्यभाव होगा । क्योंकि धूमाधिकरण पर्वतादि में तो वह्नि की सत्ता ही है । इस स्थिति में धूमाधिकरण पर्वत-चत्वरादि में वर्तमान घटादि के अभाव की प्रतियोगिता घट में गई और उस प्रतियोगिता का अवच्छेदक घटत्वादिक हुआ तथा अनवच्छेदक वह्नित्वधर्म हुआ । एवं तादृशअनवच्छेदक धर्मवत्त्व वह्नि में हैं । अतः धूम की व्यापकता वह्नि में है । इस प्रकार मूलोक्त 'नियतसाहचर्य' पद से "धूम (हेतु) व्यापक वह्नि (साध्य) सामानाधिकरण्य व्याप्ति है" यह फलितार्थ हुआ । अन्वयव्याप्ति का यह स्वरूप सिद्धान्तपक्ष के अनुसार है ।

पूर्वपक्ष की व्याप्ति तो "साध्याभाववदवृत्तित्वम्" है, जिसे व्याप्तिपञ्चक ग्रन्थ में प्रतिपादित किया गया है । नव्यन्याय की भाषा में इसका विशद रूप यह है—साध्यतावच्छेदक संयोगादिसम्बन्ध से अवच्छिन्ना तथा साध्यतावच्छेदकीभूत वह्नित्वादिधर्म से अवच्छिन्ना जो वह्न्यादिसाध्यनिष्ठा प्रतियोगिता, तादृश प्रतियोगिता-

In Public domain. Digitization Muthulakshmi Research Academy

अनुमानं द्विविधं—स्वार्थं परार्थं च ।

स्वार्थं स्वानुमितिहेतुः, तथाहि—स्वयमेव भूयोदर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं

अनुमान दो प्रकार का होता है— स्वार्थानुमान और परार्थानुमान ।

उन दोनों अनुमानों के अन्तर्गत अपनी अनुमिति का हेतु अनुमान स्वार्थानुमान कहलाता है । जैसे—कोई स्वयं ही भूयोदर्शन (बार बार दर्शन) द्वारा "जहाँ जहाँ धूम होता है, वहाँ वहाँ अग्नि होती है" इस प्रकार महानस (रसोईघर) आदि में

न्यायबोधिनी

वच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यावच्छिन्नाभाववन्निरूपित-हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तितात्वावच्छिन्नप्रतियोगिताकाभावो व्याप्तिरित्यर्थः । तच्च केवलान्वयिन्यव्याप्तमिति सिद्धान्तानुसरणम् ।

अनुमानं विभजते—स्वार्थमिति । स्वार्थानुमानं नाम न्यायाप्रयोज्यानुमानम् । न्यायप्रयोज्यानुमानं परार्थानुमानम् ।

हिन्दी-कला

निरूपक एवं प्रतियोगिव्यधिकरण अभाव = प्रतियोगितावच्छेदक संयोगादि-सम्बन्धावच्छिन्न तथा प्रतियोगितावच्छेदकवह्नित्वावच्छिन्न के साथ वैयधिकरण्य वाला अभाव, उस अभाव का जो अधिकरण ह्रद आदि, उसमें हेतुतावच्छेदकीभूत संयोगसम्बन्ध से वृत्तिता मीन-शैवाल आदि में है और तादृशवृत्तिता का अभाव धूम में है । तादृशवृत्तिता के अभाव की प्रतियोगिता वृत्तिता में है, जो वृत्तितात्वधर्म से अवच्छिन्न है । अतः वृत्तितात्वावच्छिन्न-तादृशप्रतियोगितानिरूपक अभाव ही साध्याभाववदवृत्तित्वरूप व्याप्ति का परिष्कृत स्वरूप है । इसका विशेष स्पष्टीकरण 'संस्कृत-कला' में द्रष्टव्य है ।

किन्तु यह "साध्याभाववदवृत्तित्व" रूप पूर्वपक्षव्याप्ति का स्वरूप "इदं वाच्यं ज्ञेयत्वात्" इत्यादि केवलान्वयिहेतु में अव्याप्त हो जाता है । क्योंकि वहाँ वाच्यत्वरूप साध्य का अभाव ही कहीं प्रसिद्ध नहीं है । ऐसी स्थिति में 'साध्याभाववदवृत्तित्वरूप' व्याप्ति केवलान्वयिस्थल में सुतरां नहीं बन पायेगी । इसीलिये पूर्व में उक्त "हेतु-समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्व" रूप सिद्धान्तलक्षण का अनुसरण आवश्यक है । सिद्धान्तलक्षण में साध्याभाव या हेत्वभाव का उल्लेख नहीं होने से यह व्याप्ति केवलान्वयिस्थल में भी संगत हो जाती है ।

अनुमान के दो भेद हैं—स्वार्थानुमान और परार्थानुमान । इनमें न्याय से अप्रयोज्य अनुमान स्वार्थानुमान है । अर्थात् जिस अनुमान में प्रतिज्ञा-हेत्वादिसमुदायरूप न्याय का प्रयोग न हो, वह स्वार्थानुमान है । तथा न्याय से प्रयोज्य अनुमान परार्थानुमान

In Public domain. Digitization Muthulakshmi Research Academy

गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति—'यत्र यत्र धूमस्तत्र तत्राग्निः' इति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते, अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्।

यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम्। यथा पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान्स स वह्निमान्, यथा महानसम्, तथा चायम् तस्मात्तथेति। अनेन प्रतिपादितात्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते।

धूम और अग्नि की व्याप्ति को जान कर पर्वत के समीप गया और वहाँ पर्वत के अन्दर अग्नि के होने में सन्देह करता हुआ पर्वत में धूम को देखकर व्याप्ति का स्मरण करता है कि "जहाँ जहाँ धूम है, वहाँ वहाँ अग्नि है"। उसके वाद उसे 'वह्नि-की व्याप्ति से युक्त धूमवाला यह पर्वत है" ऐसा ज्ञान उत्पन्न हो जाता है। यही ज्ञान लिङ्गपरामर्श नाम से कहा जाता है। अनन्तर उस परामर्श से 'अयं पर्वतो वह्नि-मान्" ऐसा अनुमितिरूप ज्ञान उत्पन्न हो जाता है। यह स्वार्थानुमान है।

जो तो स्वयं धूम से अग्नि का अनुमान करके दूसरे को अग्नि का ज्ञान कराने के लिये पञ्चावयव वाक्य का प्रयोग किया जाता है, वह परार्थानुमान है। जैसे, 'पर्वतो वह्निमान्' यह प्रथम अवयववाक्य है, 'धूमवत्त्वात्' यह द्वितीय अवयववाक्य है, "यो यो धूमवान् स स वह्निमान् यथा महानसम्" यह तृतीय अवयववाक्य है, "तथा चायम्" यह चतुर्थ अवयववाक्य है, "तस्मात्तथा" यह पञ्चम अवयववाक्य है। इस पञ्चावयव वाक्य से ज्ञापित धूमरूपलिङ्ग से दूसरा व्यक्ति भी पर्वत में अग्नि का निश्चय कर लेता है।

न्यायबोधिनी

न्यायत्वं च प्रतिज्ञाद्यवयवपञ्चकसमुदायत्वम्। अवयवत्वं च प्रतिज्ञाद्यन्यतमत्वम्।

हिन्दी-कला

है। अर्थात् जिसमें प्रतिज्ञादि का प्रयोग किया जाय, वह परार्थानुमान है। अपने लिये किये गये अनुमान में प्रतिज्ञादि-वाक्यों का प्रयोग नहीं करना पड़ता है। किन्तु दूसरे को अवगत कराने के लिये प्रतिज्ञादि-वाक्यों का प्रयोग करना ही पड़ता है। प्रतिज्ञा आदि पाँच अवयवों के समुदाय को न्याय कहते हैं। यहाँ अवयव का अर्थ है—प्रतिज्ञा-हेतु-उदाहरण-उपनय और निगमन का अन्यतम (एक-एक)। इन दोनों अनुमानों का तथा पञ्चावयवों का सोदाहरण निरूपण मूल में स्पष्ट है।

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । पर्वतो वह्निमानिति प्रतिज्ञा । धूमवत्त्वादिति हेतुः । यो यो धूमवान् स स वह्निमानित्युदाहरणम् । तथा चायमित्युपनयः । तस्मात्तथेति निगमनम् ।

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम् । तस्माल्लिङ्गपरामर्शोऽनुमानम् ।

लिङ्गं त्रिविधम्—अन्वयव्यतिरेकि केवलान्वयि केवलव्यति-

प्रतिज्ञा-हेतु-उदाहरण-उपनय और निगमन ये ही अनुमान के पाँच अवयव हैं। इनमें 'पर्वतो वह्निमान्' यह वाक्य प्रतिज्ञा है, 'धूमवत्वात्' यह हेतु है, "यो यो धूमवान् स स वह्निमान्" यह उदाहरण है, 'तथा चायम्' यह उपनय है, और 'तस्मात् तथा' यह निगमन है ।

स्वार्थानुमिति हो या परार्थानुमिति हो, दोनों में पूर्वोक्त लिङ्गपरामर्श ही करण है । अतः अनुमिति का करण होने से लिङ्गपरामर्श अनुमान है ।

लिङ्ग् तीन प्रकार का होता है—अन्वयव्यतिरेकि केवलान्वयि और केवल-व्यतिरेकि ।

न्यायबोधिनी

अन्वयेनेति । व्यापकसामानाधिकरण्यरूपव्याप्तिमानित्यर्थः । व्यतिरेकेणेति । व्यतिरेको नामाभावः । तथा च साध्याभावहेत्वभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः । इयं च व्याप्तिः 'यत्र तत्र वह्न्यभावस्तत्र तत्र धूमाभाव'

हिन्दी-कला

स्वार्थानुमिति हो या परार्थानुमिति हो, दोनों में लिङ्गपरामर्श करण है । इसलिये लिङ्गपरामर्श अनुमान है, यह मूलकार का कथन है ।[1] लिङ्ग तीन प्रकार के हैं—अन्वयव्यतिरेकी, केवलान्वयी और केवलव्यतिरेकी ।

अन्वय और व्यतिरेक दोनों तरह की व्याप्ति से युक्त लिङ्ग (हेतु) अन्वय-व्यतिरेकी कहाता है । अन्वयव्याप्तिका अर्थ है—व्यापकसमानाधिकरण्यरूप व्याप्ति । अर्थात् पूर्वोक्त हेतुव्यापकसाध्यसामानाधिकरण्यरूप व्याप्ति अन्वयव्याप्ति है । व्यतिरेक का अर्थ अभाव है । इसलिये साध्याभाव और हेत्वभाव की व्याप्ति व्यति-

---

१. किन्तु न्यायबोधिनीकार ने अपने व्याख्यान में व्याप्तिज्ञान को करण कहा है और परामर्श को व्यापार कहा है । संभवतः इसी मतभेद के कारण उक्त मूल का व्याख्यान न्यायबोधिनीकार ने नहीं किया ।

In Public domain. Digitization Muthulakshmi Research Academy

रेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि, यथा वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः ।

जो लिङ्ग अन्वय और व्यतिरेक दोनों प्रकार से व्याप्तिमान् हो, वह अन्वय-व्यतिरेकि लिङ्ग है । जैसे, अग्नि को सिद्ध करने में "धूमवत्त्व" अन्वयव्यतिरेकि लिङ्ग है । "जहाँ धूम है, वहाँ अग्नि है, जैसे महानस" यह अन्वयव्याप्ति है । एवं "जहाँ अग्नि नहीं है, वहाँ धूम भी नहीं है, जैसे ह्रद (झील)" यह व्यतिरेक-व्याप्ति है ।

न्यायबोधिनी

इति । 'यत्र' पदवीप्सया वह्न्यभावति यावति धूमाभावग्रहणे यावत्पदस्य व्यापकत्वपरतया धूमाभावे वह्न्यभावव्यापकत्वं लभ्यते, वह्न्यभावे धूमाभावव्याप्यत्वं च लभ्यते ।

एवं च वह्न्यभावनिष्ठव्याप्ते स्वाश्रयीभूतवह्न्यभावव्यापकीभूताभाव-प्रतियोगित्वसम्बन्धेन धूमनिष्ठतया व्यतिरेकव्याप्तिमत्त्वेन धूमव्यापकव-ह्निसानाधिकरण्यरूपान्वयव्याप्तिमत्त्वेन चान्वयव्यतिरेकित्वेन गीयते । व्यतिरेकपरामर्शस्तु वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवान्पर्वत इत्याकारकः ।

हिन्दी-कला

रेक व्याप्ति है । इस व्याप्ति का अभिलाप यों होता है—"यत्र-तत्र वह्न्यभावस्तत्र तत्र धूमाभावः" ऐसा । यहाँ भी 'यत्र' पद की वीप्सा से जितने भी वह्न्यभाववान् हैं, उन सभी में धूमाभाव का ग्रहण होने के कारण 'यावत्' पद व्यापकत्व को बताता है । इस लिये धूमाभाव में वह्न्यभाव की व्यापकता अवगत होती है और वह्न्यभाव में में धूमाभाव की व्याप्यता अवगत होती है ।

इस प्रकार वह्न्यभावनिष्ठव्याप्ति 'स्वाश्रयीभूतवह्न्यभावव्यापकीभूताभाव-प्रतियोगित्वसम्बन्ध' से धूम में चली जाती है । अतः धूम व्यतिरेकव्याप्तिमान् होने के कारण तथा पूर्वोक्त प्रकार से 'धूमव्यापकवह्निसामानाधिकरण्यरूप' अन्वयव्याप्ति-मान् भी होने के कारण अन्वयव्यतिरेकी लिङ्ग कहा जाता है । अन्वय-परामर्श का स्वरूप पहले बताया गया है—'वह्निव्याप्यधूमवान् पर्वतः' ऐसा । व्यतिरेक-परामर्श का स्वरूप होगा—"वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवान् पर्वतः" ऐसा ।

In Public domain. Digitization Muthulakshmi Research Academy

अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात्पटवत्। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।

जहाँ केवल अन्वयव्याप्ति हो, वह लिङ्ग केवलान्वयि कहा जाता है। जैसे—"घटोऽभिधेयः प्रमेयत्वात्" अर्थात् घट शब्दद्वारा वाच्य है, क्योंकि वह प्रमा का (यथार्थ ज्ञान का) विषय है। यहाँ "जो प्रमेय है, वह अभिधेय है" ऐसी अन्वयव्याप्ति तो है। किन्तु "जहाँ अभिधेयत्व नहीं है, वहाँ प्रमेयत्व भी नहीं है" ऐसी प्रमेयत्व और अभिधेयत्व की व्यतिरेकव्याप्ति नहीं है, क्योंकि संसार की सभी वस्तु प्रमेय है और अभिधेय भी है।

न्यायबोधिनी

केवलान्वयिनो लक्षणमाह—अन्वयेति। व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वं केवलान्वयित्वम्।

अथवा केवलान्वयिसाध्यकत्वं तत्। एतच्च लक्षणं हेतोर्व्यतिरेकित्वेऽपि सङ्गच्छते. साध्यस्य केवलान्वयित्वादेव व्यतिरेकव्याप्तेरभावात् 'अन्वयमात्रव्याप्तिकं केवलान्वयी'ति मूलकारोक्तं लक्षणमुपपन्नम्। अत्यन्ताभावाप्रतियागित्वं केवलान्वयित्वम्।

न चात्यन्ताभावाप्रतियोगित्वरूपकेवलान्वयित्वमाकाशाभावे संयोगा-

हिन्दी-कला

अन्वयमात्र-व्याप्ति वाला लिङ्ग केवलान्वयी होता है। अर्थात् 'व्यतिरेकव्याप्ति से रहित होते हुए अन्वयव्याप्तिमत्त्व' केवलान्वयी का लक्षण है।

अथवा 'केवलान्वयिसाध्यकत्व' केवलान्वयित्व है। अर्थात् जिस लिङ्ग का साध्य केवलान्वयी हो, वह केवलान्वयी है। यह लक्षण हेतु के व्यतिरेकी होने पर भी सङ्गत हो जाता है, क्योंकि साध्यमात्र के केवलान्वयी होने से ही व्यतिरेकव्याप्ति का अभाव हो जायगा और "अन्वयमात्रव्याप्तिकं केवलान्वयि" यह मूलकारोक्त लक्षण उपपन्न हो जायगा। यहाँ साध्यगत केवलान्वयित्व अत्यन्ताभावाप्रतियोगित्वरूप है। अर्थात् अत्यन्ताभाव का जो अप्रतियोगी हो, वह केवलान्वयी है। "इदं वाच्यं ज्ञेयत्वात्" इस अनुमान में वाच्यत्व-साध्य केवलान्वयी है। क्योंकि जगत् के समस्त पदार्थ में वाच्यत्वधर्म रहता है।

"उक्त अत्यन्ताभावाप्रतियोगित्वरूप केवलान्वयित्व की आकाशाभाव में तथा संयोगाभाव में अव्याप्ति हो जायगी, क्योंकि आकाशाभाव आकाशाभावाभाव का प्रतियोगी ही होता है, एवं संयोगाभाव भी संयोगाभावाभाव का प्रतियोगी ही होता है।" ऐसी शङ्का नहीं करनी चाहिये। क्योंकि अत्यन्ताभावाप्रतियोगित्व का अर्थ 'स्वविरो-

In Public domain. Digitization Muthulakshmi Research Academy

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्, यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलम्, न चेयं तथा, तस्मान्न तथेति। अत्र यद्गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात्।

जहाँ केवल व्यतिरेकव्याप्ति हो, वह लिङ्ग केवलव्यतिरेकि कहा जाता है। जैसे, "पृथिवी औरों से (जलादिकों से) भिन्न है; गन्धवान् होने से; जो औरों से भिन्न नहीं है, वह गन्धवान् नहीं होता है, जैसे जल; पृथिवी जल के समान गन्धशून्य नहीं है; इसलिये यह जलादि की तरह इतर से (जलादि से) अभिन्न नहीं है किन्तु भिन्न है। यहाँ जो गन्धवान् है वह इतर से भिन्न है—इसका अन्वयदृष्टान्त कोई नहीं है। क्योंकि पृथिवीमात्र पक्ष है, जिसमें साध्य अभी सन्दिग्धावस्था में ही है। जबकि निश्चित साध्यवान् ही अन्वयदृष्टान्त होता है।

न्यायबोधिनी

भावे चाव्याप्तमिति वाच्यम्। स्वविरोधिवृत्तिमदत्यन्ताभावाप्रतियोगित्वस्यैव तदर्थत्वात्। तथा चानयोः एकजातीयसम्बन्धेन सर्वत्र विद्यमानत्वं केवलान्वयित्वमिति नव्याः।

केवलव्यतिरेकिणो लक्षणमाह—व्यतिरेकेति। निश्चितान्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं केवलव्यतिरेकित्वम्। यथा पृथिवीति।

हिन्दी-कला

धिवृत्तिमदत्यन्ताभावाप्रतियोगित्व' है। गगनाभावाभाव गगनरूप होने से वृत्तिमान् अभाव नहीं है। कारण, गगन अवृत्ति पदार्थ है। एवं संयोगाभावाभाव संयोगाभाव का विरोधी नहीं है, क्योंकि उसी वृक्ष में एक भाग में कपि का संयोगाभाव है और दूसरे भाग में संयोगाभावाभाव अर्थात् कपि का संयोग भी है। इस प्रकार आकाशाभाव और संयोगाभाव दोनों ही केवलान्वयी वन जाते हैं, क्योंकि स्वविरोधी एवं वृतिमान् अत्यन्ताभाव के दोनों ही अप्रतियोगी हैं।

एवं एकजातीयसम्वन्ध से अर्थात् स्वरूपसम्बन्ध से सर्वत्र विद्यमान रहना केवलान्वयित्व है, यह नव्यों का लक्षण है। जितने भी केवलान्वयी धर्म हैं, वे सभी स्वरूपसम्बन्ध से सर्वत्र विद्यमान रहते हैं।

केवलव्यतिरेकी का लक्षण मूलकार करते हैं—"व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि" इति। अर्थात् जिस हेतु में व्यतिरेकव्याप्ति ही हो अन्वयव्याप्ति न हो, वह केवलव्यतिरेकी लिङ्ग है। अर्थात् "निश्चयविषयीभूतअन्वयव्याप्ति से रहित होते हुए व्यतिरेकव्याप्तिमत्त्व" केवलव्यतिरेकित्व है। जैसे—"पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात्" यहाँ गन्धवत्त्व-हेतु केवलव्यतिरेकी है।

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

अत्र पृथिवीत्वावच्छिन्नं पक्षः, पृथिवीतरजलाद्यष्टभेदः साध्यम्, गन्धवत्त्वं हेतुः। अत्र यद्गन्धवत्तदितरभेदवदित्यन्वयदृष्टान्ताभावाद् गन्धव्यापकेतरभेद-सामानाधिकरण्यरूपान्वयव्याप्तिग्रहासम्भवः। किन्तु यत्र यत्र पृथिवीतरभेदाभावस्तत्र तत्र गन्धाभावो यथा जलादिकमिति व्यतिरेकदृष्टान्ते जलादावितरभेदाभावरूपसाध्याभावव्यापकता गन्धाभावे गृह्यते। इममेवार्थं मनसि निधाय 'यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलमि'ति ग्रन्थेन मूलकारो व्यतिरेकव्याप्तिमेव प्रदर्शितवान्।

एवं प्रकारेण व्यतिरेकव्याप्तिग्रहानन्तरमितरभेदाभावव्यापकीभूताभाव-प्रतियोगिगन्धवती पृथिवीत्याकारकव्यतिरेकिपरामर्शात् पृथिवीत्वावच्छिन्नोद्देश्यतानिरूपितेतरभेदत्वावच्छिन्नंविधेयताका 'पृथिवी इतरभेदवती' त्याकारकानुमितिर्जायत इति तत्त्वम्।

यथाश्रुतमूलार्थस्तु-यथा जलमिति। यत्=जलम्, इतरेभ्यो न भिद्यते=इतरभेदाभाववत्, न तद्गन्धवत्=जलमितरभेदाभावव्यापकगन्धाभाववत्, न चेयं तथेति। इयं पृथिवी न तथा=इतरभेदाभावव्यापकगन्धाभाववती न किन्तु तदभावात्मकगन्धवती। तस्मान्न तथेति। तस्मात्=गन्धाभावाभाव-

हिन्दी-कला

उक्त अनुमान में पृथिवीत्वावच्छिन्न पक्ष है, पृथिवी से इतर जो जलादि आठ द्रव्य हैं, उनका भेद साध्य है, और गन्धवत्त्व हेतु है। यहाँ पर जो "गन्धवान् है वह इतरभेदवान् है" ऐसा अन्वयदृष्टान्त नहीं होने से गन्धरूप हेतु का व्यापक जो इतरभेद-रूप साध्य, उसका सामानाधिकरण्यरूप अन्वयव्याप्ति का निश्चय होना असंभव है। किन्तु इसके विपरीत जहाँ जहाँ इतरभेदाभावरूप साध्याभाव है, वहाँ-वहाँ गन्धाभावरूप हेत्वभाव है, जैसे जलादि में। इस प्रकार जलादिरूप व्यतिरेकदृष्टान्त में इतरभेदाभावरूप साध्याभाव की व्यापकता गन्धाभावरूप हेत्वभाव में गृहीत हो रही है। इस प्रकार साध्याभावव्यापकीभूताभावप्रतियोगित्वरूप केवलव्यनिरिकत्व गन्धवत्व-हेतु में घटित हो जाता है। इसलिये गन्धवत्व-हेतु केवलव्यतिरेकी है। इसी आशय को मन में रख कर मूलकार ने उक्त अनुमान में केवलव्यतिरेकव्याप्ति को ही प्रदर्शित किया।

इस प्रकार से व्यतिरेकव्याप्ति का ग्रहण होने के अनन्तर "इतरभेदाभाव-व्यापकीभूताभावप्रतियोगिगन्धवती पृथिवी" इत्याकारक व्यतिरेकिपरामर्श होने से पृथिवीत्वावच्छिन्नोद्देश्यतानिरूपित जो इतरभेदत्वावच्छिन्ना विधेयता, (साध्यता) तादृश साध्यतावाली "पृथिवी इतरभेदवती" इत्याकारक अनुमिति उत्पन्न हो जाती है। यही वस्तुस्थिति है। यहाँ की शेष न्यायबोधिनी पूर्व व्याख्यान से गतार्थ है।

In Public domain. Digitization Muthulakshmi Research Academy

सन्दिग्धसाध्यवान् पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः ।
निश्चितसाध्यवान् सपक्षः । यथा तत्रैव महानसम् ।
निश्चितसाध्याभाववान् विपक्षः । यथा तत्रैव महाह्रदः ।

जिसमें साध्य का सन्देह हो, उसे पक्ष कहते हैं। जैसे धूमवत्त्व के हेतु होने पर पर्वत पक्ष है।

जिसमें साध्य का निश्चय हो, वह सपक्ष है। जैसे धूमवत्त्व-हेतु के लिये महानस सपक्ष है। क्योंकि वहाँ धूमवत्त्व के साथ-साथ वह्नि का भी निश्चय है।

जिसमें साध्य के अभाव का निश्चय हो, उसे विपक्ष कहते हैं। जैसे धूमवत्त्व-हेतु के लिये महाह्रद विपक्ष है। क्योंकि वहाँ धूमाभाव के साथ साथ वह्न्यभाव भी निश्चित है।

न्यायबोधिनी

वत्त्वात्, न तथा = इतरभेदाभाववती न किन्तु इतरभेदाभावाभाववती इतरभेदवतीत्यर्थः।

पक्षलक्षणमाह—सन्दिग्धेति। साध्यप्रकारकसन्देहविशेष्यत्वं पक्षत्वम्। सन्देहश्च पर्वतो वह्निमान्न वेत्याकारः। इदं च लक्षणमनुमितेः पूर्वं साध्यसन्देहो नियमेन जायत इत्यभिप्रायेण प्राचीनैः कृतम्। गगनविशेष्यकमेघप्रकारकसन्देहाभावदशायामपि गृहमध्यस्थपुरुषस्य घनगर्जितश्रवणेन गगनं मेघवदित्याकारिकाया गगनत्वावच्छिन्नोद्देश्यतानिरूपितमेघत्वावच्छिन्नविधेयताकाया अनुमितेर्दर्शनात्प्राचीनलक्षणं विहाय नवीनैरनुमित्युद्देश्यत्वं पक्षत्वमिति स्थिरीकृतम्।

हिन्दी-कला

'सन्दिग्ध साध्यवान् पक्षः' इस मूलोक्त पक्षलक्षण को बोधिनीकार स्पष्ट करते हैं—साध्यप्रकारक जो सन्देह (पर्वतो वह्निमान् नवा इत्याकारक) उसका विशेष्य पक्ष है। यह जो पक्ष का सन्देह घटित लक्षण है, वह प्राचीनों का लक्षण है। इसका अभिप्राय यह है कि अनुमिति के पूर्व नियमतः साध्य का सन्देह होता ही है।

किन्तु गगनविशेष्यकमेघप्रकारकसन्देह की अभावदशा में भी गृह के मध्य स्थित पुरुष को घनगर्जन सुनकर "गगनं मेघवत्" इत्याकारक गगनत्वावच्छिन्न उद्देश्यता-निरूपित मेघत्वावच्छिन्नविधेयताक अनुमिति होती देखी जाती है। इस कारण से प्राचीनों के उक्त लक्षण को छोड़कर नवीन नैयायिकों ने "अनुमित्युद्देश्यत्वं पक्षत्वम्" यही पक्षलक्षण निर्धारित किया। अर्थात् अनुमिति का जो उद्देश्य है, वह पक्ष है।

In Public domain. Digitization Muthulakshmi Research Academy

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः ।

सव्यभिचारोऽनैकान्तिकः । स त्रिविधः—साधारणासाधारणानुपसंहारिभेदात् ।

तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः । यथा-पर्वतो वह्निमान् प्रमेयत्वादिति । (अत्र) प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।

सव्यभिचा -विरुद्ध-सत्प्रतिपक्ष-असिद्ध और बाधित ये पाँच हेत्वाभास हैं ।

जो हेतु अनैकान्तिक होता है, वह सव्यभिचार है । वह तीन प्रकार का होता है—साधारण-असाधारण और अनुपसंहारी के भेद से । उनमें साध्याभाव के अधिकरण में रहने वाला हेतु साधारणनामक अनैकान्तिक हेत्वाभास है । जैसे—"पर्वतो वह्निवान् प्रमेयत्वात्" इस अनुमान में प्रमेयत्व-हेतु साधारण अनैकान्तिक है । क्योंकि प्रमेयत्व-हेतु, वह्निरूपसाध्य का अभाव जिसमें है, ऐसे ह्रद में विद्यमान है ।

न्यायबोधिनी

सपक्षलक्षणमाह—निश्चितेति । साध्यप्रकारकनिश्चयविशेष्यत्वं सपक्षत्वम् । निश्चयश्च महानसं वह्निमदित्याकारकः ।

विपक्षलक्षणमाह—निश्चितसाध्याभावेति । साध्याभावप्रकारकनिश्चयविशेष्यत्वं विपक्षत्वम् । निश्चयश्च ह्रदो वह्न्यभाववानित्याकारकः ।

एवं सद्धेतून्निरूप्य हेत्वाभासान्निरूपयति—सव्यभिचारेति । हेतुवदाभासन्त इति हेत्वाभासाः दुष्टहेतव इत्यर्थः । दोषाश्च व्यभिचारविरोधसत्प्रति-

हिन्दी-कला

मूलोक्त सपक्षलक्षण को न्यायबोधिनीकार स्पष्ट करते हैं—"साध्यप्रकारकनिश्चयविशेष्यत्वं सपक्षत्वम्" । अर्थात् जिसमें साध्यप्रकारक निश्चय हो, वह सपक्ष है। जैसे "महानसं वह्निमत्" ऐसा वह्निप्रकारक निश्चय महानसरूप विशेष्य में है, इस लिये महानस सपक्ष कहाता है ।

इसी तरह "साध्याभावप्रकारकनिश्चयविशेष्यत्व विपक्षत्व" है । अर्थात् जिसमें साध्याभाव का निश्चय हो, वह विपक्ष कहाता है । ऐसा निश्चय "ह्रदो वह्न्यभाववान्" ऐसा निश्चय है । अतः इस निश्चय का विशेष्य जो ह्रद है, वह वह्निसाध्यक अनुमिति करने में विपक्ष कहाता है ।

मूलकार पूर्व में सद्धेतुओं का निरूपण करने के अनन्तर अब हेत्वाभासों का निरूपण करते हैं—सव्यभिचार विरुद्ध आदि । जो वस्तुतः हेतु न हों, परन्तु हेतु के समान भासित हों, वे हेत्वाभास हैं । अर्थात् दोषयुक्त हेतु हेत्वाभास हैं । हेतुदोष

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

पक्षासिद्धिबाधाः। एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धेन एतद्विशिष्टा हेतवो दुष्टहेतव इत्यर्थः।

यद्विषयकत्वेन ज्ञानस्यानुमिति-तत्करणान्यतरप्रतिबन्धकत्वं तत्त्वं दोषसामान्यस्य लक्षणम्। हेतौ दोषज्ञाने सत्यनुमितिप्रतिबन्धो जायते व्याप्तिज्ञानप्रतिबन्धो वा। अतो वादिनिग्रहाय वादिनोद्भावितहेतौ दोषोद्भावनाय दुष्टहेतुनिरूपणमित्यर्थः।

सव्यभिचारं विभज्य दर्शयति—साधारणेति। साधारणाद्यन्यतमत्वं सव्यभिचारसामान्यलक्षणम्। साधारणत्वं = साध्याभाववद्वृत्तित्वम्। वह्नि-

हिन्दी-कला

पाँच प्रकार के होते हैं—व्यभिचार-विरोध-सत्प्रतिपक्ष-असिद्धि और बाध। एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्ध से दोषविशिष्ट जो हेतु, वे दुष्टहेतु हैं। तात्पर्य यह है कि जिस ज्ञान में दोष विषय होकर भासित होता है, उसमें हेतु भी विषय होता ही है। इसलिये एक ज्ञान का विषय होने से एकज्ञानविषयहेतुतावच्छेदकवत्त्वरूप सम्बन्ध जब हेतु में गया, तब उस सम्बन्ध से दोषरूप सम्बन्धी भी उस हेतु में चला गया। इस प्रकार कहीं हेतु में साक्षात् दोषवत्ता न होने पर भी उक्त परम्परासम्बन्ध से दोषवत्ता चली जाती है, और वह बाधादिस्थलीय हेतु भी 'दुष्टहेतु' पद से व्यवहृत होता है।

यद्विषयकत्वेन ज्ञान अनुमिति का या उसके करण (व्याप्तिज्ञान) का प्रतिबन्धक होता है, तत्त्व दोषसामान्य का लक्षण है। अर्थात् यद्विषयक ज्ञान अनुमिति या उसके करण का प्रतिबन्धक होता है, वह दोष (हेत्वाभास) है। चूंकि हेतु में दोषज्ञान होने पर अनुमिति का प्रतिबन्ध अथवा व्याप्तिज्ञान का प्रतिबन्ध हो जाता है, इसीलिये वादी को निगृहीत करने के लिये वादीद्वारा उद्भावित जो स्वपक्षसाधक हेतु, उसमें दोषज्ञानपूर्वक दोष का उद्भावन किया जाय, एतदर्थ दुष्टहेतु का निरूपण किया जाता है। अर्थात् हेत्वाभास का निरूपण भी अप्रासङ्गिक या निरर्थक नहीं है। अतः उसका भी निरूपण यहाँ अवश्य कर्तव्य है।

विभागपूर्वक सव्यभिचार को मूलकार प्रदर्शित करते हैं—साधारण, असाधारण और अनुपसंहारी तीन प्रकार का सव्यभिचार होता है। सव्यभिचार का ही दूसरा नाम अनैकान्तिक है। अतः 'अनैकान्तिकत्व' सव्यभिचार का लक्षण नहीं है। किन्तु 'साधारणादित्रितयान्यतमत्व' ही सव्यभिचारसामान्य का लक्षण है। पृथक्-पृथक् लक्षण यों है—हेतु का साध्याभाव के अधिकरण में रहना साधारण सव्यभिचार का लक्षण है। जैसे—'वह्निमान् प्रमेयत्वात्' यहाँ पर प्रमेयत्वहेतु में जब वह्न्यभावाधिकरणवृत्तित्वरूप व्यभिचार का ज्ञान हो जाता है, तब वहाँ साध्याभाववद्वृत्तित्वरूप

In Public domain. Digitization Muthulakshmi Research Academy

सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः । यथा—शब्दो नित्यः शब्दत्वादिति । (अत्र) शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति ।

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा—सर्वमनित्यं प्रमेयत्वादिति । अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति ।

जो हेतु सभी सपक्षों और विपक्षों से व्यावृत्त हो अर्थात् उनमें न रहने वाला हो, किन्तु पक्षमात्र में रहे, वह असाधारणनामक अनैकान्तिक हेत्वाभास है। जैसे—"शब्दो नित्यः शब्दत्वात्" इस अनुमान में शब्दत्व-हेतु असाधारण अनैकान्तिक है। क्योंकि शब्दत्व-हेतु सपक्षभूत सभी नित्य पदार्थों से और विपक्षभूत सभी अनित्य पदार्थों से व्यावृत्त रहता हुआ शब्दरूप पक्षमात्र में रहता है।

जो हेतु अन्वय-दृष्टान्त और व्यतिरेक-दृष्टान्त से रहित हो, वह अनुपसंहारी-नामक अनैकान्तिक हेत्वाभास है। जैसे—"सर्वमनित्यं प्रमेयत्वात्" इस अनुमान में प्रेमयत्व हेतु अनुपसंहारी अनैकान्तिक है। क्योंकि सभी पदार्थों के पक्षकोटि में आ-जाने से पक्षातिरिक्त कोई बचा नहीं, जो अन्वय-दृष्टान्त या व्यतिरेक-दृष्टान्त बन सके।

न्यायबोधिनी

मान् प्रमेयत्वादित्यत्र प्रमेयत्वहेतौ वह्न्यभाववदवृत्तित्वरूपव्यभिचारे ज्ञाते वह्न्यभाववदवृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः फलम् ।

असाधारण इति । सर्वसपक्षव्यावृत्तत्वं निश्चितसाध्यवदवृत्तित्वम् । साध्यवदवृत्तित्वं च साध्यासामानाधिकरण्यम् । हेतौ साध्यासामानाधिकरण्ये निश्चिते साध्यसामानाधिकरण्यरूपव्याप्तिज्ञानप्रतिबन्धः फलम् ।

हिन्दी-कला

व्याप्ति का ज्ञान प्रतिबन्धित हो जाता है, और व्याप्तिज्ञान के अभाव में अनुमिति नहीं हो पाती। इस प्रकार साधारणज्ञान का फल व्याप्तिज्ञान का प्रतिबन्ध कर देना है।

सर्व सपक्ष-विपक्ष से जो हेतु व्यावृत्त हो और पक्षमात्र में रहे, वह असाधारण अनैकान्तिक है। सर्वसपक्षव्यावृत्तत्व का अर्थ है—निश्चितसाध्यवान् में हेतु का न रहना। साध्यवदवृत्तित्व का अभिप्राय है—साध्य के साथ सामानाधिकरण्य का अभाव। इस प्रकार हेतु में साध्य के साथ सामानाधिकरण्याभाव का निश्चय होने पर साध्य-सामानाधिकरण्यरूप व्याप्ति का ज्ञान प्रतिबन्धित हो जाता है। और यही इस हेत्वा-भास के ज्ञान का फल है।

In Public domain. Digitization Muthulakshmi Research Academy

साध्याभावव्याप्तो हेतुर्विरुद्धः । यथा शब्दो नित्यः कृतकत्वात्

जो हेतु साध्य से व्याप्त न होकर साध्याभाव से व्याप्त हो, वह विरुद्धनामक

न्यायबोधिनी

अनुपसंहारिणं लक्ष्यति—अन्वयेति। उभयत्र दृष्टान्ताभावादन्वयव्याप्तिज्ञानव्यतिरेकव्याप्तिज्ञानोभयसामग्री नास्तीत्यर्थः। सर्वस्यैव पक्षत्वात्पक्षातिरिक्ताप्रसिद्धेरिति भावः। किञ्चिद्विशेष्यकनिश्चयाविषयसाध्यकत्वे सति किञ्चिद्विशेष्यकनिश्चयाविषयसाध्याभावकत्वमेवानुपसंहारित्वम्। एतदीयज्ञानस्य व्याप्तिसंशयजननद्वारा व्याप्तिज्ञानप्रतिबन्धः फलम्।

वस्तुतस्तु अत्यन्ताभावाप्रतियोगिसाध्यादिकत्वमेवानुपसंहारित्वमिति बोध्यम्।

हिन्दी-कला

अनुमिति में अपेक्षित अन्वयदृष्टान्त या व्यतिरेकदृष्टान्त इन दोनों से रहित जो हेतु, वह अनुपसंहारी है। जैसे—'सर्वमनित्यं प्रमेयत्वात्' यहाँ सब कुछ पक्ष बन गया है। इसलिये पक्ष से इतर न कोई सपक्ष बच गया है कि अन्वयदृष्टान्त मिले और न कोई विपक्ष बच गया है कि कोई व्यतिरेकदृष्टान्त मिले। इस प्रकार दोनों दृष्टान्त का अभाव होने के कारण अन्वयव्याप्तिज्ञान या व्यतिरेकव्याप्तिज्ञान किसी की भी सामग्री नहीं मिल पाती है। क्योंकि सबके पक्ष बन जाने से पक्षातिरिक्त अप्रसिद्ध है।

अनुपसंहारी का परिष्कृत लक्षण बोधिनीकार कहते हैं—किञ्चिद्विशेष्यक इत्यादि। अर्थात् किसी को विशेष्य बनाकर होने वाले निश्चय का अविषय साध्य हो, साथ ही किसी को विशेष्य बनाकर होने वाले निश्चय का अविषय साध्याभाव भी हो, तब वहाँ का हेतु अनुपसंहारी होता है। तात्पर्य यह है कि कहीं भी न साध्य का निश्चय हो और न साध्याभाव का निश्चय हो, उस स्थिति में वहाँ का हेतु अनुपसंहारी होगा। "सर्वम् अनित्यं प्रमेयत्वात्" यहाँ यही स्थिति है। क्योंकि सब के पक्ष बन जाने से सर्वत्र अनित्यत्व का सन्देह ही है, निश्चय कहीं नहीं है। इस हेत्वाभास के ज्ञान का फल व्याप्ति में संशय पैदा कर व्याप्तिज्ञान का प्रतिबन्ध कर देना है।

वस्तुस्तु साध्य-हेतु आदि का अत्यन्ताभाव का अप्रतियोगी होना ही अनुपसंहारी का लक्षण है। इसके अनुसार 'सर्वमनित्यं प्रमेयत्वात्' के समान 'इदं वाच्यं ज्ञेयत्वात्' इत्यादि का अनुपसंहारी-हेत्वाभास में अन्तर्भाव हो जायगा। अनुपसंहारी के इस लक्षण की दृष्टि से 'साध्याभावदवृत्तित्वम्' यही व्याप्ति का स्वरूप मानना युक्त है। क्योंकि केवलान्वयीस्थल में दुष्ट-हेतु होने के कारण उसमें व्याप्ति का न होना अभीष्ट ही है। अतः सिद्धान्तलक्षण बनाकर वहाँ व्याप्तिलक्षण ले जाने का प्रयास अनावश्यक है।

In Public domain. Digitization Muthulakshmi Research Academy

घटवदिति । (अत्र) कृतकत्वं हि नित्यत्वाभावेनाऽनित्यत्वेन व्याप्तम् ।

साध्याभावसाधकं हेत्वन्तरं यस्य, स सत्प्रतिपक्षः । यथा-शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्, शब्दोऽनित्यः कार्यत्वाद् घटवत् ।

हेत्वाभास है । जैसे—"शब्दो नित्यः कृतकत्वात्" इस अनुमान में कृतकत्व-हेतु विरुद्ध है । क्योंकि कृतकत्व-हेतु नित्यत्वाभावरूप अनित्व से व्याप्त है ।

जिस हेतु के साध्य का अभाव सिद्ध करने वाला हेत्वन्तर (दूसरा हेतु) विद्यमान हो, वह सत्प्रतिपक्षनामक हेत्वाभास है । जैसे—"शब्दो नित्यः श्रावणत्वात् शब्दत्ववत्" इस अनुमान में श्रावणत्व-हेतु नित्यत्व का साधक है । किन्तु इसके विपरीत "शब्दोऽनित्यः कार्यत्वात् घटवत्" इस अनुमान में प्रयुक्त कार्यत्वरूप हेत्वन्तर नित्यत्व-साध्य का अभावरूप अनित्व सिद्ध करने वाला भी विद्यमान है । इसलिये यहाँ के दोनों ही अनुमानों के दोनों ही हेतु परस्पर के प्रति सत्प्रतिपक्षित हो जाते हैं और दोनों ही अनुमिति रुक जाती है ।

न्यायबोधिनी

विरुद्धं लक्षयति—साध्याभावव्याप्त इति । साध्याभावव्याप्तिः=साध्याभावनिरूपितव्यतिरेकव्याप्तिः=साध्यव्यापकीभूताभावप्रतियोगित्वम् । तथा च पक्षविशेष्यकसाध्याभावव्याप्यहेतुप्रकारकज्ञानात् पक्षविशेष्यकसाध्य प्रकारकानुमितिप्रतिबन्धः फलम् । एवं सत्प्रतिपक्षेऽपि । विरुद्धसत्प्रतिपक्षयोर्विशेषस्तु विरुद्धहेतोरेकत्वेन सत्प्रतिपक्षहेतोर्द्वित्वेन च ज्ञातव्यः ।

हिन्दी-कला

साध्याभाव का व्याप्त हेतु विरुद्ध है । साध्याभाव की व्याप्ति का अर्थ है—साध्याभावनिरूपित व्यतिरेकव्याप्ति । अर्थात् साध्य का व्यापकीभूत जो अभाव, उसका प्रतियोगी होना साध्याभाव की व्याप्ति है । जैसे—"शब्दो नित्यः कृतकत्वात्" यहाँ कृतकत्व-हेतु नित्यत्व-साध्य का व्यापकीभूत कृतकत्वाभाव का प्रतियोगी है, इसलिए कृतकत्व-हेतु नित्यत्वसाध्य के प्रति विरुद्ध है ।

पक्ष में साध्याभावव्याप्यहेतुप्रकारक ज्ञान होने पर पक्षविशेष्यक साध्य-प्रकारक अनुमति का प्रतिबन्ध हो जाता है । यही इस हेत्वाभासज्ञान का फल है । सत्प्रतिपक्षस्थल में भी अनुमिति का प्रतिबन्ध ही फल है । फिर भी विरुद्ध और सत्प्रतिपक्ष में यह अन्तर है कि विरुद्ध में एक ही हेतु का प्रयोग होता है, और सत्प्रतिपक्ष में दो हेतुओं का प्रयोग होता है ।

In Public domain. Digitization Muthulakshmi Research Academy

असिद्धस्त्रिविधः—आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति ।

आश्रयासिद्धो यथा-गगनारविन्दं सुरभि, अरविन्दत्वात्, सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः, स च नास्त्येव ।

असिद्धनामक हेत्वाभास तीन प्रकार का होता है—आश्रयासिद्ध-स्वरूपासिद्ध और व्याप्यत्वासिद्ध ।

इसमें आश्रयासिद्ध जैसे—'गगनारविन्दं सुरभि, अरविन्दत्वात्, सरोजारविन्दवत्' इस अनुमान में गगनारविन्द आश्रय है, और वह है ही नहीं। अतः यहाँ का हेतु आश्रयासिद्ध हेत्वाभास है ।

न्यायबोधिनी

साध्याभावव्याप्यप्रतिहेतुमत्पक्षस्सत्प्रतिपक्ष इति यावत् । साध्याभावसाधकहेतुः साध्यसाधकत्वेनोपन्यस्त इत्यसामर्थ्यसूचनमपि ।

आश्रयासिद्ध इति । आश्रयासिद्धिर्नाम पक्षतावच्छेदकविशिष्टपक्षाप्रसिद्धिः । यथेति । अत्रारविन्दे गगनीयत्वाभावे निश्चिते गगनीयत्वविशिष्टारविन्दे सौरभ्यानुमितिप्रतिबन्धः फलम् ।

हिन्दी-कला

मूलोक्त सत्प्रतिपक्षलक्षण का निष्कर्ष बताते हैं—"साध्याभावव्याप्यप्रतिहेतुमत्पक्षः सत्प्रतिपक्षः" इति । अर्थात् 'साध्यव्याप्यहेतुमान् पक्षः' ऐसा वादी द्वारा साध्यसिद्धि के अनुकूल परामर्श उपस्थापित करने के अनन्तर जब प्रतिवादी द्वारा "साध्याभावव्याप्य प्रतिहेतुमान् पक्षः" ऐसा साध्याभावसिद्धि के अनुकूल परामर्श उपस्थापित कर दिया जाय तो, वहाँ सत्प्रतिपक्ष हेत्वाभास हो जाता है। और दोनों ही परामर्श एक दूसरे के विरोधी होने के कारण दोनों ही अनुमिति प्रतिबन्धित हो जाती है। दोनों ही हेतु सत्प्रतिपक्षित हो जाते हैं। सत्प्रतिपक्ष में साध्याभावसाधक दूसरा हेतु होता है किन्तु विरुद्ध में साध्याभावसाधक हेतु को ही वादी ने अज्ञानतावश साध्यसाधकत्वेन उपन्यस्त कर दिया, इससे उसकी असमर्थता सूचित होती है, यह भी सत्प्रतिपक्ष और विरुद्ध में अन्तर है।

पक्षतावच्छेदकधर्म से विशिष्ट पक्ष की अप्रसिद्धि आश्रयासिद्धि है। जैसे, "गगनारविन्दं सुरभि अरविन्दत्वात्" यहाँ अरविन्द में गगनीयत्व का अभाव निश्चित होने से गगनीयत्वविशिष्ट अरविन्द में सौरभ्य की अनुमिति बाधित हो जाती है। यही आश्रयासिद्धिज्ञान का फल है।

In Public domain. Digitization Muthulakshmi Research Academy

स्वरूपासिद्धो यथा-शब्दो गुणश्चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात्।

सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः। साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधना-

स्वरूपासिद्ध जैसे—"शब्दो गुणश्चाक्षुषत्वात्" यहाँ चाक्षुषत्व-हेतु शब्दरूप पक्ष में नहीं है। क्योंकि शब्द श्रावण होता है, चाक्षुष नहीं होता।

उपाधियुक्त हेतु व्याप्यत्वासिद्ध है। जो साध्य का व्यापक होते हुए साधन का अव्यापक हो, वह उपाधि कहाता है। साध्यव्यापकत्व का अर्थ है—साध्यसमानाधिकरण जो अत्यन्ताभाव, उसका अप्रतियोगी होना। एवं, साधन (हेतु) के अधिकरण में रहने वाला जो अत्यन्ताभाव, उसका प्रतियोगी होना, साधनाव्यापकत्व है।

न्यायबोधिनी

स्वरूपासिद्ध इति। स्वरूपासिद्धिर्नाम पक्षे हेत्वभावः। तथा च हेत्वभावविशिष्टपक्षज्ञानात् पक्षविशेष्यकहेतुप्रकारकपरामर्शानुपपत्त्या परामर्शप्रतिबन्धः फलम्।

व्याप्यत्वासिद्ध इति। प्रकृते धूमव्यापकत्वमार्द्रेन्धनसंयोगे गृहीतं चेद् धूमे आर्द्रेन्धनसंयोगव्याप्यत्वं गृहीतम्। एवं वह्नेरव्यापकत्वमार्द्रेन्धनसंयोगे गृहीतं चेद् वह्नौ तदव्याप्यत्वं गृहीतम्। तदेव व्यभिचरितत्वम्। तथा चोपाधिव्यभिचारित्वं साधने गृहीतं चेदुपाधिभूतार्द्रेन्धनसंयोगव्याप्यधूमव्यभिचारित्वं गृहीतमेव।

अनुमानप्रकारश्च—पूर्वानुमानहेतुं पक्षीकृत्य वह्निर्धूमव्यभिचारी, धूमव्यापकार्द्रेन्धनसंयोगव्यभिचरितत्वात्, घटत्वादिवत्, यो यत्साध्यव्यापकव्य-

हिन्दी-कला

पक्ष में हेतु का अभाव होना स्वरूपासिद्धि है। स्वरूपासिद्धि की स्थिति में हेत्वभावविशिष्टपक्ष का ज्ञान होने से पक्षविशेष्यक हेतुप्रकारक परामर्श नहीं उत्पन्न हो सकेगा। अतः परामर्श का प्रतिबन्ध ही इसका फल है।

उपाधिसहित हेतु व्याप्यत्वासिद्ध होता है। साध्य का व्यापक होता हुआ जो साधन का अव्यापक हो, वह उपाधि है। साध्यव्यापकत्व और साधनाव्यापकत्व का स्वरूप और उदाहरण मूल में बता दिया गया है। न्यायबोधिनीकार उपाधि का प्रयोजन दर्शाते हैं, जैसा कि न्यायसिद्धान्तमुक्तावली में कहा है—"व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम्"।

'धूमवान् वह्नेः' यहाँ वह्नि-हेतु सोपाधिक होने से व्याप्यत्वासिद्ध है। यहाँ आर्द्रेन्धनसंयोग उपाधि है और आर्द्रेन्धनसंयोग में धूम (साध्य) की व्यापकता गृहीत

In Public domain. Digitization Muthulakshmi Research Academy

व्यापकत्वम् । पर्वतो धूमवान् वह्निमत्त्वादित्यत्रार्द्रेन्धनसंयोग उपाधिः । यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति, अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकता । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम् ।

जैसे— 'पर्वतो धूमवान् वह्निमत्त्वात्" इस अनुमान में आर्द्रेन्धनसंयोग उपाधि है। क्योंकि यहाँ धूम साध्य है, और जहाँ-जहाँ धूम है, वहाँ-वहाँ आर्द्रेन्धन-संयोग रहता है, इसलिए आर्द्रेन्धनसंयोग धूमरूप साध्य का व्यापक हुआ। किन्तु यहाँ वह्नि साधन (हेतु) है, और वह वह्निरूप साधन जहाँ-जहाँ रहता है, वहाँ-वहाँ आर्द्रेन्धन-संयोग नहीं रहता है, जैसे तपे हुए अयोगोलक (लोहा) में वह्नि तो है, परन्तु आर्द्रेन्धनसंयोग नहीं है। इसलिये वह्निरूप साधन का आर्द्रेन्धनसंयोग अव्यापक हुआ। इस प्रकार साध्य का व्यापक होने से और साधन का अव्यापक होने से उक्त अनुमान में आर्द्रेन्धनसंयोग उपाधि है। इसीलिये उपाधियुक्त होने के कारण यहाँ वह्निमत्त्व हेतु व्याप्यत्वासिद्धनामक असिद्ध हेत्वाभास है।

न्यायबोधिनी

भिचारी, स सर्वोऽपि साध्यव्यभिचारीति रीत्या बोध्यः । एवंप्रकारेण प्रकृतानुमानहेतुभूते पक्षे साध्यव्यभिचारोत्थापकतया दूषकत्वमुपाधेः

हिंन्दी-कला

होने पर धूम में आर्द्रेन्धनसंयोग की व्यापकता गृहीत होगी। इसी प्रकार आर्द्रेन्धन-संयोग में वह्नि (साधन) की अव्यापकता यदि गृहीत हुई तो वह्नि में आर्द्रेन्धनसंयोग की अव्याप्यता गृहीत हो जायगी। यही व्यभिचार है। अर्थात् आर्द्रेन्धनसंयोगरूप उपाधि का व्यभिचारित्व जब वह्नि-साधन में गृहीत हो गया तो उपाधिव्याप्य जो धूम, उसका व्यभिचारित्व वह्नि-हेतु में सुतरां गृहीत हो जायगा। क्योंकि जो व्यापक का व्यभिचारी होगा, वह व्याप्य का व्यभिचारी अवश्य होगा। इस प्रकार हेतु में व्यभिचार का अनुमान करा देना उपाधि का प्रयोजन सिद्ध हुआ।

अनुमान का प्रकार यों होगा—वह्नि धूम का व्यभिचारी है, धूमव्यापकार्द्रेन्धन-संयोग का व्यभिचारी होने से, घटत्वादि के समान। जो जिस साध्य के व्यापक का व्यभिचारी होता है, वह उस साध्य का भी व्यभिचारी होता है। इस प्रकार वादीद्वारा प्रयुक्त हेतु को पक्ष बनाकर उसमें साध्य-व्यभिचार के उद्भावन द्वारा वादी के हेतु को दोषयुक्त सिद्ध कर देना उपाधि का फल है। एवं वह्नि-हेतु में धूमाभाववद-

In Public domain. Digitization Muthulakshmi Research Academy

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः, स बाधितः । यथा-वह्निरनुष्णो द्रव्यत्वादिति । अत्रानुष्णत्वं साध्यं, तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यत इति बाधितत्वम् ।

जिस हेतु के साध्य का अभाव प्रत्यक्षादि प्रमाणान्तर से पक्ष में निश्चित हो, वह हेतु बाधितनामक हेत्वाभास है। जैसे—"वह्निरनुष्णो द्रव्यत्वात्" इस अनुमान में द्रव्यत्व-हेतु बाधित है। क्योंकि यहाँ अग्नि में अनुष्णत्व (उष्णत्वाभाव) साध्य है, और उष्णत्वाभाव का अभाव उष्णत्व स्पार्शनप्रत्यक्ष से सभी को अग्नि में गृहीत होता है। इसलिये यहाँ का द्रव्यत्व-हेतु बाधितनामक हेत्वाभास होगा।

॥ इत्यनुमानपरिच्छेदः ॥

न्यायबोधिनी

फलम्। तथाच धूमाभाववदवृत्तित्वाभावरूपधूमव्यभिचारे गृहीते वह्नौ धूमाभाववदवृत्तित्वरूपव्याप्तिज्ञानप्रतिबन्धः फलम्।

न च व्याप्यत्वासिद्धेः व्यभिचारादभेद इति वाच्यम्, धूमाभाववद्वृत्ति-त्वाभावाभावत्वेन व्याप्यत्वासिद्धत्वं, धूमाभाववद्वृत्तित्वेन व्यभिचारित्व-मिति भेदात्।

यस्येति। यस्य हेतोः साध्याभावः—साध्यबाधः, प्रमाणान्तरेण—प्रत्य-क्षादिप्रमाणेन पक्षे निश्चितः, स बाधित इत्यर्थः। तथा च प्रात्यक्षिकसाध्य-बाधनिश्चये जाते साध्यानुमितिप्रतिबन्धः फलम्। बाधितसाध्यकत्वाद् बाधितहेतुरित्युच्यते।

॥ इति न्यायबोधिन्यामनुमानपरिच्छेदः ॥

हिन्दी-कला

वृत्तित्वाभावरूप धूम-व्यभिचार का ग्रहण होने पर धूमाभाववदवृत्तित्वरूप व्याप्ति के ज्ञान का प्रतिबन्ध हो जाना व्याप्यत्वासिद्धि-हेत्वाभास का फल है।

यहाँ यह आपत्ति नहीं दी जा सकती कि "व्याप्यत्वासिद्धि का व्यभिचार के साथ अभेद हो गया" क्योंकि धूमाभाववद्वृत्तित्वाभावाभावत्व रूप से व्याप्यत्वासिद्धि होती है। यही दोनों में भेद है।

जिस हेतु का साध्याभाव अर्थात् साध्य का बाध प्रत्यक्षादि-प्रमाण से पक्ष में पहले से ही निश्चित है, वह हेतु बाधित कहाता है। अतः प्रत्यक्ष-प्रमाण से साध्य के बाध का निश्चय होने पर साध्यानुमिति का प्रतिबन्ध हो जाता है। यही बाधज्ञान का फल है। यद्यपि साध्य ही बाधित होता है, फिर भी उपचार से हेतु को बाधित कहा जाता है।

इति तर्कसंग्रहन्यायबोधिन्याः 'हिन्दी-कलायाम्' अनुमानपरिच्छेदः।

In Public domain. Digitization Muthulakshmi Research Academy

अथोपमानपरिच्छेदः

उपमितिकरणमुपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः, तत्करणं सादृश्यज्ञानम् । तथाहि—कश्चिद् गवयपदार्थमजानन् कुतश्चिदारण्यकपुरुषात् 'गोसदृशो गवय' इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति । तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते ।

उपमितिनामक प्रमा का करण उपमान प्रमाण है । संज्ञा-संज्ञि के सम्वन्ध का ज्ञान उपमिति है । उसका करण (असाधारण कारण) सादृश्यज्ञान है । जैसे —कोई व्यक्ति गवयपदार्थ को नहीं जानता हुआ किसी वनवासी व्यक्ति से यह सुनकर कि—गौ के सदृश गवय होता है—वन में गया और वहाँ गोसदृश गवय होता है, इस वाक्यार्थ का स्मरण करता हुआ गोसदृश पिण्ड को देखता है । उसके वाद वह दृश्यमान जानवर 'गवयशब्दवाच्य है' ऐसी उपमिति उत्पन्न हो जाती है ।

॥ इत्युपमानपरिच्छेदः ॥

न्यायबोधिनी

उपमानं लक्षयति—उपमितिकरणमिति । उपमितिं लक्षयति—संज्ञासंज्ञीति । संज्ञा नाम पदम्, संज्ञी अर्थः, तयोः सम्बन्धः शक्तिः । तथा च पदपदार्थसम्बन्धज्ञानमुपमितिरित्यर्थः । उपमानं नामातिदेशवाक्यार्थज्ञानम् । अतिदेशवाक्यार्थस्मरणं व्यापारः । उपमितिः फलम् । गोसदृशो गवयपदवाच्य इत्याकारकवाक्याद् गोसादृश्यावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारेण यज्ज्ञानं जायते, तदेव करणम् ।

॥ इति न्यायबोधिन्यामुपमानपरिच्छेदः ॥

हिन्दी-कला

उपमिति के करण को उपमान-प्रमाण कहते हैं । संज्ञा और संज्ञी के सम्वन्ध का ज्ञान ही उपमिति है । संज्ञा=पद और संज्ञी=अर्थ कहाता है । इन दोनों का अर्थात् पद और उसके अर्थ का सम्वन्ध शक्ति है । इस प्रकार पद-पदार्थ के सम्वन्ध (शक्ति) का ज्ञान उपमिति है । "गोसदृशो गवयपदवाच्यः" इस अतिदेशवाक्य के अर्थ का ज्ञान उपमान हैं । उक्त अतिदेशवाक्यार्थ का ज्ञान होने के अनन्तर उक्त वाक्यार्थ का स्मरण व्यापार है और गवयपदवाच्यत्व (शक्ति) ज्ञानरूप उमिमिति इस प्रमाण का फल है । इस प्रकार "गोसदृशो गवयपदवाच्यः" इत्याकारक अतिदेशवाक्य से गोसादृश्यावच्छिन्नविशेष्यक गवयपदवाच्यत्वप्रकारक जो ज्ञान पैदा होता है, वही उपमिति-प्रमा का करण है ।

इति तर्कसंग्रहन्यायबोधिन्याः 'हिन्दी-कलायाम्' उपमानपरिच्छेदः ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ शब्दपरिच्छेदः

आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः, यथा—गामानयेति । शक्तं पदम् । अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः ।

आप्तजन का वाक्य शब्द-प्रमाण है । जो यथार्थ (सत्य) बोले, वह आप्त है । पदों के समूह को वाक्य कहते हैं, जैसे—'गाम् आनय' इत्यादि वाक्य है । क्योंकि यहाँ पर 'गाम्' यह सुवन्त-पद और 'आनय' यह तिङन्त-पद एक साथ प्रयुक्त हैं । पदार्थ का बोध कराने में जो शक्तिमान् है, उसे पद कहते हैं । "इस पद से इस अर्थ का बोध करना चाहिये" इस प्रकार का ईश्वरीय-संकेत शक्ति है ।

न्यायबोधिनी

शब्दं लक्षयति—आप्तेति । आप्तोच्चरितत्वे सति वाक्यत्वं शब्दस्य लक्षणम् । (प्रमाणशब्दत्वं लक्ष्यतावच्छेदकम्) । वाक्यत्वमात्रोक्तावनाप्तोच्चरितवाक्येऽतिव्याप्तिरत आप्तोच्चरितत्वनिवेशः तावन्मात्रोक्तौ जबगडदशादावतिव्याप्तिरतो वाक्यत्वम् । आप्तत्वं च प्रयोगहेतुभूतयथार्थज्ञानवत्त्वम् । तथा च प्रयोगहेतुभूतयथार्थज्ञानजन्यशब्दत्वमिति पर्यवसन्नोऽर्थः ।

वस्तुतस्तु पदज्ञानं करणम् । वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थि-

हिन्दी-कला

'आप्तोच्चरितत्वे सति वाक्यत्व' शब्दप्रमाण का लक्षण है । यहाँ केवल शब्द लक्ष्य नहीं है, किन्तु प्रमाणशब्द लक्ष्य है और प्रमाणशब्दत्व लक्ष्यता का अवच्छेदक है । यदि केवल वाक्यत्व शब्दप्रमाण का लक्षण माना जाय तो अनाप्तजन से उच्चारित शब्द में लक्षण की अतिव्याप्ति हो जायगी । अतः आप्तोच्चरितत्व-विशेषण दिया । यदि उक्त विशेषणमात्र लक्षण माना जाय और 'वाक्यत्व' यह विशेष्यभाग न दिया जाय तो जबगडदश् आदि में लक्षण की अतिव्याप्ति हो जायगी । क्योंकि उक्त सूत्र पाणिनि (आप्तपुरुष) से उच्चरित है । किन्तु वाक्यरूप न होने से शब्दप्रमाण के अन्तर्गत नहीं है । आप्त का लक्षण है—प्रयोगहेतुभूतयथार्थज्ञानवत्त्व । अर्थात् शब्द का प्रयोग यथार्थज्ञान के बाद ही होता है । इसलिये शब्दप्रयोग का हेतु जो यथार्थज्ञान, वह जिसे हो, वह आप्त है । इस प्रकार शब्दप्रमाण का पर्यवसित लक्षण है—प्रयोगहेतुभूतयथार्थज्ञानजन्य शब्दत्व । उक्त लक्षण प्राचीन मतानुसार है ।

नव्यों के अनुसार तो पद करण नहीं होता किन्तु पदज्ञान ही शाब्दबोध का करण होता है । इसलिये इस मत में पदज्ञान शब्दप्रमाण है । वृत्तिज्ञानसहकृत

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

तिर्व्यापारः। वाक्यार्थज्ञानं शाब्दबोधः फलम्। वृत्तिर्नाम शक्तिलक्षणान्यतररूपा। शक्तिर्नाम घटादिविशेष्यकघटादिपदजन्यबोधविषयत्वप्रकारक ईश्वरसङ्केतः। ईश्वरसङ्केतो नाम ईश्वरेच्छा. सैव शक्तिरित्यर्थः। शक्तिनिरूपकत्वमेव पदे शक्तत्वम्। विषयतासम्बधेन शक्त्याश्रयत्वमर्थे शक्यत्वम्।

शक्यसम्बन्धो लक्षणा। सा द्विविधा गौणी शुद्धा चेति। गौणी नाम सादृश्यविशिष्टे लक्षणा। यथा सिंहो माणवक इत्यादौ सिंहपदस्य सिंहसादृश्यविशिष्टे लक्षणा। शुद्धा त्रिविधा—जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति। लक्ष्यतावच्छेदकरूपेण लक्ष्यमात्रबोधप्रयोजिका लक्षणा जहल्लक्षणा। यथा गङ्गायां घोष इत्यत्र गङ्गापदवाच्यप्रवाहसम्बन्धस्य तीरे सत्त्वात्तादृशशक्यसम्बन्धरूपलक्षणाज्ञानाद् गङ्गापदात्तीरोपस्थितिः। लक्ष्यतावच्छेदकरूपेण लक्ष्यशक्योभयबोधप्रयोजिका लक्षणा अजहल्लक्षणा।

हिन्दी-कला

पदज्ञान से जनित जो पदार्थोपस्थिति, वही व्यापार है। और वाक्यार्थज्ञानरूप शाब्दबोध इस प्रमाण का फल है। शक्ति-लक्षणा अन्यतर को वृत्ति कहते हैं। साहित्यिकों की व्यञ्जनावृति न्याय में अमान्य है।

"अस्मात् पदात् अयमर्थो बोद्धव्यः" यह ईश्वरीय संकेत ही शक्ति है। उसका परिष्कृत स्वरूप न्यायबोधिनीकार बताते हैं—शक्तिर्नाम इत्यादि। घटादिरूप अर्थविशेष्यक एवं घटादिपदजन्यबोधविषयत्वप्रकारक जो ईश्वर का संकेत, वह शक्ति है। ईश्वरेच्छा ही ईश्वरसंकेत है, और वही पद की अर्थगत शक्ति है। अर्थगत शक्ति का निरूपक होने के कारण पद को शक्त कहते हैं। एवं विषयतासम्बन्ध से ईश्वरेच्छारूप शक्ति का आश्रय होने के कारण पदार्थ को शक्य या शक्यार्थ कहते हैं।

शक्य का सम्बन्ध लक्षणावृत्ति है। वह दो प्रकार की होती है, गौणी लक्षणा और शुद्धा लक्षणा। सादृश्यविशिष्ट में लक्षणा गौणी लक्षणा है। जैसे, 'सिंहो माणवकः' इत्यादिस्थल में सिंह पद की सिंहसादृश्यविशिष्ट में लक्षणा गौणी लक्षणा है।

शुद्धा लक्षणा के तीन भेद हैं—जहल्लक्षणा-अजहल्लक्षणा और जहदजहल्लक्षणा। लक्ष्यतावच्छेदकरूप से लक्ष्यमात्र का बोध कराने वाली लक्षणा जहल्लक्षणा है। जैसे "गङ्गायां घोषः" यहाँ गङ्ग पद का वाच्यार्थ जो प्रवाह, उसका सम्बन्ध तीर में होने से तादृशशक्यसम्बन्धरूप लक्षणा के ज्ञान से गङ्गापद से तीर की उपस्थिति होकर अनन्तर "गङ्गा तीर में घोष है" ऐसा शाब्दबोध हो जायगा। यह जहल्लक्षणा का उदाहरण है

लक्ष्यतावच्छेदकरूप से लक्ष्य और शक्य उभय का बोध कराने वाली लक्षणा

In Public domain. Digitization Muthulakshmi Research Academy

आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः ।

पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा ।

आकाङ्क्षा-योग्यता और सन्निधि ये तीनों ही वाक्यार्थज्ञान के प्रति हेतु हैं।
एक पद का दूसरे पद के अभाव के कारण अन्वयबोध न कराना आकाङ्क्षा है।

न्यायबोधिनी

यथा—काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदस्य दध्युपघातके लक्षणा। लक्ष्यतावच्छेदकं दध्युपघातकत्वम्, तेन रूपेण दध्युपघातकानां सर्वेषां काकबिडालकुक्कुटसारमेयादीनां शक्यलक्ष्याणां बोधात्। जहदजहल्लक्षणा—यथा तत्त्वमसीत्यत्र सर्वज्ञत्वकिञ्चज्ज्ञत्वपरित्यागेन व्यक्तिमात्रबोधनात् वेदान्तिनां मते। सा च शक्यतावच्छेदकपरित्यागेन व्यक्तिमात्रबोधप्रयोजिका।

आकाङ्क्षां लक्षयति—पदस्येति। अव्यवहितोत्तरत्वादिसम्बन्धेन यत्पदे यत्पदप्रकारकज्ञानव्यतिरेकप्रयुक्तो यादृशशाब्दबोधाभावस्तादृशशाब्दबोधे तत्पदे तत्पदवत्त्वमाकाङ्क्षा। यथा घटमित्यादिस्थलेऽव्यवहितोत्तरत्वादि-

हिन्दी-कला

अजहल्लक्षणा है। जैसे, "काकेभ्यो दधि रक्ष्यताम्" यहाँ पर काकपद की दध्युपघातक में लक्षणा है। यहाँ लक्ष्यतावच्छेदक दध्युपघातकत्व है। अतः दध्युपघातकत्वरूप से जितने भी दध्युपघातक हैं; काक सहित विडाल-कुक्कुट-कुत्ता आदि, इन सभी शक्य एवं लक्ष्यों का बोध हो जाता है। यह अजहल्लक्षणा है

जहदजहल्लक्षणा वह है, जहाँ शक्यार्थ का ही कुछ अंश छोड़ दिया जाय और कुछ अंश न छोड़ा जाय, अर्थात् गृहीत कर लिया जाय। जैसे, 'तत्त्वमसि' इस वेदान्तवाक्य में 'तत्' पद का शक्य अर्थ है—'सर्वज्ञत्वविशिष्ट आत्मा' तथा 'त्वम्' पद का शक्य अर्थ है—'किञ्चिज्ज्ञत्वविशिष्ट आत्मा'। किन्तु जहदजहल्लक्षणावृत्ति से सर्वज्ञत्व एवं किञ्चिज्ज्ञत्वधर्म का परित्याग कर आत्ममात्र का बोध होता है और जीव और ब्रह्म का अभेदबोध संपन्न हो जाता है। शक्यतावच्छेदक का परित्याग कर व्यक्तिमात्र के बोध की प्रयोजिका जहदजहल्लक्षणा है, यह तात्पर्य हुआ।

"पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वम् आकाङ्क्षा" यह मूलोक्त आकाङ्क्षालक्षण है। अर्थात् एक पद दूसरे पद के बिना अन्वयबोध न करा सके, यही उन पदों में परस्पर आकाङ्क्षा है। इसे न्यायबोधिनीकार नव्यन्याय की भाषा में परिष्कृत करते हैं—अव्यवहितोत्तरत्वसम्वन्ध से जिस पद में यत्पदप्रकारक ज्ञान न होने के कारण यादृशशाब्दबोध नहीं हो पाता, तादृशशाब्दबोध के प्रति उस पद में अव्यवहितोत्तरत्वसम्बन्ध से तत्पद का वैशिष्टय आकाङ्क्षा है।

In Public domain. Digitization Muthulakshmi Research Academy

अर्थाबाधो योग्यता ।

पदानामविलम्बेनोच्चारणं सन्निधिः ।

तथा च आकाङ्क्षादिरहितं वाक्यमप्रमाणम् । यथा—गौरश्वः पुरुषो हस्तीति न प्रमाणम्—आकाङ्क्षाविरहात् । वह्निना सिञ्चतीति न प्रमाणम्—योग्यताविरहात् । प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणम्—सान्निध्याभावात् ।

वाक्यार्थ का वाधित न होना योग्यता है । विना विलम्ब किये पदों का उच्चारण करना सन्निधि है । इसलिये आकाङ्क्षारहित वाक्य अप्रमाण है । जैसे—"गौः अश्वः पुरुषो हस्ती" यह वाक्य अप्रमाण है, क्योंकि यहाँ पदों में परस्पर आकाङ्क्षा नहीं है । "वह्निना सिञ्चति" यह वाक्य प्रमाण नहीं है, क्योंकि वह्निद्वारा सेचन क्रिया के वाधित होने से वहाँ योग्यता नहीं है । पहर-पहर पर वोले गये, इसीलिये एक साथ नहीं उच्चारित हुए "गाम्—आनय" इत्यादि पद प्रमाण नहीं है, क्योंकि इन पदों में सान्निध्य का अभाव है ।

न्यायबोधिनी

सम्बन्धेन अम्पदं घटपदवदित्याकारक'म्'पदविशेष्यकघटपदप्रकारकज्ञान-सत्त्वे घटीयं कर्मत्वमिति बोधो जायते । अम्घट इति विपरीतोच्चारणे तु तादृशज्ञानाभावात् तादृशशाब्दबोधो न जायतेऽतस्तादृशाकङ्क्षाज्ञानं शाब्दबोधे कारणम् ।

अर्थाबाध इति । बाधाभावो योग्यतेत्यर्थः । अग्निना सिञ्चतीत्यत्र सेककरणत्वस्य जलादिधर्मस्य वह्नौ बाधनिश्चयसत्त्वान्न तादृशवाक्याच्छा-

हिन्दी-कला

जैसे 'घटम्' इत्यादि स्थल में अव्यवहितोत्तरत्वसम्बन्ध से 'अम्' यह विभक्तिपद 'घट' इस नामपद से विशिष्ट होने के कारण अम्पदविशेष्यक घटपदप्रकारक ज्ञान होने से 'घटीयं कर्मत्वम्' अर्थात् 'घटगत कर्मता' ऐसा वोध हो जाता है । किन्तु इसके विपरीत 'अम् घट' ऐसा उच्चारण करने पर घटपद के अव्यवहित उत्तर में अम्पद का ज्ञान नहीं होने से 'घटीयं कर्मत्वम्' यह शाब्दवोध नहीं उत्पन्न होता है । इसलिये उक्त प्रकार का आकाङ्क्षा-ज्ञान शाब्दबोध के प्रति कारण है । विशेष स्पष्टीकरण 'संस्कृत-कला' में द्रष्टव्य है ।

वाक्यार्थज्ञान के प्रति दूसरा कारण योग्यताज्ञान है । अर्थ में बाध का अभाव योग्यता है । जहाँ अर्थ बाधित होगा, वहाँ शाब्दबोध नहीं होगा । जैसे, 'अग्निना

In Public domain. Digitization Muthulakshmi Research Academy

वाक्यं द्विविधम्—वैदिकं लौकिकं च। वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्।

वाक्यार्थज्ञानं शाब्दज्ञानम्। तत्करणं तु शब्दः।

वाक्य दो प्रकार के होते हैं—वैदिक-वाक्य और लौकिक-वाक्य। वैदिक-वाक्य ईश्वरोक्त होने के कारण सभी प्रमाण है। किन्तु लौकिक-वाक्य आप्तजनद्वारा कहा हुआ ही प्रमाण है, शेष (अनाप्तजनद्वारा कथित) वाक्य अप्रमाण है।

वाक्य के अर्थ का बोध शाब्दज्ञान या शाब्दबोध कहाता है। और शाब्दज्ञान का करण (असाधारण कारण) शब्द प्रमाण है।

॥ इति शब्दपरिच्छेदः ॥

न्यायबोधिनी

ब्दबोधः। सन्निधिं निरूपयति—पदानामिति। असहोच्चरितानि=विलम्बोच्चरितानि।

वैदिकमिति। वेदवाक्यमित्यर्थः। इदमुपलक्षणम्। वेदमूलस्मृत्यादीन्यपि ग्राह्याणि। लौकिकं त्विति। वेदवाक्यभिन्नमित्यर्थः। (आप्तत्वं च प्रयोगहेतुभूतयथार्थज्ञानवत्त्वम्)।

॥ इति न्यायबोधिन्यां शब्दपरिच्छेदः ॥

हिन्दी-कला

सिञ्चति' यहाँ पर सेक-करणत्व का अग्नि में बाधनिश्चय है, क्योंकि वह जल का धर्म है, इसलिये उक्तवाक्य से शाब्दबोध नहीं हो सकेगा।

प्रमाणभूत आप्तवाक्य दो प्रकार का है—वैदिक और लौकिक। वैदिकवाक्य का अर्थ है—वेदवाक्य। किन्तु 'वैदिक' यह कहना उपलक्षण मात्र है, इससे वेदमूलक स्मृति-पुराणादिवाक्य भी प्रमाण के अन्तर्गत हैं। वेदवाक्य तो ईश्वरोक्त होने के कारण सब प्रमाण हैं। किन्तु लौकिक वाक्य वे ही प्रमाण हैं, जो आप्तजन द्वारा उक्त हैं। आप्त वह है, जो शब्दप्रयोग के लिए अपेक्षित यथार्थज्ञान वाला हो।

इति तर्कसंग्रहन्यायबोधिन्याः 'हिन्दी-कलायाम्' शब्दपरिच्छेदः।

In Public domain. Digitization Muthulakshmi Research Academy

अथावशिष्टपरिच्छेदः

अयथार्थानुभवस्त्रिविधः—संशय-विपर्यय-तर्कभेदात् ।

एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः । यथा—स्थाणुर्वा पुरुषो वेति ।

मिथ्याज्ञानं विपर्ययः । यथा—शुक्तौ 'रजतम्' इति ।

अयथार्थानुभव तीन प्रकार का होता है—संशय-विपर्यय और तर्क के भेद से ।

एक धर्मी में विरुद्ध नानाधर्म के वैशिष्ट्य (सम्बन्ध) का अवगाहन करने वाला ज्ञान संशय है। जैसे—"यह स्थाणु है या पुरुष है" इस प्रकार का अनिश्चयात्मक ज्ञान संशय कहाता है ।

मिथ्याज्ञान को विपर्यय कहते हैं । जैसे—शुक्ति में हुआ रजत का ज्ञान मिथ्याज्ञान (भ्रमज्ञान) होने से विपर्यय है ।

न्यायबोधिनी

यथार्थानुभवं निरूप्यायथार्थानुभवं विभजते—संशयेत्यादिना ।

एकेति । एकधर्मावच्छिन्नविशेष्यतानिरूपितभावाभावप्रकारकज्ञानं संशय इत्यर्थः। भावद्वयकोटिकसंशयाप्रसिद्धेः (पुरुषो वा) स्थाणुर्वेत्यत्र स्थाणुत्वस्थाणुत्वाभावपुरुषत्वपुरुषत्वाभावकोटिक एव संशय इत्यर्थः ।

मिथ्याज्ञानमिति । अयथार्थज्ञानमित्यर्थः । विपर्ययो नाम भ्रमः ।

हिन्दी-कला

अब तक यथार्थानुभव का निरूपण हुआ । बुद्धि के दूसरे भेद अयथार्थानुभव का विभाग मूलकार करते हैं—अयथार्थानुभव तीन प्रकार का होता है—संशय-विपर्यय और तर्क के भेद से । मूलोक्त संशयलक्षण का परिष्कृत स्वरूप यों है—एकधर्मावच्छिन्ना जो विशेष्यता, उससे निरूपिता जो भावाभावनिष्ठा प्रकारता, तादृशप्रकारताशाली जो ज्ञान, वह संशय है । जैसे, 'तमो द्रव्य न वा' इस संशय में एक तम विशेष्य है, तथा द्रव्यत्व और द्रव्यत्वाभाव ये दो प्रकार हैं । इसलिये एक ही विशेष्य में भावाभावरूप दो विशेषणों का ज्ञान होने से यह संशय है ।

इस प्रकार संशय में एक कोटि भाव की होती है और दूसरी कोटि अभाव की । अतः भावद्वयकोटिक संशय के अप्रसिद्ध होने से "स्थाणुर्वा पुरुषो वा" इस स्थल में स्थाणुत्व और पुरुषत्वकोटिक संशय न होकर स्थाणुत्व-स्थाणुत्वाभाव एवं पुरुषत्व-पुरुषत्वाभावरूप भावाभावकोटिक ही संशय होता है, ऐसा अभिप्राय है ।

विपर्यय का अर्थ है—मिथ्याज्ञान अर्थात् भ्रम ।

In Public domain. Digitization Muthulakshmi Research Academy

व्याप्यारोपेण व्यापकारोपस्तर्कः। यथा—यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति।

स्मृतिरपि द्विविधा—यथार्था अयथार्था च। प्रमाजन्या यथार्था, अप्रमाजन्या अयथार्था।

सर्वेषामनुकूलवेदनीयं सुखम्।

प्रतिकूलवेदनीयं दुःखम्।

व्याप्य के आरोप से व्यापक का आरोप तर्क है। जैसे—"पर्वत में यदि वह्नि न हो तो धूम भी न हो" इस प्रकार का आरोप करना तर्क है। यहाँ वह्न्यभाव व्याप्य है और धूमाभाव व्यापक है।

स्मृति भी दो प्रकार की होती है—यथार्थ स्मृति और अयथार्थ स्मृति। प्रमात्मक ज्ञान से हुई स्मृति यथार्थ स्मृति है और अप्रमात्मक ज्ञान (भ्रमात्मक ज्ञान) से हुई स्मृति अयथार्थ स्मृति है।

सभी के लिये अनुकूल प्रतीत होने वाला सुख है, और प्रतिकूल प्रतीत होने वाला दुःख है।

न्यायबोधिनी

व्याप्यारोपेणेति। तर्के व्याप्यस्य व्यापकस्य च बाधनिश्चयः कारणम्, अन्यथा बाधनिश्चयाभाव इष्टापत्तिदोषेण तर्कानुत्पत्तेः।

सुखं निरूपयति—सर्वेषामिति। इतरेच्छानधीनेच्छाविषयत्वमिति निष्कर्षः। यथाश्रुते घटोऽनुकूल इत्याकारकज्ञानदशायामनुकूलत्वप्रकारक-

हिन्दी-कला

व्याप्य के आरोप से व्यापक का आरोप तर्क है। जैसे—पर्वत में यदि वह्निका अभाव हो तो धूम का भी अभाव होना चाहिये। यहाँ वह्न्यभाव व्याप्य है। इसलिये उसका आरोप होने पर व्यापकीभूत धूमाभाव का भी आरोप होगा। तर्क में वादी प्रतिवादी दोनों को व्याप्य और व्यापक का बाधनिश्चय होना चाहिये, तभी तर्कप्रयोग हो सकता है। इसलिए तर्क में उक्त बाधनिश्चय कारण है (यदि बाध-निश्चय न हो तो इष्टापत्तिदोष के कारण तर्क उत्पन्न ही न हो सकेगा।

सुख का निष्कृष्ट लक्षण है—इतरेच्छानधीनेच्छाविषयत्व। अर्थात् जो स्वत एव इच्छा का विषय हो, अन्य इच्छा के अधीन इच्छा विषय न हो, वह सुख है। यहाँ यदि मूलोक्त यथाश्रुत लक्षण रहने दिया जाय तो "घटोऽनुकूलः" इस प्रकार के अनुकूलत्वप्रकारक ज्ञान की विशेष्यता के घट में भी होने से घट में भी सुख-लक्षण की अतिव्याप्ति हो जायगी। इसलिये 'अनुकूलत्व' सुख का लक्षण नहीं है। परिष्कृत

In Public domain. Digitization Muthulakshmi Research Academy

इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः ।

कामना को इच्छा कहते हैं। किसी के प्रति क्रोध को द्वेष कहते हैं। कृति को प्रयत्न कहते हैं।

न्यायबोधिनी

ज्ञानविशेष्यत्वस्य घटादावपि सत्त्वाद् घटादावतिव्याप्तिरिति। सुखेच्छाधीने भोजनादावतिव्याप्तिवारणाय इतरेच्छानधीनेतीच्छाविशेषणम्। सुखेच्छा तु सुखत्वप्रकारकज्ञानमात्रजन्यैव।

दु.खं निरूपयति—प्रतिकूलेति। अत्रापीतरद्वेषानधीनद्वेषविषयत्वमिति निष्कृष्टलक्षणम्। द्वेषविषयत्वमात्रोक्तौ सर्पादावतिव्याप्तिस्तत्रापि द्वेषविषयत्वसत्त्वादतस्तत्रातिव्याप्तिवारणायेतरद्वेषानधीनेति द्वेषविशेषणम्। सर्पजन्यदुःखादौ द्वेषात्सर्पेऽपि द्वेष इति सर्पद्वेषस्य सर्पजन्यदु खद्वेषजन्यत्वादन्यद्वेषाजन्यद्वेषविषयत्वरूपदुःखलक्षणस्य सर्पादौ नातिव्याप्तिः। फलेच्छा

हिन्दी-कला

लक्षण में भी यदि केवल इच्छाविषयत्व ही कहा जाय तो सुखेच्छाधीन-भोजनादि में भी सुखलक्षण की अतिव्याप्ति होने लगेगी। अतः 'इतरेच्छानधीन' यह द्वितीय इच्छा का विशेषण कहा। सुखेच्छा तो केवल सुखत्वप्रकारक ज्ञान से ही उत्पन्न होती है, न कि वह दूसरी इच्छा के अधीन होती है। अतएव सुख स्वतः काम्य होता है और इतर पदार्थ की कामना सुखेच्छा के अधीन होती है।

'प्रतिकूलवेदनीयत्व' दुःख का लक्षण मूल में कहा गया है। किन्तु यहाँ भी "इतरद्वेषानधीनद्वेषविषयत्व" ही दुःख का निष्कृष्ट लक्षण है। इस लक्षण में भी यदि केवल 'द्वेषविषयत्व' दुःख का लक्षण कहा जाय तो सर्प आदि में भी दुःखलक्षण की अतिव्याप्ति हो जायगी, क्योंकि सर्प में भी द्वेषविषयता है। अतः इस अतिव्याप्ति के निवारणार्थ 'इतरद्वेषानधीन' यह द्वेष का विशेषण कहा गया। सर्प से होने वाले दुःख के प्रति द्वेष के कारण ही सर्प में भी द्वेष होता है। इसलिये सर्पजन्य दुःख के प्रति द्वेष के अधीन ही सर्प के प्रति द्वेष होने से इतरद्वेषानधीनद्वेषविषयत्वरूप दुःखलक्षण की सर्पादि में अतिव्याप्ति न होगी।

सुख और दुःख के उक्त निष्कृष्टलक्षण बनाने का रहस्य यह है कि फलेच्छा उपायेच्छा का कारण होती है, इसी लिये फलेच्छा के अधीन उपायेच्छा होती है। इसी प्रकार फल के प्रति द्वेष होने से उपाय के प्रति द्वेष उत्पन्न होता है, इसलिये फलद्वेष के अधीन उपायद्वेष होता है। फल दो हैं—अनुकूल फल सुख तथा प्रतिकूल फल दुःख।

In Public domain. Digitization Muthulakshmi Research Academy

विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः ।

बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः । बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च । नित्या ईश्वरस्य, अनित्या जीवस्य ।

संस्कारस्त्रिविधः—वेगो भावना स्थितिस्थापकश्चेति ।

वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः ।

अनुभवजन्या स्मृतिहेतुर्भावना, आत्मात्रवृत्तिः ।

अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः, कटादिपृथिवीवृत्तिः । इति गुणाः ।

वेदविहित कर्म के अनुष्ठान से उत्पन्न होने वाला धर्म है, और वेद द्वारा निषिद्ध कर्म के अनुष्ठान से उत्पन्न होने वाला अधर्म कहाता है ।

बुद्धि आदि आठ (बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्म और अधर्म) आत्मा-मात्र के विशेषगुण हैं । इनमें बुद्धि, इच्छा और प्रयत्न, ये तीन गुण नित्य भी हैं, अनित्य भी हैं। ईश्वर के ये तीनों गुण नित्य हैं और जीव के अनित्य हैं ।

संस्कार तीन प्रकार का होता है—वेग भावना और स्थितिस्थापक । वेग-नामक संस्कार पृथिवी-जल-तेज-वायु और मनमें रहता है। अनुभव से जो उत्पन्न हो और स्मृति का हेतु हो, उसे भावना कहते हैं । वह केवल आत्मा में रहती है । अन्य स्थिति में बना दी गई वस्तु को पुनः उसकी पहली अवस्था में ला देनेवाले सस्कार को स्थितिस्थापकनामक संस्कार कहते हैं । वह चटाई आदि पृथिवी-द्रव्य में रहता है ।

न्यायबोधिनी

उपायेच्छां प्रति कारणम्, अतः फलेच्छावशादुपायेच्छा भवति । एवं फले द्वेषादुपाये द्वेषः ।

धर्माधर्मौ निरूपयति—विहितेति । वेदविहितेत्यर्थः । निषिद्धेति । वेद-निषिद्धेत्यर्थः ।

बुद्ध्यादयोऽष्टाविति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा इत्यर्थः ।

संस्कारं विभजते—संस्कार इति । भावनां लक्षयति—अनुभवेति । अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनालक्षणम् । अत्रानुभवजन्यत्वे सतीति

हिन्दी-कला

वेद में विहित कर्म से उत्पन्न धर्म है और वेद में निषिद्ध कर्म से उत्पन्न अधर्म है । बुद्धि से लेकर अधर्म तक अर्थात् बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्म और अधर्म ये आठ विशेषगुण आत्मा मात्र के हैं ।

संस्कार के तीन भेद हैं—वेग-भावना और स्थितिस्थापक । अनुभव से जो जन्य हो और स्मृति का हेतु हो, वह भावना है। इस लक्षण में यदि "अनुभव-जन्यत्वे

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

विशेषणानुपादाने आत्ममनःसंयोगेऽतिव्याप्तिरात्ममनःसंयोगस्य ज्ञानमात्रं प्रत्यसमवायिकारणत्वेन स्मृतिं प्रत्यपि कारणत्वादतस्तदुपादानम्। आत्ममनःसंयोगस्यानुभवजन्यत्वाभावान्नातिव्याप्तिः। तावन्मात्रे कृतेऽनुभवध्वंसेऽतिव्याप्तिः, ध्वसं प्रति प्रतियोगिनः कारणत्वेनानुभवध्वंसस्याप्यनुभवजन्यत्वात्, अतः स्मृतिहेतुत्वोपादानम्। अनुभवध्वंसे स्मृतिहेतुत्वाभावान्नातिव्याप्तिः।

ननु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणता सकलतान्त्रिकमतसिद्धा, यथा दण्डविशिष्टबुद्धिं प्रति दण्डज्ञानं कारणम्। दण्डविशिष्टबुद्धिर्नाम दण्डप्रकारकबुद्धिः। तथाच दण्डप्रकारकबुद्धित्वावच्छिन्नं प्रति दण्डज्ञानत्वेन कारणत्वमित्यापतितम्। दण्डप्रकारकबुद्धिः दण्डी पुरुष इत्याकारकबुद्धिस्तत्र दण्डज्ञानं कारणम्। न हि दण्डमजानानः पुमान् 'दण्डी पुरुषः' इति प्रत्येति। एवं च यत्रायं दण्ड इति प्रत्यक्षं जातं, तदनन्तरं दण्डी पुरुष इत्याकारकप्रत्यक्षमुत्पन्नं, तत्र दण्डी पुरुष इत्याकारकप्रत्यक्षेऽतिव्याप्तिः। तद्धि

हिन्दी-कला

सति" ऐसा विशेषण न दिया जाय तो आत्मा-मन के संयोग में भावनालक्षण की अतिव्याप्ति हो जायगी। क्योंकि आत्मा-मन का संयोग ज्ञानमात्र के प्रति असमवायिकारण होने से स्मृति के प्रति भी हेतु होगा। अतः उक्त विशेषण के उपादान करने से उक्त अतिव्याप्ति नहीं हुई, क्योंकि आत्मा मन के संयोग में अनुभवजन्यत्व नहीं है। एवं यदि अनुभवजन्यत्वमात्र भावना का लक्षण किया जाय तो अनुभवध्वंस में भावनालक्षण की अतिव्याप्ति हो जायगी। क्योंकि ध्वंस के प्रति प्रतियोगी कारण होता है, इसलिये अनुभवध्वंस भी अनुभवरूप अपने प्रतियोगी से जन्य है। अतः भावना के लक्षण में स्मृतिहेतुत्व का भी उपादान किया। अनुभवध्वंस में स्मृतिहेतुत्व नहीं होने से उक्त अतिव्याप्ति नहीं होगी।

शङ्का—विशिष्टबुद्धि के प्रति विशेषणज्ञान कारण होता है, यह सर्वमतसिद्ध है। जैसे, दण्डविशिष्ट बुद्धि (दण्डी-बुद्धि) के प्रति दण्डज्ञान कारण होता है। दण्डविशिष्ट बुद्धि का मानी है—दण्डप्रकारक बुद्धि। अतः दण्डप्रकारकबुद्धित्वावच्छिन्न के प्रति दण्डज्ञानत्वेन रूपेण कारणता प्राप्त हुई। दण्डप्रकारक बुद्धि "दण्डी पुरुषः" इत्याकारक बुद्धि है, उसके प्रति दण्डज्ञान कारण है। क्योंकि दण्ड को नहीं जानने वाला पुरुष "दण्डी पुरुषः" ऐसी प्रतीति नहीं करता है।

अतः जहाँ "अयं दण्डः" ऐसा प्रत्यक्ष हुआ और उसके बाद 'दण्डी पुरुषः' इत्याकारक प्रत्यक्षज्ञान उत्पन्न हुआ, वहाँ उस 'दण्डी पुरुषः' इत्याकारक प्रत्यक्ष में

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

स्वाव्यवहितपूर्वक्षणोत्पन्नदण्डज्ञानात्मकानुभवजन्यं, जनिष्यमाणे दण्डी पुरुष इत्याकारकस्मरणे कारणं च, स्मृतिं प्रत्यनुभवस्य कारणत्वात्। तथा चानुभवजन्यत्वे सति स्मृतिहेतुत्वरूपभावनालक्षणस्य यथोक्त 'दण्डी पुरुष' इत्याकारकानुभवे विद्यमानत्वादतिव्याप्तिरिति चेत्—

अत्र ब्रूमः—अनुभवजन्यत्वं हि अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वम्। तत्र कारणतायामनुभवत्वावच्छिन्नत्वं निवेश्यते। तथा चानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वमिति फलितम्, अतो नोक्तातिव्याप्तिः। तथा हि - दण्डप्रकारकबुद्धित्वावच्छिन्नकार्यतानिरूपितदण्डज्ञाननिष्ठा या कारणता, तस्या न दण्डानुभवत्वमवच्छेदकं, दण्डानुभवादिव दण्डस्मरणादपि दण्डप्रकारकबुद्धेरुत्पत्तेः। अतो दण्डप्रकारकबुद्धित्वावच्छिन्नं प्रति अनुभवस्मरणसाधारणदण्डज्ञानत्वेनैव दण्डज्ञानस्य कारणतायाः स्वीकरणीयत्वेन दण्डज्ञानत्वस्यैव तदवच्छेदकत्वात्। तथा चानुभवत्वावच्छिन्नकारणतानिरूपितकार्यत्वस्योक्तप्रत्यक्षेऽभावान्नातिव्याप्तिः।

हिन्दी-कला

पूर्वोक्त भावनालक्षण की अतिव्याप्ति हो जायगी। क्योंकि 'दण्डी पुरुषः' यह प्रत्यक्षज्ञान अपने अव्यवहित पूर्वक्षण में उत्पन्न दण्डज्ञानरूप अनुभव से जन्य है, तथा भावी 'दण्डी पुरुषः' इत्याकारक स्मृति के प्रति हेतु भी है, क्योंकि स्मृति के प्रति अनुभव कारण होता है। इस प्रकार "अनुभवजन्यत्वे सति स्मृतिहेतुत्व" रूप भावनालक्षण के 'दण्डी पुरुषः' इत्याकारक अनुभव में वर्तमान होने से यहाँ भावनालक्षण की अतिव्याप्ति हो गयी।

समाधान—लक्षण में उक्त अनुभवजन्यत्व का अर्थ है—अनुभवत्वावच्छिन्न जो कारणता, उससे निरूपितकार्यता का आश्रयत्व। यहाँ कारणता में अनुभवत्वावच्छिन्नत्व का निवेश किया गया है। इसीलिये पूर्वोक्त अतिव्याप्ति नहीं होगी। क्योंकि दण्डप्रकारक ('दण्डी पुरुषः' इत्याकारक) बुद्धित्वावच्छिन्नकार्यतानिरूपिता जो दण्डज्ञाननिष्ठा कारणता है, उसमें दण्डानुभवत्व अवच्छेदक नहीं है। अर्थात् उक्त कारणता दण्डानुभवत्वावच्छिन्ना नहीं है। क्योंकि जैसे दण्डानुभव से दण्डप्रकारक बुद्धि उत्पन्न होती है, वैसे ही दण्डस्मरण से भी वह होती है। इसलिये दण्डप्रकारकबुद्धित्वावच्छिन्न के ('दण्डी पुरुषः' इस बुद्धि के) प्रति अनुभव-स्मरणसाधारण दण्डज्ञानत्वरूप से ही दण्डज्ञान की कारणता स्वीकार्य होने से दण्डज्ञानत्व ही कारणता का अवच्छेदक होगा, न कि दण्डानुभवत्व। अतः "अनुभवत्वावछिन्नकारणतानिरूपितकार्यताश्रयत्व" लक्षण की अतिव्याप्ति 'दण्डी पुरुष' इस प्रत्यक्ष में नहीं होगी।

In Public domain. Digitization Muthulakshmi Research Academy

चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।

चलनात्मक क्रिया को कर्म कहते हैं। कर्म के पाँच भेद हैं। उनमें ऊपर देश में संयोग का हेतु कर्म उत्क्षेपण है। नीचे के देश में संयोग का हेतु कर्म अपक्षेपण है। शरीर के निकट-देश में संयोग का हेतु कर्म आकुञ्चन है। शरीर के दूरवर्ती देश में संयोग का हेतु कर्म प्रसारण है। तथा इन चारों से भिन्न सभी प्रकार का कर्म गमन कहाता है।

न्यायबोधिनी

भावनायां तु लक्षणमिदं वर्तते। तथाहि—अनुभवेनैव भावनाख्यसंस्कारोत्पत्त्या भावनात्वावच्छिन्नं प्रत्यनुभवस्यानुभवत्वेनैव कारणतया भावनात्वावच्छिन्नकार्यतानिरूपितानुभवनिष्ठकारणतायामनुभवत्वमवच्छेदकम्। अतोऽनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वं भावनायां वर्तते इति नासम्भवः।

नन्वेवं स्मृतिहेतुत्वविशेषणवैयर्थ्यम्। तद्ध्यनुभवध्वंसेऽतिव्याप्तिवारणाय प्रागुपात्तम्. न हि यथोक्तानुभवजन्यत्वविवक्षायामनुभवध्वंसेऽतिव्याप्तिः प्रसज्यते। तथाहि—ध्वंसत्वावच्छिन्नं प्रति प्रतियोगिनः कारणत्वं प्रतियोगित्वेन रूपेण, तत्तद्ध्वंसत्वावच्छिन्नं प्रति च तत्तत्प्रतियोगिव्यक्तेस्तत्तद्व्यक्तित्वेनेत्येव ध्वंसप्रतियोगिनोः कार्यकारणभावः। तथा च ध्वंसनिष्ठकार्य-

हिन्दी-कला

भावना में तो उक्त परिष्कृत लक्षण संगत ही है। क्योंकि अनुभव से ही भावनाख्य संकार की उत्पत्ति होने से भावनात्वावच्छिन्न कार्य के प्रति केवल अनुभवत्वेन रूपेण अनुभव कारण होता है। इसलिये भावनात्वावच्छिन्ना जो भावनानिष्ठा कार्यता, उस कार्यता से निरूपिता जो अनुभवनिष्ठा कारणता, उसमें अनुभवत्व अवच्छेदक होगा। अत: "अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्व" लक्षण भावना में वर्तमान है। इसलिये उक्त लक्षण में असंभवदोष नहीं होगा।

शङ्का—उक्त प्रकार से लक्षण का परिष्कार करने पर लक्षण में 'स्मृतिहेतुत्व' विशेषण देना व्यर्थ है। यह विशेषण अनुभवध्वंस में भावनालक्षण की अतिव्याप्ति का वारण करने के लिए पहले दिया गया था। किन्तु अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वरूप अनुभवजन्यत्व स्वीकार करने पर अनुभवध्वंस में लक्षण की अतिव्याप्ति प्रसक्त ही नहीं है। क्योंकि ध्वंसत्वावच्छिन्न के प्रति प्रतियोगित्वरूप से

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

तानिरूपिता याऽनुभवनिष्ठा कारणता, तस्यां प्रतियोगित्वमवच्छेदकं तत्तद्व्यक्तित्वं च, न त्वनुभवत्वमपीत्यनुभवध्वंसेऽनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वरूपानुभवजन्यत्वविरहेणैवातिव्याप्तिवारणसम्भवात् कृतं स्मृतिहेतुत्वविशेषणेनेति चेत्—

न, स्मृतावतिव्याप्तिवारणायैव तदुपादानात् । तथाहि-स्मृतिं प्रत्यनुभव एव कारणं न तु स्मृतिरप्यतो घटस्मृतित्वावच्छिन्नं प्रति घटानुभवत्वेनैव कारणत्वं न तु घटज्ञानत्वेन । तथा च घटस्मृतिनिष्ठकार्यतानिरूपिता या घटानुभवनिष्ठा कारणता, तस्यां घटानुभवत्वमवच्छेदकम् । तेनानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्य स्मृतौ विद्यमानत्वादतिव्याप्तिवारणाय स्मृतिहेतुत्वमुक्तम् । न हि स्मृतिः स्मृतिहेतुः, अतो न तत्रातिव्याप्तिरित्यलं पल्लवतल्लजकल्पानल्पजल्पनेन ।

हिन्दी-कला

हीं प्रतियोगी कारण होता है । तथा तत्तद्ध्वंसत्वावच्छिन्न के प्रति तत्तद्व्यक्तित्वरूप से ही तत्तत्प्रतियोगीव्यक्ति कारण होता है । ऐसा ही कार्यकारणभाव ध्वंस और प्रतियोगी में माना गया है । प्रकृत में अनुभवध्वंसनिष्ठकार्यतानिरूपिता जो अनुभवनिष्ठा कारणता है, उसमें प्रतियोगित्व या तत्तद्व्यक्तित्व अवच्छेदक होगा, न कि अनुभवत्व अवच्छेदक होगा । इस प्रकार अनुभवध्वंस में अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वरूप परिष्कृत अनुभवजन्यत्व नहीं रहने से अनुभवध्वंस में अतिव्याप्ति का वारण सुतरां हो जाता है । इसलिये 'स्मृतिहेतुत्व' विशेषण देना व्यर्थ है ।

समाधान—स्मृति में भावनालक्षण की अतिव्याप्ति का वारण करने के लिये ही 'स्मृतिहेतुत्व' विशेषण का उपादान है । क्योंकि स्मृति के प्रति अनुभव ही कारण होता है, न कि स्मृति भी । अतः घटस्मृतित्वावच्छिन्न (घटस्मृति) के प्रति घटानुभव घटानुभवत्वरूप से ही कारण होता है, घटज्ञानत्वरूप से नहीं । इसलिये घटस्मृतिनिष्ठकार्यतानिरूपिता जो घटानुभवनिष्ठ कारणता है, उसमें घटानुभवत्व ही अवच्छेदक होगा । इस प्रकार अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्व के स्मृति में भी विद्यमान होने से उसमें प्रसक्त जो भावनालक्षण की अतिव्याप्ति, उसके वारणार्थ स्मृतिहेतुत्व-विशेषण लक्षण में कहा गया । स्मृति तो अनुभवजन्य होती हुई भी स्मृति का हेतु नहीं है, अतः उसमें परिष्कृत भावनालक्षण की अतिव्याप्ति नहीं हुई । इसे अधिक पल्लवित करना अनावश्यक है ।

In Public domain. Digitization Muthulakshmi Research Academy

नित्यमेकमनेकानुगतं सामान्यम् । द्रव्यगुणकर्मवृत्ति । परं सत्ता, अपरं द्रव्यत्वादि ।

जो नित्य हो, एक हो और अनेक में समवायसम्बन्ध से रहे, वह सामान्य है। वह द्रव्य, गुण और कर्म में रहता है। सामान्य दो प्रकार का होता है—परसामान्य और अपरसामान्य। सत्ता परसामान्य (परजाति) है तथा द्रव्यत्व आदि अपरसामान्य (अपरजाति) है।

न्यायबोधिनी

सामान्यं निरूपयति—नित्यमेकमिति। नित्यत्वे सत्यनेकसमवेतत्वं सामान्यलक्षणम्। नित्यत्वविशेषणानुपादानेऽनेकसमवेतत्वस्य संयोगादौ सत्त्वात्तत्रातिव्याप्तिस्तद्वारणाय नित्यत्वविशेषणम्। अनेकसमवेतत्वानुपादाने नित्यत्वमात्रोपादाने आकाशादावतिव्याप्तिस्तद्वारणायानेकसमवेतत्वम्। अनेकसमवेतत्वानुपादाने नित्यत्वविशिष्टसमवेतत्वमात्रोक्तावाकाशगतैकत्वपरिमाणादौ जलपरमाणुगतरूपादौ चातिव्याप्तिः, जलपरमाणुगतरूपादेराकाशगतैकत्वपरिमाणादेर्नित्यत्वात् समवेतत्वाच्च, अतः अनेकेति समवेतविशेषणम्।

हिन्दी-कला

"नित्यमेकमनेकानुगतं सामान्यम्" यह मूलोक्त सामान्य का स्वरूप है। "नित्यत्वे सति अनेकसमवेतत्वं सामान्यत्वम्" यह सामान्य का परिष्कृत लक्षण है। इसमें "नित्यत्वे सति" यह पद न दिया जाय तो अनेकसमवेतत्व (समवायसम्बन्ध से अनेक में रहना) संयोगादि में भी है, अतः उसमें सामान्यलक्षण की अतिव्याप्ति हो जायगी। उसके वारण के लिये नित्यत्वविशेषण दिया। संयोग तो द्विष्ठ होने से अनेकसमवेत है। यदि "अनेकसमवेतत्व" विशेषण न दिया जाय और नित्यत्वमात्र लक्षण किया जाय तो आकाशादि नित्यपदार्थ में अतिव्याप्ति हो जायगी, उसके वारणार्थ 'अनेकसमवेत' पद दिया। आकाश के नित्य होने पर भी समवेत (समवायसम्बन्ध से वर्तमान) नहीं होने से अतिव्याप्ति नहीं हुई। 'अनेकसमवेतत्व' के अन्तर्गत 'अनेक' पद न दिया जाय, अर्थात् "नित्यत्वविशिष्टसमवेतत्व" मात्र लक्षण किया जाय तो आकाशगत एकत्व एवं परिमाण आदि में तथा जलीयपरमाणुगत रूपादि में भी सामान्यलक्षण की अतिव्याप्ति होने लगेगी। क्योंकि जलीयपरमाणुगतरूप आदि तथा आकाशगत एकत्व-संख्या एवं परिमाण आदि नित्य होते हुए समवेत (समवायसम्बन्ध से रहने वाला) पदार्थ है। अतः 'अनेक' यह समवेत का विशेषण दिया। जलीयपरमाणुगत रूपादि एवं आकाशगत एकत्व-परिमाण आदि एक एक में समवेत होने से अनेकसमवेत नहीं हैं। अतः अतिव्याप्तिदोष का वारण हो गया।

In Public domain. Digitization Muthulakshmi Research Academy

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ।

जो नित्य द्रव्य में रहने वाला एवं इतर का व्यावर्तक (भेदक) है, वह विशेष-नामक पदार्थ कहाता है।

न्यायबोधिनी

नित्यद्रव्यवृत्तय इति। नित्यद्रव्येषु परमाण्वादिषु वर्तमानाः, अत एव व्यावर्तकाः =इतरभेदानुमितिहेतवः = नित्यद्रव्यवृत्तित्वरूपपक्षधर्मताप्रयोज्येतरभेदानुमापकताशालिन इत्यर्थः। नित्यद्रव्यनिष्ठविशेष्यतानिरूपितैकमात्रवृत्तिभेदानुमितिजनकतावच्छेदकप्रकारताश्रयत्वं विशेषाणां लक्षणमिति भावः।

पार्थिवपरमाणौ जलादिभेदानुमापकगन्धेऽतिव्याप्तिवारणाय एकमात्रवृत्तित्वं भेदविशेषणम्। घटादौ तदितरभेदानुमापके तद्रूपादावतिव्याप्ति-

हिन्दी-कला

नित्य द्रव्य में वर्तमान हों और इतर व्यावर्तक हों, वे विशेष हैं। इस मूलोक्त विशेषलक्षण का स्पष्टार्थ यों है—नित्य द्रव्य जो परमाणु आदि हैं, उनमें वर्तमान हों, और इसीलिये व्यावर्तक अर्थात् इतरभेदानुमिति के हेतु हैं। तात्पर्य यह है कि नित्य द्रव्य पक्ष है, उसमें विशेष-हेतु का वर्तमान रहना ही पक्षधर्मता है। इस प्रकार नित्यद्रव्यवृत्तित्वरूप पक्षधर्मता के वल से विशेषपदार्थ इतरभेदानुमापक होता है। इस प्रकार विशेष का यह लक्षण हेतुगर्भ है। अर्थात् नित्यद्रव्यवृत्ति होने के कारण इतरव्यावर्तक (इतरभेदानुमापक) विशेष हैं।

विशेष का परिष्कृत लक्षण यह है—नित्यद्रव्यनिष्ठ जो विशेष्यता, उससे निरूपिता तथा एकमात्रवृत्तिभेदानुमितिजनकता की अवच्छेदिका जो प्रकारता, उसका आश्रयत्व विशेष का लक्षण है। इस परिष्कृत लक्षण का स्पष्टीकरण 'संस्कृत-कला' व्याख्या में द्रष्टव्य है।

भेद में एकमात्रवृत्तित्वविशेषण देने का यह प्रयोजन है कि नित्यद्रव्य पार्थिव परमाणु में जलादिभेद का अनुमापक गन्ध होता है, (जैसे, पार्थिवपरमाणुः जलादिभिन्नः गन्धवत्त्वात्) वहाँ गन्ध में विशेषलक्षण की अतिव्याप्ति न हो। "तद्घटः तदितरभिन्नः, तदीयरूपात्" यहाँ पर एक द्रव्य तद्घट में इतरभेद का अनुमापक तद्रूप में विशेषलक्षण की अतिव्याप्ति न हो जाय, इसके लिये लक्षण में "नित्यद्रव्यनिष्ठ-विशेष्यतानिरूपित" यह प्रकारता का विशेषण कहा। घट के अनित्य द्रव्य होने से तद्रूपनिष्ठा प्रकारता नित्यद्रव्यनिष्ठविशेष्यतानिरूपिता नहीं है। इसलिये अति-व्याप्ति नहीं हुई।

मूलोक्त लक्षण में "नित्यद्रव्यवृत्तयः" यह पद प्रयोजकत्व के अभिप्राय से दिया गया है, तथा 'व्यावर्तकाः' यह पद प्रयोज्यत्व के अभिप्राय से दिया गया है। अर्थात्

In Public domain. Digitization Muthulakshmi Research Academy

नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति।

नित्यसम्बन्ध को समवाय कहते हैं। यह अयुतसिद्ध पदार्थों में रहता है। जिन दो पदार्थों के मध्य एक अविनाश की अवस्था में रहता हुआ दूसरे के आश्रित ही रहता है, वे दोनों अयुतसिद्ध कहे जाते हैं। जैसे—अवयव–अवयवी, गुण-गुणी, क्रिया-क्रियावान्, जाति-व्यक्ति और विशेष-नित्यद्रव्य ये अयुतसिद्ध हैं। अर्थात् अवयवी जबतक रहेगा, अवयव के आश्रित ही होकर रहेगा। ऐसे ही गुण, क्रिया, जाति और विशेष क्रमशः गुणी, क्रियावान्, व्यक्ति और नित्यद्रव्य के आश्रित ही रहते हैं। इसलिये गुण-गुणी आदि भी अयुतसिद्ध पदार्थ हैं।

न्यायबोधिनी

वारणाय निरूपितान्तं प्रकारताविशेषणम्। एतेन 'व्यावर्तका'इत्यस्य नित्यद्रव्यविशेष्यकेतरभेदानुमितिप्रयोजका इत्यर्थकतया लक्षणपरत्वेन साफल्येऽपि नित्यद्रव्यवृत्तय इति विफलमेव, स्वरूपाख्यानस्यापि कृतत्वादिति प्रत्युक्तम्।

समवायं निरूपयति नित्येति। सम्बन्धत्वं विशिष्टप्रतीतिनियामकत्वम्। तावन्मात्रोक्तौ संयोगेऽतिव्याप्तिरतो नित्य इति विशेषणम्। ययो-

हिन्दी-कला

विशेषपदार्थ के इतरव्यावर्तक होने में नित्यद्रव्यवृत्तित्वरूप पक्षधर्मता प्रयोजक है। यही प्रयोज्यप्रयोजकभाव प्रकट करने के लिये "नित्यद्रव्यवृत्तय" यह पद सार्थक होता है। अन्यथा 'व्यावर्तकाः' इस पद का ही "नित्यद्रव्यविशेष्यकेतरभेदानुमिति-प्रयोजकाः" इतना अर्थ होने से लक्षण पर्यवसित हो जाता है, अतः 'नित्यद्रव्यवृत्तयः' यह पद निष्फल ही हो जाता। यह कहना कि—'नित्यद्रव्यवृत्तयः' यह पद लक्षणपरक न होने पर भी स्वरूपकथनमात्र के लिये है अर्थात् वस्तुस्थितिमात्र को बताता है, यही उसकी सार्थकता है—तो यह भी ठीक नहीं है। क्योंकि उक्त प्रयोजन भी 'व्यावर्तकाः' इस पद से ही सिद्ध हो जाता है। अतः प्रयोज्य-प्रयोजकभाव सूचित करने में ही 'नित्यद्रव्यवृत्तयः' इस पद की सार्थकता जाननी चाहिये।

नित्यसम्बन्धत्व समवाय का लक्षण है। अन्य संयोगादि सम्बन्ध अनित्य होते हैं। विशिष्टप्रतीति का नियामकत्व सम्बन्ध का लक्षण है। समवाय के लक्षण में यदि नित्य-पद न दिया जाय, किन्तु सम्बन्धत्वमात्र कहा जाय तो संयोग में समवायलक्षण की अतिव्याप्ति हो जायगी, क्योंकि वह भी सम्बन्ध है। नित्य-पद देने से संयोग के अनित्य होने के कारण अतिव्याप्ति का वारण हो गया।

In Public domain. Digitization Muthulakshmi Research Academy

अनादिः सान्तः प्रागभावः, उत्पत्तेः पूर्वं कार्यस्य ।

सादिरनन्तः प्रध्वंसः, उपत्त्यनन्तरं कार्यस्य ।

त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः । यथा-भूतले घटो नास्तीति ।

जो अनादि होता हुआ सान्त (अन्तवान्) हो, उसे प्रागभाव कहते हैं। जैसे—उत्पत्ति के पूर्व कार्य का प्रागभाव रहता है। जो सादि (आदिमान्) होता हुआ अनन्त हो, उसे प्रध्वंस कहते हैं। जैसे—कार्य का अपनी उत्पत्ति के अनन्तर प्रध्वंस उत्पन्न होता है।

त्रैकालिकसंसर्ग से अवच्छिन्न है प्रतियोगिता जिस अभाव की, वह अभाव अत्यन्ताभाव कहाता है। जैसे—"भूतले घटो नास्ति" यह अभाव अत्यन्ताभाव है।

न्यायबोधिनी

द्वयोर्मध्य इति। यन्निष्ठकालनिरूपिताधेयतासामान्यं यदवच्छिन्नं तदुभया-न्यतरत्वमयुतसिद्धत्वमित्यर्थः ।

अत्यन्ताभावं निरूपयति—त्रैकालिकेति। (प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वे सत्यन्योन्याभावभिन्नत्वे सति अभावत्वमत्यन्ताभावस्य लक्षणम् । ध्वंसप्रागभावान्योन्याभावाकाशादीनां वारणाय यथाक्रमं विशेष-णोपादानम्। वस्तुतस्तु संसर्गाभावत्वं तादात्म्यभिन्नसम्बन्धावच्छिन्नप्रति-

हिन्दी-कला

यद्वृत्तिकालनिरूपित-आधेयतासामान्य जिससे अवच्छिन्न होकर रहे, वे दोनों परस्पर में अयुतसिद्ध कहे जाते हैं। जैसे घट-घटत्व दोनों अयुतसिद्ध हैं, अर्थात् जुदा होकर नहीं रहते। घट को छोड़कर घटत्व कहीं अन्यत्र नहीं रहता और घटत्वविहीन होकर घट भी नहीं रहता। दोनों साथ-साथ काल में रहते हैं। विशेष स्पष्टीकरण 'संस्कृत-कला' में द्रष्टव्य है।

पूर्वोक्त चतुर्विध अभावों में अत्यन्ताभाव का लक्षण कहते हैं—त्रैकालिकसंसर्गा-वच्छिन्नप्रतियोगिताक अभाव अत्यन्ताभाव है। अर्थात् पूर्वकालिकसंसर्गावच्छिन्नप्रतियो-गिताक प्रागभाव होता है तथा ध्वंसोत्तरकालि- संसर्गावच्छिन्नप्रतियोगिताक प्रध्वंसा-भाव होता है। किन्तु अत्यन्ताभाव तो त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताक होता है।

न्यायबोधिनीकार अत्यन्ताभाव का परिष्कृत लक्षण कहते हैं—जो प्रागभाव का अप्रतियोगी होता हुआ ध्वंस का भी अप्रतियोगी हो तथा अन्योन्याभाव से भिन्न अभाव हो, वह अत्यन्ताभाव है। ध्वंस प्रागभाव का प्रतियोगी होता है तथा प्रागभाव ध्वंस का प्रतियोगी होता है, इसलिये ये दोनों छूट गये। तृतीय विशेषण से अन्योन्याभाव छूट गया। और चतुर्थ 'अभावत्व' विशेषण कहने से आकाश का वारण हो गया। इस प्रकार

In Public domain. Digitization Muthulakshmi Research Academy

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः, यथा-घटः पटो नेति ।

सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धम् ।

तादात्म्यसम्बन्ध से अवच्छिन्न है प्रतियोगिता जिस अभाव की, वह अभाव अन्योन्याभाव है । जैसे—"घटः पटो न, पटो घटो न" इत्यादि अभाव अन्योन्याभाव है ।

न्यायसूत्रोक्त प्रमाण-प्रमेयादि सोलह तथा अन्यों द्वारा स्वीकृत शक्ति-सादृश्य-स्वत्व आदि सभी पदार्थों का यथायोग्य उक्त द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय और अभाव में ही अन्तर्भाव हो जाने से पदार्थ के सात ही भेद हैं, यह सिद्ध हुआ ।

न्यायबोधिनी

योगिताकाभावत्वम् । ध्वंसप्रागभावयोश्च न संसर्गावच्छिन्नप्रतियोगिताकत्वमिति तेनैव तद्वारणे त्रैकालिकेति स्वरूपाख्यानमेवेति बोध्यम्)

अन्योन्याभावं निरूपयति—तादात्म्येति । अभावत्रयवारणाय विशेषणम् । घटाभाववान्नेति प्रतीतिविषयघटादिवारणाय विशेष्यम् ।

ननु सादृश्यादीनामतिरिक्तपदार्थानामनिरूपणेन न्यूनतेत्यत आह—

हिन्दी-कला

लक्षणोक्त सभी पदों का उपादान सार्थक है । वस्तुतः मूलोक्त संसर्गाभावत्व का अभिप्राय है—तादात्म्य से भिन्नसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्व । और यही अत्यन्ताभाव का मूलानुसारी लक्षण है । ध्वंस और प्रागभाव तो संसर्गावच्छिन्नप्रतियोगिताक नहीं होते हैं अर्थात् इनकी प्रतियोगिता संसर्गावच्छिन्ना नहीं होती है, इसी से उनका वारण हो जायगा । अतः मूलोक्त लक्षण में जो त्रैकालिक-पद दिया है, वह केवल स्वरूप-कथन के लिये है, न कि ध्वंस और प्रागभाव में अतिव्याप्तिवारण करने के लिये है । अतः लक्षण में त्रैकालिकत्व का सन्निवेश नहीं है । "भूतले घटो नास्ति" यह अत्यन्ताभाव का उदाहरण है ।

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताक अभाव अन्योन्याभाव है । इसमें तादात्म्यसम्बन्धावच्छिन्नत्वविशेषण देने से शेष तीनों अभावों का वारण हो गया । यदि तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्व न कह कर तादात्म्यसम्बन्धावच्छिन्नप्रतियोगित्वावगाहिज्ञानविषयत्व लक्षण किया जाय तो "घटाभाववान्न" इस ज्ञान के विषय घटादि में भी अन्योन्याभावलक्षण की अतिव्याप्ति हो जायगी । अतः "प्रतियोगिताक" यह विशेष्य पद दिया । यहाँ प्रतियोगितानिरूपक घट नहीं हो सकता ।

शङ्का—मीमांसकोक्त सादृश्य-शक्ति आदि तथा न्यायसूत्रोक्त प्रमाण आदि अतिरिक्त पदार्थों का यहाँ निरूपण नहीं करने से ग्रन्थकार की न्यूनता क्यों न सिद्ध हुई ?

In Public domain. Digitization Muthulakshmi Research Academy

काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

कणादमुनिद्वारा प्रतिपादित वैशेषिक एवं गौतममुनिद्वारा प्रतिपादित न्यायमतों में बालकों की व्युत्पत्ति (बोध) सिद्धि के लिए विद्वान् अन्नम्भट्ट ने इस तर्कसंग्रहनामक ग्रन्थ की रचना की ।

॥ इति श्रीमहामहोपाध्यायान्नम्भट्टविरचितस्तर्कसंग्रहः समाप्त ॥

न्यायबोधिनी

सर्वेषामिति । प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वादजल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम' इति न्यायस्यादिमसूत्र उक्तानां प्रमाणप्रमेयादीनामित्यर्थः ।

तद्भिन्नत्वविशिष्टतद्गतभूयोधर्मरूपसादृश्यस्यापि घटपटादिरूपत्वेन नातिरिक्तत्वम् । एवमन्येषामप्यूह्यम् ।

काणादेति । कणादस्येदं काणादम् । काणादन्यायमते इति द्वन्दगर्भकर्मधारयः । कणादप्रोक्तगौतमप्रोक्तमतयोरिति यावत् । काणादन्यायाभिन्नमतद्वयविषय(क)बालसमवेताभिन्नव्युत्पत्तिसिद्धिप्रयोजकान्नंभट्टविद्वनिष्ठभूतकालीनकृतिविषयाभिन्नस्तर्कसंग्रहाख्यग्रन्थ इत्यन्वयबोधः ।

हिन्दी-कला

समाधान— न्यायसूत्रोक्त प्रमाणप्रमेयसंशयप्रयोजनादि का यथायोग्य इन्हीं सात पदार्थों में अन्तर्भाव होने से न्यूनता नहीं है । इसी प्रकार "तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूप सादृश्य भी घट-पटादि द्रव्यरूप होगा तथा कहीं गवादिरूप होगा, अतः यह सप्तातिरिक्त नहीं है ।

विशेष स्पष्टीकरण 'संस्कृत-कला' व्याख्या में द्रष्टव्य है ।

ग्रन्थ के अन्त में उल्लिखित "काणादन्यायमतयोः" इस श्लोक में काणादपद कणादप्रोक्तपरक है, तथा न्यायपद गौतमप्रोक्तपरक है । अतः पहले काणादपद और न्यायपद में द्वन्द्वसमास होगा, जिसका अर्थ होगा "दोनों महर्षियों द्वारा प्रोक्त । पुनः काणादन्यायपद का द्विवचनान्त 'मते' इस पद के साथ कर्मधारयसमास होगा । इस प्रकार काणाद और न्याय से अभिन्न जो मतद्वय अर्थात् कणादप्रोक्त और गौतमप्रोक्त से अभिन्न जो मतद्वय, तद्विषयक बालक में समवेत (समवायसम्बन्ध से वर्तमान) जो व्युत्पत्ति, उसकी सिद्धि की प्रयोजका जो अन्नंभट्टनामक विद्वान् में स्थित भूतकालीना कृति, उसका विषय यह तर्कसंग्रहनामक ग्रन्थ है । इस प्रकार का अन्वयबोध उक्त श्लोक से होता है ।

In Public domain. Digitization Muthulakshmi Research Academy

न्यायबोधिनी

कृष्णावलम्बिनो गाः पूषा गोवर्धनस्तमभ्यर्चन् ।
विपुलाभीरसभाजनजितविबुधेन्द्रस्तवाभिरचनाभिः ॥

॥ इति तर्कसंग्रह-न्यायबोधिनी समाप्ता ॥

हिन्दी-कला

"हे कृष्ण ! सच्चिदानन्दघन परमात्मन् ! मेरी समस्त इन्द्रियों को अपने चरणारविन्द में लगाते हुए रक्षा करो" इस बुद्धि से समस्त संसार के प्रकाशक भगवान् भास्कर के समान जिज्ञासुजन को न्यायशास्त्र के व्याख्यान से समस्त पदार्थों का बोध कराने वाले गोवर्धन सुधी, रसों के शिरोमणिभूत भक्तिरस से पूरित होने के कारण महापण्डितों द्वारा की गई स्तुतियों को भी जीतने वाले अपने प्रशस्त वाणी-विलासों द्वारा उस परमात्मभूत भगवान् कृष्ण की अभ्यर्चना करते हैं ।

इति न्यायवेदान्तसांख्ययोगाचार्यश्रीकेदारनाथत्रिपाठि-
प्रणीतायां तर्कसंग्रहन्यायबोधिन्याः
'हिन्दी-कला' व्याख्यायामवशिष्टपरिच्छेदः पूर्णः ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ॥

इति न्यायविद्याप्रशस्तिः

In Public domain. Digitization Muthulakshmi Research Academy

अथ तर्कसङ्ग्रहन्यायबोधिन्याः

'संस्कृत-कला' व्याख्या

प्रत्यक्षपरिच्छेदः

विश्ववन्द्यपदपद्मरेणुभिः स्पर्शमात्रधृततारणव्रतैः ।
ईश्वरस्य भवलीनमानसान् स्वान् कथं नहि पुनीमहि द्रुतम् ? ॥
यं तमीश्वरममन्यतैव वै भिन्नधीमिरखिलोऽपि मानवः ।
न्यायतोऽपि मतिमानयन्नयं तं नमंश्च कुरुते कुतूहलम् ॥
न्या.बो. शास्त्राण्यप्यञ्जसा भान्ति भास्वतो यस्य सत्तया ।
पृ.१. सूर्य्यनारायणं शुक्लं गुरुं तं नौमि विश्रुतम् ॥

"समाप्तिकामो मङ्गलमाचरेदिति" श्रुतिप्रामाण्यात् चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं मङ्गलकरणं नितरामावश्यकमिति निश्चित्य मनसि विधीयमानं मङ्गलं शिष्या अप्येवं कुर्य्युरिति बुद्ध्या ग्रन्थादौ निबध्नन् चिकीर्षितं प्रतिजानीते—अखिलेति । अखिलानागमान् सञ्चरति तच्छीलमिति विग्रहे "सुप्यजातौ णिनिस्ताच्छील्ये" इति पाणिनिसूत्रेण णिनिः । तत्—समस्तागमजन्य-प्रतिपत्तिविषयमित्यर्थः । समस्तागमप्रतिपाद्यमिति यावत् । भूप्रभृतिभागानां मनुष्यादिकर्तृकसञ्चाराश्रयत्ववत् आगमानां भगवत्कर्तृकयथाश्रुतसञ्चारानाश्रयत्वादिति भावः । कृष्ण इति आख्या यस्य तत् कृष्णाख्यम् इति पूर्वं बहुव्रीहिः समासः, पश्चात् श्रिया युक्तं कृष्णाख्यं श्रीकृष्णाख्यमिति मध्यमपदलोपिसमासः, न तु श्रिया युक्तः कृष्णः श्रीकृष्णः, श्रीकृष्ण इति आख्या यस्य तत् श्रीकृष्णाख्यमिति रीत्या समासः, श्रीशब्दस्य नामानन्तर्गतत्वात् । श्रीशब्दस्यापि नामान्तर्गतत्वे तु हर्यादिपदानां द्व्यक्षरत्वानुपपत्तिः । परं—लोकोत्तरम्, महः—तेजः । "तस्य भासा सर्वमिदं विभाति" इति श्रुतिबलाद् भगवतस्तेजोरूपतोक्तिर्युक्तैव । ध्यात्वा—तद्विषयकध्यानोत्तरमित्यर्थः । क्त्वाप्रत्ययस्य अव्यवहितोत्तरार्थकत्वादिति भावः । सुष्ठु ध्यायतीति सुधीः—विद्वान् । गोवर्धननामा सुधीः गोवर्धन-सुधीरिति शाकपार्थिवादिपदवत् मध्यमपदलोपिसमासः । न्यायबोधिनीम्—एतन्नाम्नीं न्यायपदार्थबोधिकां व्याख्यां, तनुते—विस्तारयति, विवरणग्रन्थनिर्माणेन बहुतरसम्बद्धां करोति । तर्कसंग्रहग्रन्थतत्त्वार्थान् भूयसः शिष्यान् बोधयतीति तु फलितोऽर्थः ।

In Public domain. Digitization Muthulakshmi Research Academy

चिकीर्षितस्य तर्कसंग्रहग्रन्थस्य निर्विघ्नसमाप्त्यर्थं श्रीमदन्नम्भट्टेन कृतस्येष्ट-देवतानमस्कारात्मकमङ्गलस्य तेनैव यो ग्रन्थादौ निबन्धः कृतस्तस्य शिष्यशिक्षा-रूपप्रयोजनं ज्ञापयन्ति न्यायबोधिनीकारः—चिकीर्षितस्येत्यादिना ।

न्या.बो. 'अथ पदार्थान् विभजते' इत्यत्र 'अथेति' शब्द आनन्तर्यार्थः, मङ्गलकरणा-
पृ.२. नन्तरमित्यर्थः । वस्तुतस्तु तर्कसंग्रहग्रन्थस्य बालानां सुखबोधार्थं कृतत्वात् ये ग्रहण-धारणपटवस्तेषामेवात्र बालत्वात्—शिष्याणां पठिष्यमाणविषयग्रहणधारणपटुत्व-सम्पत्त्यनन्तरमित्यर्थः । 'पदार्थान् विभजते' इत्यत्र द्वितीयाविभक्तेः कर्मत्व-मर्थः । धातूत्तरप्रत्ययस्य कृतिमत्त्वर्थः । तथा च पदार्थकर्मकविभागानुकूलकृतिमान् मूलकार इति सम्पूर्णवाक्याद् बोधः । विभागपदार्थश्च स्वसमभिव्याहृतपदार्थता-वच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मप्रकारकबोधानुकूलो व्यापारः । अत्र च स्वपदेन विपूर्वकभज्धातुः ग्राह्यः । तत्समभिव्याहृतम् अर्थात् तत्सन्निकटे विद्यमानं पदं—पदार्थानिति पदं, तदर्थतावच्छेदकं पदार्थत्वम्, तद्व्याप्या मिथोविरुद्धाश्च यावन्तो धर्माः—द्रव्यत्व, गुणत्व, कर्मत्व, सामान्यत्व, विशेषत्व, समवायत्वा-भावत्वधर्माः । यतो हि यथा यत्र यत्र धूमोऽस्ति तत्र तत्र वह्निरवश्यं विद्यते तस्माद् धूमो वह्निव्याप्य इति कथ्यते । तथैव यत्र यत्र द्रव्यत्वादयः सप्त धर्माः सन्ति तत्र तत्र पदार्थत्वमवश्यमस्ति, तस्मात् पदार्थत्वव्याप्या द्रव्यत्वादिधर्माः । मिथो विरुद्धास्ते द्रव्यत्वादिधर्मा इत्यत्र तु शङ्कैव नास्ति । नहि द्रव्यत्वाधिकरणे गुणत्वम्, गुणत्वाधिकरणे द्रव्यत्वं वास्ति । एवमन्यत्रापि । यावद्धर्मप्रकारकबोधाः—इदं द्रव्यम्, अयं गुणः, इदं कर्म, इदं सामान्यं, अयं विशेषः, अयं समवायः, अयमभाव इति बोधाः सन्ति । तथाहि प्रत्येकं सविकल्पके ज्ञाने कश्चित् प्रकारो भवति कश्चिद् विशेष्य इति । यथा अयं घट इति ज्ञाने घटत्वं प्रकारः घटश्च विशेष्यो भवति, तथा इदं द्रव्यमित्यादिपूर्वोक्तज्ञानेष्वपि द्रव्यत्वगुणत्वादयः प्रकाराः सन्ति, तस्मात् पूर्वोक्ता बोधाः द्रव्यत्वादिप्रकारकाः जाताः, तादृश-बोधानामनुकूलो व्यापारः द्रव्य, गुण, कर्म, सामान्य विशेष, समवायाभावा इति रीत्या पृथक्-पृथक् लेखनकथनादिरूपः, स एव च विभागपदेन कथ्यते । अग्रेप्येव-मेव द्रव्याणि विभजते, गुणान् विभजते इत्यादिस्थलेषु विभागपदार्थो वेदितव्यः ।

ननु द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः पदार्थाः इति लेखनमात्रेण गणयित्वैव सप्त पदार्था इति ज्ञानसंभवे सप्तग्रहणं किमर्थमित्यत आह—तत्रेत्यादि । तत्र—द्रव्यगुणेत्यादिवाक्ये, सप्तग्रहणम्—सप्तपददानमित्यर्थः । व्याप्तिलाभायेति । साहचर्यनियमो हि व्याप्तिः । यथाहि यत्र यत्र धूमो विद्यते तत्र तत्र वह्निरस्तीति धूमो वह्निव्याप्यो भवति, तथा यत्र यत्र पदार्थत्वं तत्र तत्र द्रव्यादिसप्तान्यतमत्व-मस्ति, अर्थात् स स द्रव्यादिसप्तानाम् अन्यतम एव भवति । यथा पदार्थत्वं द्रव्ये-

In Public domain. Digitization Muthulakshmi Research Academy

ऽस्ति तर्हि द्रव्यमपि सप्तसु अन्यतममेव वर्त्तते। एवं पदार्थत्वाश्रयाः प्रत्येकं गुणादयोऽपि द्रव्यादिषु सप्तसु अन्यतमा एव वर्तन्ते। अतः पदार्थत्वं द्रव्यादिप्तान्यतमत्वव्याप्यमिति सिद्धमेव। तथा चैतादृशव्याप्तिलाभायैव सप्तग्रहणमिति।

अयं भावः—यथा धूमो वह्निव्याप्यः सन् वह्न्यभावस्थाने न भवति किन्तु वह्न्यधिकरणे एवोत्पद्यते, तथैव पदार्थत्वमपि द्रव्यादिसप्तान्यतमत्वव्याप्यं सत् द्रव्यादिसप्तान्यतममतिक्रम्य न तिष्ठति किन्तु तदन्तर्गतमेव तिष्ठति। अर्थात् द्रव्यादिसप्तभ्योऽन्योऽष्टमः कश्चित् पदार्थ एव न भवतीति स्पष्टं भवति।

सप्तैव पदार्था इति पूर्वोक्तं दूषयितुं शक्तिरूपमष्टमं पदार्थमाशङ्कते-नन्विति। तथाहि मण्यादीति। अयमत्र पूर्वपक्षाशयः। काष्ठादिरूपेन्धनादौ वह्नेः संयोगे सति दाहो जायते, किन्तु तत्रैव चन्द्रकान्तमणिसंयोगे कृते वह्निसत्त्वेऽपि दाहो न जायते, तस्य मणेरपसारणे तु जायते। अतःकल्प्यते यत् मणिसमवधाने वह्नेः दाहकताशक्तिर्नश्यति, सैव शक्तिर्मण्यभावदशायामुत्पद्यते इति। तस्मादेतत् सिद्ध्यति यत् अस्त्येका शक्तिर्या उत्पद्यते विनश्यति चेति। सैव चाष्टमः पदार्थ इति। अत्रोत्तरमाह—**मणेः प्रतिबन्धकत्वेनेति।**

अयमत्र समाधानाशयः—यथा कुलालो यदा घटं कर्तुमारभते तदैव यदि कश्चित् राजपुरुष आयाति तदा इच्छन्नपि स घटं कर्तुं न पारयति, तेन किं कुलालस्य घटकरणशक्तिर्नष्टा? नहि, किन्तु तत्र राजपुरुषस्य प्रतिबन्धकत्वं मन्यते तदभावस्य च कारणत्वं मन्यते। तथैव मणिसमवधाने वह्निसत्त्वेऽपि यदि दाहो न जायते तदा वह्नेर्दाहकताशक्तिर्नष्टा इति न मन्तव्यम्, किन्तु मणेर्दाहं प्रति प्रतिबन्धकत्वमेव तत्र स्वीकरणीयम्। प्रतिबन्धकसत्त्वे कार्य्यस्याजननात् प्रतिबन्धकाभावस्यापि कार्यं प्रति कारणत्वस्वीकारात्। तदानीं प्रतिबन्धकाभावरूपं कारणमेव नास्तीति कुतो दाहो जायेत? मण्यभावदशायान्तु प्रतिबन्धकाभावरूपकारणसत्त्वात् दाहो भविष्यत्येवेति न काचित् क्षतिः। तस्मादनेनैव पथा सर्वनिर्वाहे व्यर्था शक्तिकल्पना। नहि युक्त्यभावादेव शक्तिरस्वीकारार्हा, दोषादपि नाङ्गीकारार्हेत्याह **अनन्तेति।** तथा च वारं वारं मण्यपसारणेऽनन्ताः शक्तयः, मणिस्थापने चानन्तास्तासां ध्वंसाः प्रागभावाश्च स्वीकरणीया भविष्यन्तीति महदन्याय्यमिति भावः। अक्षरार्थस्तु व्याख्यानुसारी स्वयं करणीयः।

न्या.बो. **द्रव्याणि विभजते इति।** अस्यापि द्रव्यकर्मकविभागानुकूलव्यापारवान्
पृ.३. मूलकार इति पूर्वरीत्यैवार्थः :

पूर्वाचार्य्यैः नवानामेव पृथिव्यादीनां द्रव्याणां स्वीकृतत्वात् तद्दूषयितुं तमोरूपं दशमं द्रव्यमाशङ्कते—**नन्वित्यादिना। तथाहीति।** नीलं तमश्चलतीति प्रतीतिः तमसि नीलरूपं चलनक्रियाञ्च बोधयति। यद् गुणवत् क्रियावद्

In Public domain. Digitization Muthulakshmi Research Academy

वा भवति तद् द्रव्यं भवति, तस्मात् तमोऽपि नीलरूपगुणवत् चलनक्रियावच्च वर्ततेऽतः तदपि द्रव्यं सिद्धं भवति इति भावः। नवद्रव्यवादी शङ्कते—न चेति। क्लृप्तद्रव्येषु—निश्चितेषु नवद्रव्येष्वित्यर्थः। अन्तर्भावात् तेष्वेवान्तःपातित्वात्, दशमं द्रव्यं तमो नास्तीत्याशयः। दशमद्रव्यत्ववाद्युत्तरयति—तमसो रूपवत्त्वादिति। अयं भावः—तमसो वायौ, आकाशकालदिगात्ममनःसु च नान्तर्भावः, तमसो रूपवत्त्वात् तेषाञ्च नीरूपत्वात्। न पृथिव्यामन्तर्भावः, तस्या गन्धवत्त्वात् तमसश्च गन्धरहितत्वात्। न जलतेजसोरन्तर्भावः, तयोःक्रमेण शीतोष्णस्पर्शवत्त्वात् तमसश्च निःस्पर्शत्वात्। तस्मान्नवसु कुत्राप्यनन्तर्भावात् तमसो दशमद्रव्यत्वम् सिद्धमेवेति।

अत्र सिद्धान्ती समाधत्ते—नेति। अयं भावः—तमो न कश्चित् भावपदार्थो येन तस्य दशमद्रव्यत्वशङ्कापि स्यात्। यतो हि भावपदार्थ एव द्रव्यं कथ्यते, तमस्तु तेजोऽभावरूपं सत् सप्तमे पदार्थे एवान्तर्भवति। तस्मात् तमसो दशमद्रव्यत्वं दूरमास्ताम्, द्रव्यत्वमेव तस्य नास्तीति भावः। अतिरिक्तकल्पनायाम्—दशमद्रव्यत्वकल्पनायाम्। द्रव्यत्वमेव तस्य नास्तीति भावः। तेजोऽभावरूपत्वेनैवोपपत्तौ—तेजोऽभावस्वरूपस्य तस्याङ्गीकारेणैव सर्वदोषपरिहारे। अतिरिक्तकल्पनायाम्—दशमद्रव्यत्वकल्पनायाम्। मानाभावात्—प्रमाणं नास्तीत्यर्थः।

न्या.बो. ननु तेजोऽभावरूपं तम इति भवतोच्यते, तेज एव तमोऽभावस्वरूपं कथन्न
पृ.४. मन्यते ? अयमेव पक्षो युक्तोऽयं न युक्त इत्यत्र विनिगमनाया अर्थात् एकतरपक्षसाधिकाया युक्तेरभावादिति शङ्कते—न चेत्यादिना। समाधत्ते—तेजसोऽभावरूपत्वेति। अयं सारः—तेजो यदि भावपदार्थो न स्यात् तर्हि सर्वैरनुभूयमानस्योष्णस्पर्शस्य किं द्रव्यमाश्रयः स्यात् ? पृथिव्यादयस्तु नाश्रयो भवितुमर्हन्ति, तेषामनुष्णत्वात्। किन्तु अतिरिक्तमेव किमपि द्रव्यं कल्पनीयं स्यात्। तथाच यदि तेजो द्रव्यमपलप्यते तदाऽन्यद् द्रव्यं शिरस्यापतत्येवेति गौरवं स्यात्। तस्मादुष्णस्पर्शगुणाश्रयतया तेजो द्रव्यं स्वीकरणीयम्, तमश्च तेजोऽभावरूपमङ्गीकरणीयमिति। तर्हि नीलं तमश्चलतीति प्रतीतेः का गतिर्भविष्यतीत्यत आह—तमसीति। नीलरूपप्रतीतिश्चलनक्रियाप्रतीतिश्च तमसि भ्रमात्मिके एव स्त इति। दीपश्चलति न तम इति भावः।

न्या.बो. समवायेन गन्धवत्त्वं पृथिव्या लक्षणमित्यर्थः। अस्य लक्षणस्य पृथिवी लक्ष्या।
पृ.१. अयं भावः—लक्ष्यते ज्ञायतेऽनेनेति व्युत्पत्त्या करणे ल्युट्प्रत्ययेन लक्षणपदं सिद्ध्यति। अर्थात् येन स्वरूपेण पदार्थो ज्ञायते तदेव स्वरूपम् लक्षणं कथ्यते। यथा—सास्नया अयं गौरिति ज्ञायते स्मात् सास्ना गोर्लक्षणम्। अत्रैव गन्धेनैव ज्ञायते इयं पृथिवीति तस्मात् गन्धवत्त्वं पृथिव्या लक्षणमिति। लक्षणेन च यज्ज्ञायते तदेव लक्ष्यमिति कथ्यते। यथा सास्नारूपलक्षणेन गोर्ज्ञानं भवति 'अयं

In Public domain. Digitization Muthulakshmi Research Academy

न्या.बो.गौरिति' तस्माद् गौर्लक्ष्यः । अत्रापि गन्धेन लक्षणेन पृथिवी ज्ञायते 'इयं पृथिवीति'
पृ.९. तस्मात् पृथिवी लक्ष्या । एवमेवान्यत्रापि लक्ष्यलक्षणव्यवस्था ज्ञेया । वर्तमानेत्यस्मिन्नर्थे निष्ठशब्दो नव्यनैयायिकैर्व्यवह्रियते । लक्ष्यस्य भावो लक्ष्यता । सा च लक्ष्यता पृथिवीरूपे लक्ष्ये वर्ततेऽतो वक्तव्यं 'लक्ष्यता पृथिवीनिष्ठेति । एवमेव ब्राह्मणत्व यज्ञदत्तेऽस्ति चेत् यज्ञदत्तनिष्ठब्राह्मणत्वमिति वक्तव्यम् । एवमन्यत्रापि । पृथिवीनिष्ठा या लक्ष्यता तस्या अवच्छेदकं पृथिवीत्वम् । तदेवोपपादयति बोधिनीकारः—यद्धर्मावच्छिन्नमिति ।

अर्थात् लक्ष्यं पृथिव्यादिकं येन धर्मेणावच्छिन्नं (विशिष्टं) स धर्मो लक्ष्यवच्छेदकः । प्रकृते लक्ष्या पृथिवी पृथिवीत्वेन धर्मेण अवच्छिन्ना अस्ति, तस्मात् पृथिवीनिष्ठलक्ष्यतावच्छेदकं पृथिवीत्वम् ।

अयमत्र सारसारः—लक्ष्यता सर्वेष्वेव पदार्थेष्वस्ति । न हि जगति कोऽपि पदार्थोऽस्ति यो लक्ष्यो न भवेत् । तथा सर्वोऽपि पदार्थो यदि लक्ष्योऽस्ति तदा लक्ष्यताऽपि पृथिवीजलादिसकलनिष्ठाऽस्ति । अवच्छिन्नत्ति—विशिनष्टि—व्यावर्तयतीत्यवच्छेदकम् । तथा च प्रकृते पृथिवीत्वं धर्मः पृथिवीनिष्ठां लक्ष्यतां जलादिनिष्ठलक्ष्यताभ्यो व्यावर्तयति । तस्मात् पृथिवीत्वं पृथिवीनिष्ठलक्ष्यतावच्छेदकं भवति । अश्वत्वम् अश्वनिष्ठलक्ष्यतावच्छेदकं भवतीति । निष्ठपदार्थो न विस्मरणीयः, अन्यथाऽसामञ्जस्यमुत्पद्येत ।

एवं पृथिवीनिष्ठा लक्ष्यता पृथिवीत्वावच्छिन्ना । अत्र नियममाह—**यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्न इति ।** प्रकृते पृथिवीत्वं लक्ष्यताया अवच्छेदकं विद्यतेऽतो लक्ष्यता पृथिवीत्वावच्छिन्ना । अत एव पृथिवीत्वावच्छिन्नपृथिवीनिष्ठलक्ष्यतानिरूपितेत्यादिरीत्या योजयित्वा लम्बायमानं वाक्यं रचयन्ति नव्याः । एतच्चाग्रे स्फुटीभविष्यति । लक्ष्यतावत् प्रतियोगिता—अनुयोगिता—विधेयता—उद्देश्यता—आधेयता—अधिकरणता—कार्यता— कारणता—पक्षता—साध्यता—हेतुता—प्रतिबध्यता—प्रतिबन्धकता—शक्यता— शक्तता—इत्यादीन्यपि भवन्ति । लक्ष्यतावच्छेदकवच्च प्रतियोगितावच्छेदकम्—अनुयोगितावच्छेदकं—विधेयतावच्छेदकमित्यादीनि भवन्ति । स्थाने स्थाने सर्वाणि विविच्य दर्शयिष्यन्ते । अत्र तावदेषां नाममात्रं स्मरणीयम् ।

ननु यदि गन्धवत्त्वं पृथिव्या लक्षणं तदोत्पत्तिकालीनो घटः पृथिवी न स्यात्, तदानीं तत्र घटे गन्धवत्त्वलक्षणाभावात् । यतो हि नैयायिका मन्यन्ते—उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियञ्च तिष्ठतीति । तथा चोक्तलक्षणस्योत्पत्तिकालीने घटेऽव्याप्तिरिति शङ्कायां लक्षणान्तरमाह—**गन्धसमानाधिकरणेति ।** गन्धेन समानमधिकरणं यस्याः सा गन्धसमानाधिकरणा, सा चासौ द्रव्यत्वव्याप्यजातिश्चेति गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिरिति समस्तं पदम् ।

In Public domain. Digitization Muthulakshmi Research Academy

अयमर्थः—गन्धसमानाधिकरणा जातिः पृथिवीत्वजातिः। यतो हि यत्र गन्धो वर्तते तत्र पृथिवीत्वमपि वर्तते एव। एवं द्रव्यत्वव्याप्या च जातिः पृथिवीत्वजातिः। व्याप्यत्वमल्पदेशवृत्तित्वम्। तथा च द्रव्यत्वम् पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनःसु सर्वेषु वर्तते, पृथिवीत्वन्तु पृथिवीमात्रवृत्ति। अतः द्रव्यत्वापेक्षयाऽल्पदेशवृत्तित्वात् तद्व्याप्या पृथिवीत्वजातिः सिद्धा। तथा च गन्धसमानाधिकरणा द्रव्यत्वव्याप्या च जातिः पृथिवीत्वजातिः, तादृशजातिमत्त्वमुत्पत्तिकालीनेष्वपि घटेषु वर्तते इतीदमेव लक्षणं सर्वदोषरहितम्। इयमेव रीतिः सर्वत्र ज्ञेयेति सङ्केतयति—**एवमिति**।

न्या.बो. इतः पूर्वं पृथिव्यादीनि त्रीणि निरूपितानि, अनन्तरं मूलकारकृतं वायु-
पृ.७. निरूपणं व्याख्यातुमारभते—**रूपरहितेतीति**। रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणमिति। अत्र सति-सप्तमी विशिष्टार्था, तथा च रूपहितत्वविशिष्टस्पर्शवत्त्वं वायोर्लक्षणमित्यर्थः। एतदेव पुनः स्फुटतया व्याख्यातुमाह **सामानाधिकरण्येति**।

अत्रायं भावः—यस्याभावो भवति स प्रतियोगी कथ्यते। यस्मिन्नभावो भवति सोऽनुयोगी कथ्यते। यथा भूतले घटो नास्ति इत्यत्र भूतले घटस्याभावः कथ्यते, तस्मात् घटः प्रतियोगी भूतलञ्चानुयोगि भवति। एवं यदा घटः प्रतियोगी तदा प्रतियोगिता घटनिष्ठा। अनुयोगि भूतलं वर्ततेऽतोऽनुयोगिता भूतलनिष्ठा। इमे एव प्रतियोगिताऽनुयोगिते पूर्वं नाममात्रेण सङ्केतिते लक्ष्यलक्ष्यतावच्छेदकस्वरूपव्याख्यायां मया। एवमेव रूपं नास्तीति रूपाभावस्य प्रतियोगि रूपम्। प्रतियोगिता रूपनिष्ठा। यथा लक्ष्यतावच्छेदकं पृथिवीत्वं तथैव यद्धर्मावच्छिन्नः प्रतियोगी स धर्मः प्रतियोगितावच्छेकः। अत्र रूपत्वधर्मावच्छिन्नः प्रतियोगी वर्ततेऽतो रूपत्वं प्रतियोगितावच्छेदकम्। यो धर्मो यस्या अवच्छेदकः सा तद्धर्मावच्छिन्ना इति द्वितीयनियमेन रूपत्वधर्मः रूपनिष्ठायाः प्रतियोगिताया अवच्छेदकस्तस्माद् रूपनिष्ठा प्रतियोगिता रूपत्वधर्मावच्छिन्ना। प्रतियोगितायाः निरूपकः अर्थात् प्रयोजकः अभावो भवति। नह्यभावज्ञानमन्तरा प्रतियोगिताया निरूपणं भवितुमर्हति। यतो हि तत्रैव प्रतियोगिता तिष्ठति यस्याभावो गृह्यतेऽतः सुतरामेतदायाति यत् अभावः प्रतियोगितायाः प्रयोजक इति। तथा च प्रतियोगिताया निरूपकोऽभावो भवतीति सिद्धम्। एवं तस्मिन्नेव निरूपकत्वार्थे कप्रत्ययं विधाय प्रतियोगितानिरूपक इत्यस्मिन्नर्थे प्रतियोगिताक इति कथ्यते नव्यैः। तथा चैतदायातं यत् रूपत्वावच्छिन्नप्रतियोगिताकाभावो रूपाभावशब्देन कथ्यते। तथा चैतादृशरूपाभावविशिष्टो यः स्पर्शस्तद्वत्त्वं वायोर्लक्षणम्। स्पर्शे रूपाभाववैशिष्ट्यं (युक्तत्वं) सामानाधिकरण्यसम्बन्धेन। अर्थात् यस्मिन्नधिकरणे रूपाभावो भवति, तत्रैव चेत् स्पर्शो भवेत्, तदा स्पर्शो रूपाभावविशिष्टो भविष्यति सामानाधिकरण्यसम्बन्धेन। यथा—रूपाभावो वर्तते वायौ, तत्रैव

In Public domain. Digitization Muthulakshmi Research Academy

स्पर्शोऽपि वर्तत इति रूपाभावविशिष्टः स्पर्शो जातः। तथाच रूपत्वावच्छिन्न-प्रतियोगिताकाभाव (रूपाभाव) विशिष्टस्पर्शवत्त्वं वायौ वर्तत इति तत्रोक्त-लक्षणसमन्वयः। इत्थमेव चाग्रेऽपि क्वचिदागतं सामानाधिरण्यसम्वन्धेन वैशिष्ट्यं बोध्यम्। विशेषणांशानुपादाने—रूपरहितत्वविशेषणानुपादाने इत्यर्थः। पृथिव्यादित्रिकेऽतिव्याप्तिरिति। तत्रापि स्पर्शवत्त्वस्य सत्त्वादिति भावः। विशेष्यांशोपादानस्य फलमाह—**आकाशादावतिव्याप्तिवारणायेति**।

न्या.बो. प्रसङ्गात् अतिव्याप्त्यादिस्वरूपमाह—**अतिव्याप्तिर्नामेति**। अलक्ष्ये—
पृ.८. लक्ष्यादन्यत्र महिष्यादौ। लक्षणस्य—शृङ्गित्वादेः। सत्त्वम्—विद्यमानत्वम्। तदेवोदाहरति—**यथेति**। शृङ्गित्वं न गोर्लक्षणम् महिष्यादावपि तस्य सत्त्वात् इति-भावः। अव्याप्तिमाह—**अव्याप्तिर्नामेति**। लक्ष्यैकदेशे—कस्मिंश्चित् लक्ष्ये लक्षणस्याविद्यमानत्वमर्थः। स्वोक्तमेव व्याचष्टे बोधिनीकारः—**लक्ष्यैकदेशे इति**। लक्ष्यतावच्छेदकस्य—गोत्व, पृथिवीत्व, वायुत्वादेः। आश्रयीभूते—अधिकरणे। अन्यत् सुगमम्। उदाहरति—**यथा गोरिति**। असंभवं लक्षयति—**असंभवो नामेति**। लक्ष्यमात्रे—सर्वत्र लक्ष्ये इत्यर्थ.। लक्षणासत्त्वम्—लक्षणागमनमित्यर्थः। उदाहरति—**गोरेकशफवत्त्वम् इति**। स्पष्टम्।

तेषां निष्कृष्टलक्षणान्याह—**लक्ष्यतेत्यादि**। गोर्लक्ष्यत्वे लक्ष्यतावच्छेदकं गोत्वम्, पृथिव्या लक्ष्यत्वे पृथिवीत्वं, वायोर्लक्ष्यत्वे वायुत्वमिति रीत्या लक्ष्यतावच्छेदकन्तु सर्वत्र सुगमम्। समानाधिकरणत्वम्-एकाधिकरणवृत्तित्वम्। लक्ष्यतावच्छेदकेन समानमधिकरणं यस्य तत् लक्ष्यतावच्छेदकसमानाधिकरणम्। अर्थात् लक्ष्यतावच्छेदकस्य गोत्वादेर्यदधिकरणं तदेव लक्षणस्यापि यद्यधिकरणं भवेत्, तदा लक्ष्यतावच्छेदकसमानाधिकरणं तल्लक्षणं कथ्यते। यथा गोत्वं गवि वर्तते तत्रैव शृङ्गित्वमपि वर्ततेऽतः शृङ्गित्वं लक्ष्यतावच्छेदकसमानाधिकरणम्। उत्तरार्ध-स्यार्थस्तु—गवादिभेदसासानाधिकरण्यम्, तच्च गवादिभेदाधिकरणवृत्तित्वम्। एतदपि शृङ्गित्वे वर्तते। 'गौर्न' ति भेदाधिकरणे महिषादौ शृङ्गित्वस्य वर्तमानत्वात्। अत्र भेदे विशेषणं गोत्वावच्छिन्नप्रतियोगिताकत्वम्। यस्याभावः स प्रतियोगीति पूर्वमेवोक्तम्। तथा च गोभेदस्य प्रतियोगी गौरस्ति। प्रतियोगिता गोनिष्ठा। प्रतियोगिताया निरूपकोऽभावो भवतीत्यपि विस्तरेण व्याख्यातम्। तथा च गोनिष्ठा या प्रतियोगिता तन्निरूपकभेदसामानाधिकरण्यमिति लब्धम्। निरूपकत्वार्थे कप्रत्ययात् प्रतियोगिताकेत्येव न्यायबोधिन्यामुक्तम्। प्रतियोगितायां विशेषणं—**लक्ष्यतावच्छेदकावच्छिन्नेति**। अर्थात् लक्ष्यतावच्छेदकं पूर्वरीत्या गोत्वादिकं, तदवच्छिन्ना च गोनिष्ठा प्रतियोगिताऽस्त्येव। तथा च लक्ष्यतावच्छेदकीभूतगोत्वावच्छिन्ना या गोनिष्ठा प्रतियोगिता, तन्निरूपकगौर्नेतिभेदसामा-

In Public domain. Digitization Muthulakshmi Research Academy

नाधिकरणस्य लक्ष्यतावच्छेदकसमानाधिकरणत्वस्य च पूर्वार्धस्य शृङ्गित्वे सत्त्वात् शृङ्गित्वं न गोर्लक्षणम्, अतिव्याप्तिदोषेण ग्रस्तत्वादिति भावः ।

अव्याप्तेर्निष्कृष्टलक्षणमाह—**लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वमिति ।** अयमर्थः—लक्ष्यतावच्छेदकसमानाधिकरणो योऽत्यन्ताभावः तत्प्रतियोगित्वमव्याप्तिरिति । यथा गोर्यदि नीलरूपवत्त्वं लक्षणं कृतं स्यात् तदा तदव्याप्तिदोषेण ग्रस्तं स्यात् । यतो हि लक्ष्यतावच्छेदकं गोत्वं, तत्समानाधिकरणोऽर्थात् गोत्वाधिकरणे वर्तमानोऽत्यन्ताभावो नीलरूपवत्त्वाभाव एव, गोत्वाधिकरणे श्वेतगवि नीलरूपवत्त्वाभावात् । तादृशात्यन्ताभावप्रतियोगित्वं नीलरूपवत्त्वेऽस्ति । एवञ्च लक्ष्यतावच्छेदकगोत्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् इदं लक्षणमव्याप्तिदोषयुक्तम् ।

असंभवस्य निष्कृष्टलक्षणमाह—**लक्ष्यतावच्छेकव्यापकीभूताभावप्रतियोगित्वमिति ।** लक्ष्यतावच्छेकव्यापकीभूतो योऽभावस्तत्प्रतियोगित्वमित्यर्थः । यथा गोरेकशफवत्त्वं लक्षणं कृतं स्यात् तदा तल्लक्षणमसंभवदोषग्रस्तम् । लक्ष्यतावच्छेदकं गोत्वम्, तद्व्यापकीभूतोऽभावः एकशफवत्त्वाभावः, तत्प्रतियोगिताया एकशफवत्त्वे सत्त्वात् । यथा यत्र यत्र धूमो वर्तते तत्र तत्र वह्नेः सत्त्वात् धूमस्य वह्निर्व्यापको भवति, तथैव गोत्वं सर्वत्र गवि वर्तते तत्र चैकशफवत्त्वाभावस्यापि सत्त्वात् एकशफवत्त्वाभावो गोत्वव्यापकः । तथा च लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वात् एकशफवत्त्वमपि न गोर्लक्षणम् । किन्तु एतत्त्रितयदोषरहितत्वात् सास्नावत्त्वमेवादुष्टं गोलक्षणम् मन्तव्यम् । एवं रीत्यैव रूपरहितत्वे सति स्पर्शवत्त्वमेव वायोरदुष्टं लक्षणम् ।

न्या.बो. मूलकृता कृतमाकाशलक्षणं व्याख्यातुमाह–**आकाशं लक्षयतीति ।** "शब्द-
पृ.६. गुणकमिति" इत्यत्रेतिशब्देन शब्दगुणकत्वमाकाशलक्षणमिति निर्दिश्यते । शब्दो गुणो यस्य तदाकाशमित्यर्थः । ननु शब्दोऽस्यास्तीति शब्दवत् तस्य भावः शब्दवत्त्वम् । तथा च समवायेन सम्बन्धेन शब्दवत्त्वमात्रस्याकाशलक्षणस्य सम्यक्त्वे गुणपदं किमर्थमत आह–**गुणपदमिति ।** पृथिव्यादौ रूपरसादयोऽनेके विशेषगुणाः* सन्ति आकाशे तु केवलः शब्द एव विशेषगुणोऽस्तीति सूचनाय गुणपदं दत्तमिति भावः । न्यायबोधिन्यां द्योतनायेति पदं द्योतनायैवेत्यर्थकम् । तथा चैतेन यद् व्यवच्छेद्यं तदाह–**न त्वतिव्याप्तिवारणायेति ।** विशेषणानामितरव्यावर्तकत्वात् अन्यत्र अतिव्याप्तिवारणप्रयोजनकत्वेऽपि अत्र तथाविधप्रयोजनासंभवादिति भावः ।

---

* रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः ।
बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः ॥ इति विशेषगुणाः ।

In Public domain. Digitization Muthulakshmi Research Academy

तच्चैकमिति मूलोक्ते प्रमाणमाह—अनेकत्वे मानाभावादिति। आकाशं विभ्विति मूले प्रोक्तम्, तत्र किं विभुत्वमिति जिज्ञासायामाह—सर्वेति। सर्वैः मूर्तैः द्रव्यैः संयोगोऽस्यास्तीति सर्वमूर्तद्रव्यसंयोगी, तस्य भावः सर्वमूर्तद्रव्यसंयोगित्वम्। इदमेव विभुत्वमिति भावः। ननु किं मूर्तत्वं? तत्राह—मूर्तत्वञ्चेति। तथा च क्रियावत्त्वात् पृथिव्यप्तेजोवायुमनांसि मूर्तानि कथ्यन्ते। पृथिव्यप्तेजोवाय्वाकाशानि पञ्च लक्षितानि, एतान्येव पञ्च भूतानि सन्तीत्याह—भूतपदवाच्यमिति। भूतलक्षणमाह—भूतत्वं नामेति। बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वमिति। बहिरिन्द्रियैः—चक्षूरसनघ्राणत्वक्श्रोत्रैः ग्राह्या ये विशेषगुणाः—रूपरसगन्धस्पर्शशब्दास्तद्वत्त्वमित्यर्थः।

न्या.बो. पृ.१०. अतीतादिव्यवहारहेतुत्वं मूलकारकृतं काललक्षणम्। अत्रादिपदेन वर्तमानभविष्यतोर्ग्रहणम्। अत्रैव लक्षणेऽतीतादीति विशेषणस्य फलमाह बोधिनीकारः—व्यवहारहेतुत्वस्येति। अयं भावः—यदि व्यवहारहेतुत्वमात्रं लक्षणं स्यात् तदा 'अयं घट' इत्यस्य वाक्यप्रयोगस्यापि व्यवहारत्वात्, तत्र च विषयविधया घटस्यापि हेतुत्वात्, घटेऽतिव्याप्तिरतोऽतीतादीति पदम्। तथा चातीतमिति व्यवहारहेतुत्वस्य काले एव सत्त्वान्न घटेऽतिव्याप्तिरिति भावः।

न्या.बो. पृ.११. मूलकारकृतं दिग्लक्षणं व्याख्यातुमाह—दिशो लक्षणमाहेति। प्राच्यादिसंज्ञायां हेतुमाह—उदयाचलेति। एतत् सुस्पष्टम्।

मूलकृता कृतमात्मनिरूपणं व्याख्यातुमाह—आत्मानं निरूपयतीति। ज्ञानाधिकरणमितीति। अत्र ज्ञानाधिकरणमिति कथनेनात्मनि प्रमाणमपि दर्शितं भवति। तथा हि—गुणा गुणिनमाश्रित्य तिष्ठन्तीत्यस्ति नियमः। ज्ञानमपि गुण एवास्ति। तस्याप्यवश्यं केनचिदाश्रयेण भवितव्यम्। तत्र पृथिव्यप्तेजोवाय्वाकाशकालदिङ्मनसां ज्ञानाश्रयत्वासंभवेन आत्मैव तदधिकरणत्वेन निश्चीयते।

ननु ज्ञानवानात्मेत्येव वक्तव्यम् लाघवात्, अधिकरणपदन्तु किमर्थं दत्तमित्यत आह—अधिकरणपदमिति। अयं भावः—पदार्था हि विभिन्नसम्बन्धेन विभिन्नस्थाने तिष्ठन्ति। सम्बन्धास्तावत् न्यायनये संयोगसमवायकालिकस्वरूपाख्याः मुख्याः। तादात्म्य, विषयित्व, विषयत्वादयस्त्वमुख्याः। तत्र संयोगसम्बन्धः पृथक्सिद्धद्रव्ययोरेव भवति। यथा घटः संयोगेन भूतले वर्तत इति। समवायसम्बन्धश्च गुणगुणिनोरवयवावयविनोः, क्रियाक्रियावतोः, जातिजातिमतोः, नित्यद्रव्यविशेषयोश्च भवति। गुणगुणिनोर्यथा-नीलरूपं घटे समवायेन वर्तते। अवयवावयविनोर्यथा-घटः कपालयोः पटश्च तन्तुषु समवासम्बन्धेन वर्तते। क्रियाक्रियावतोर्यथा—गमनक्रिया वाजिनि समवायेन वर्तते। जातिजाति-

In Public domain. Digitization Muthulakshmi Research Academy

मतोर्यथा—घटत्वं जातिः समवायेन घटेऽस्तीति। एवं षष्ठः पदार्थो विशेषः समवायेनैव सम्बन्धेन नित्यद्रव्येषु वर्तते। कालिकसम्बन्धेन घटादयः काले कालोपाधिषु च वर्तन्ते, कालस्य सर्वाधारत्वात्। जन्यपदार्था एव कालोपाधय उच्यन्ते। कालोपाधयश्च काल एवेति ज्ञेयम्। येन सम्बन्धेनाभावो भूतलादौ तिष्ठति स स्वरूपसम्बन्धः। अर्थात् घटाभाववद्भूतलमित्यत्र घटाभावो भूतले स्वरूपसम्बन्धेन तिष्ठति। तदात्मनो भावः तादात्म्यम्। तेन सम्बन्धेन घटो घटे एव वतते। तादात्म्येन सर्वं वस्तु स्वस्मिन् सम्बद्धं भवति। ज्ञानं विषयतासम्बन्धेन विषये तिष्ठति। विषयश्च विषयितासम्बन्धेन ज्ञाने तिष्ठतीति। एवं प्रदर्शितरीत्या गुणगुणिनाः समवायात् ज्ञानमात्मनि समवायेन सम्बन्धेन स्थास्यति। तदेव च ज्ञानम् विषयतासंबन्धेन विषये वर्तते। तथा च यद्यधिकरणपदं न स्यात् किन्तु ज्ञानवानात्मा इत्येव कथ्येत, तदा विषयतासम्बन्धेन घटादिविषयस्यापि ज्ञानवत्त्वात् तत्रात्मलक्षणस्यातिव्याप्तिः स्यात्, अतोऽधिकरणपदं दत्तम्। तथा च तेन समवायसम्बन्धेन ज्ञानाश्रयत्वलाभात् समवायेन आत्मन्येव ज्ञानस्य सत्त्वात् न कोऽपि दोषः पदमादधाति। उपरिष्टादुक्तः सम्बन्धविवेकः सदा स्मृतो रक्षणीयो येन नाग्रेऽपि काठिन्यनुभूयेत।

मनोलक्षणं व्याख्यातुमारभते—**मनो निरूपयतीत्यादिना**। सुखाद्युपलब्धिसाधनमिन्द्रियं मन इत्यत्रोपलब्धिपदेन साक्षात्कार एव ग्रहीतव्योऽन्यथा सुखादीनां स्मृत्यात्मकोपलब्धिं प्रति चक्षुरादेरप्युद्बोधकज्ञापकतया साधनत्वात्तत्रातिव्याप्तिः प्रसज्ज्येतेति भावः। पर्यवसितं लक्षणमाह—**तथाचेति**। मनसि सुखदुःखादिसाक्षात्कारकारणत्वस्येन्द्रियत्वस्य च सत्त्वाल्लक्षणसमन्वयः। अत्र यदीन्द्रियत्वमेव मनसो लक्षणं स्यात् तदा चक्षुरादेरपीन्द्रियत्वात् तत्रातिव्याप्तिः स्यात्, अतः सुखादिसाक्षात्कारकारणत्वविशेषणम्। तथा च चक्षुरादेः सुखादिसाक्षात्कारेऽकारणत्वान्नातिव्याप्तिः। एतत्सर्वमाह—**इन्द्रियत्वमात्रोक्तावित्यादिना विशेषणमित्यन्तेन**। विशेष्यस्येन्द्रियत्वस्य फलमाह—**विशेष्यानुपादाने इति। आत्मन्यतिव्याप्तिरिति**। अत्र हेतुमाह—**आत्मन इति**। सुखादिकं प्रति—सुखादिसाक्षात्कारं प्रति। **समवायिकारणत्वादिति**। विशेष्योपादानम्—इन्द्रियत्वस्य लक्षणे प्रवेश इत्यर्थः। एवञ्चात्मन इन्द्रियत्वाभावान्न तत्र मनोलक्षणातिव्याप्तिरिति भावः।

न्या.बो. पूर्वं सर्वाणि द्रव्याणि लक्षितानि, इतो गुणान् लक्षयितुमारभमाणस्य
पृ.१२. मूलकारस्य 'चक्षुर्मात्रग्राह्यो गुणो रूपमिति' रूपलक्षणं व्याख्यातुमाह–**रूपं लक्षयतीति**। मूलवाक्यतो लक्षणांशं पृथक्कृत्य दर्शयति—**चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वमिति**। रूपं हि केवलेन चक्षुषा ग्राह्यमर्थात् ज्ञेयमस्ति गुणश्चास्तीति तत्र लक्षणसमन्वयः। अत्र लक्षणे चक्षुर्मात्रग्राह्यत्वं विशेषण, गुणत्वञ्च

In Public domain. Digitization Muthulakshmi Research Academy

न्या.बो. विशेष्यमस्ति। विशेष्यस्य गुणत्वमात्रस्य लक्षणत्वे दोषमाह – **विशेष्यमात्रो-**
पृ.१२. **पादान इति। रसादावतिव्याप्तिरिति।** तस्यापि गुणत्वादिति शेषः। चक्षुर्मात्रग्राह्यत्वविशेषणदाने तु नातिव्याप्तिः, रसादेः रसनादिग्राह्यत्वेन चक्षुर्ग्राह्यत्वाभावात्। चक्षुर्मात्रग्राह्यत्वमात्रस्योपादाने गुणत्वस्य चानुपादाने दोषमाह– **रूपत्वेऽतिव्याप्तिरिति।** यथा रूप चक्षुर्मात्रग्राह्यं तथा रूपत्वस्यापि चक्षुमात्रग्राह्यत्वादित्यर्थः। कथं रूपवत् रूपत्वमपि चक्षुर्मात्रग्राह्यमित्यत्र हेतुं नियममाह— **यो गुण इति।** रूपादिचतुर्विंशतिगुणमध्ये यो गुणो येनेन्द्रियेण गृह्यते तद्गुणनिष्ठा या रूपत्वादिजातिः सापि तेनैवेन्द्रियेण गृह्यते इति नियमार्थः। तथा च रूपत्वेऽतिव्याप्तिवारणाय गुणत्वेति विशेष्योपादानम्। एवं सति रूपत्वं सामान्यं (जातिः) न तु गुण इति नातिव्याप्तिः।

चक्षुर्मात्रग्राह्यत्वमित्यस्यार्थमाह—**चक्षुर्मात्रग्राह्यत्वं नामेति।** चक्षुर्भिन्नानि यानि रसनादीनीन्द्रियाणि तैरग्राह्यत्वे सति चक्षुर्ग्राह्यत्वमित्यर्थः। ननु चक्षुर्ग्राह्यत्वे सति गुणत्वमित्येव रूपलक्षणमस्तु मात्रपदं किमर्थमत आह— **मात्रपदानुपादान इति।** अयमेको घट इत्यत्र संख्यायास्त्वचा घटस्पर्शे कृते यथा ज्ञानं भवति तथा चक्षुषाऽपि भवतीति तस्या अपि चक्षुर्ग्राह्यगुणत्वादतिव्याप्तिरिति भावः। तदेवाह–**तत्रापीति।** मात्रपददाने तु नातिव्याप्तिरित्याह– **संख्यादेरिति।** अत्र लक्षणे ग्राह्यत्वं प्रत्यक्षविषयत्वम्, चक्षुर्ग्राह्यत्वं चक्षुर्जन्यप्रत्यक्षविषयत्वम् इत्यनुपदं वक्ष्यति बोधिनीकारः। तथाचैतादृशचक्षुर्ग्राह्यत्वानुपादानेऽतीन्द्रियगुरुत्वादावतिव्याप्तिः स्यादतस्तद्वारणाय चक्षुर्ग्राह्यत्वोपादानम्। तथा सति नातिव्याप्तिः, तस्यातीन्द्रियत्वेन चक्षुषाऽग्राह्यत्वात् इत्याशयेनाह— **अतीन्द्रियेति।** ग्राह्यत्वार्थं उक्तः। अग्राह्यत्वस्यार्थमाह—**अग्राह्यत्वं नामेति।** तदविषयत्वम्—प्रत्यक्षाविषयत्वमित्यर्थः। मात्रपदार्थसहकृतमुक्तलक्षणस्य फलितार्थमाह—**तथा चेति।** स्पष्टोऽस्यार्थः।

एवं फलितार्थेऽपि दिवसे सूर्यस्य रात्रौ चन्द्रस्य दीपस्य वा प्रभया सह घटस्य यः संयोगस्तत्रातिव्याप्तिरित्याशङ्कते—**नन्विति।** अतिव्याप्तौ हेतुमाह—**चक्षुर्मात्रग्राह्यगुणत्वादिति।** चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुर्जन्यप्रत्यक्षविषयत्वे च सति गुणत्वात् इत्यर्थः। अतिव्याप्तिवारणोपायमाह – **गुणपदस्येति।** तथा चात्र गुणपदस्य 'रूपं गन्धो रसः स्पर्शः' इति श्लोके उक्ता ये विशेषगुणास्तत्परत्वात्, संयोगस्य च पठितविशेषगुणानन्तर्गतत्वात् नातिव्याप्तिरित्याशयः। ननु यदि गुणपदं विशेषगुणपरं तदा संख्यादावतिव्याप्तिवारणाय दत्तं मात्रपदं व्यर्थमेव, संख्याया विशेषगुणत्वाभावादेव तत्रातिव्याप्तेरभावादिति शङ्कते– **न चैवमिति।** मात्रपदस्य अन्यप्रयोजनप्रदर्शनेनोत्तरयति—**जलमात्रेति।** तथा च सांसिद्धिकद्रवत्वस्य चक्षुर्ग्राह्यविशेषगुणत्वात् तत्रैवातिव्याप्तिवारणाय मात्रपदसार्थक्यादिति भावः।

In Public domain. Digitization Muthulakshmi Research Academy

यथा च गुणपदं विशेषगुणपरमिति मन्तव्यमपि न भवेत्, एवं प्रभाघट-संयोगेऽतिव्याप्तिरपि न स्यात्तथा लक्षणमाह—**अथवेति**। चक्षुर्मात्रग्राह्या या जातिः रूपत्वजातिस्तादृशजातिमत्त्वं रूपे वर्तत इति लक्षणसमन्वयः। एवं सति प्रभाघटसंयोगेऽपि नातिव्याप्तिः, संयोगत्वजातेश्चक्षुर्मात्रग्राह्यत्वाभावात्। यतो हि घटपटसंयोगो यथा चक्षुषा गृह्यते तथा त्वचाऽपि गृह्यते। अतस्तन्निष्ठा संयोगत्वजातिरपि चक्षुष्ट्वग्भ्यां द्वाभ्यामेव गृह्यते, यो गुणो यदिन्द्रियग्राह्य इति न्यायात्। प्रभाघटसंयोगे चैकैव संयोगत्वजातिरस्ति। तथा च संयोगत्व-जातेश्चक्षुर्मात्रग्राह्यत्वाभावात्, चक्षुर्मात्रग्राह्यजातिमद्गुणत्वस्य प्रभाघटसंयोगेऽ-भावान्नातिव्याप्तिरिति भावः। जातिघटितलक्षणे गुणत्वोपादानस्य फलमाह—**अत्रेति**। अयं भावः—सुवर्णमिदमिति ज्ञानं चक्षुषैव भवति, चक्षुर्निमीलने केवलस्पर्शेन सुवर्णस्यापरिचयात्। तथा सुवर्णगतसुवर्णत्वजातिरपि चक्षुर्मात्र-ग्राह्या इति तादृशजातिमत्त्वस्य सुवर्णे सत्त्वादतिव्याप्तिरतस्तद्वारणाय गुणत्वोपादानमिति भावः। अग्रे रसादिलक्षणेऽपि विशेष्यविशेषणयोः प्रयोजनं सूचयति—**एवमिति**।

न्या.बो. पृ.१९. मूलकृत्कृतं स्पर्शलक्षणं व्याख्यातुमाह—**स्पर्शं लक्षयतीति**। अत्रापि त्वगभिन्नेन्द्रियाग्राह्यत्वे सति त्वगिन्द्रियग्राह्यत्वमिति स्पर्शलक्षणनिष्कर्षः। अत्र लक्षणे त्वगभिन्नेन्द्रियाग्राह्यत्वार्थकमात्रपदस्य प्रयोजनमाह—**अत्रापीति**। यथा रूपलक्षणे तथा स्पर्शलक्षणेऽपीति भावः। **संख्यादिसामान्येति**। अयं भावः—स्पर्शलक्षणे यदि मात्रपदं न स्यात् तदा त्वगिन्द्रियग्राह्यगुणत्वमेव लक्षणं स्यात्। तथा च संख्याया अपि त्वगिन्द्रियग्राह्यगुणत्वमस्ति, यतो हि चक्षुषी पिधायापि स्पृष्ट्वैव द्वौ त्रयो वा घटा इति ज्ञानं जायत एव। तस्मात् संख्यायामुक्तलक्षणातिव्याप्तिरतो मात्रपदं देयम्। तथा सति नातिव्याप्तिः, तस्याः चक्षुषापि ग्राह्यत्वेन त्वगिन्द्रियमात्रग्राह्यत्वाभावात्। अन्यविशेषण-कृत्यम्—त्वगिन्द्रियग्राह्यत्वपदस्य गुणत्वपदस्य च प्रयोजनमित्यर्थः। पूर्ववत् रूपलक्षणे इवेत्यर्थः। अर्थात् अतीन्द्रियगुरुत्वादौ स्पर्शत्वे चातिव्याप्तिवारणं क्रमेण प्रयोजनमिति भावः। ग्राह्यत्वपदार्थोऽपि स एवेत्याह—**ग्राह्यत्व-पदार्थोऽपीति**।

रूपरसगन्धस्पर्शाः पृथिव्यां पाकजा अत एवानित्या इति मूलकारोक्तं व्याख्यातुमाह—**रूपादिचतुष्टयमिति**। एतत्तत्त्वनिर्णयः—रूपादीनां पृथिव्यां पाकजत्वनिर्णय इत्यर्थः। इत्थम्—अव्यवहितोत्तरवक्ष्यमाणप्रकारेणेत्यर्थः। पाक-शब्दस्यार्थमाह—**पाको नामेति**। विजातीयः—विलक्षणः। एवंविधः पाकः किं करोतीत्याह—**स चेति**। नानाजातीयरूपजनकः—नानाप्रकाररूपोत्पादक इत्यर्थः। रूपजनको यो विजातीयस्तेजःसयोगः, तदपेक्षया रसजनकस्तेजःसंयोगो विलक्षण

In Public domain. Digitization Muthulakshmi Research Academy

एवेत्याह—तदपेक्षयेति। रूपरसजनकविजातीयतेज:संयोगापेक्षया गन्धजनकः, स्पर्शजनकश्च विजातीय एव तेजःसंयोग इत्याह—एवं गन्धजनकोऽपीति, एवं स्पर्शजनकोऽपीति चेति। एवं प्रकारेणेति। स्पष्टोऽस्यार्थः।

उदाहरति—यथेति। तृणपुञ्जनिक्षिप्ते, धान्याद्यन्नेषु च निक्षिप्ते, आम्रादौ फले। उष्मनामकविलक्षणतेजःसंयोगात्, पूर्वरूपनाशेन अर्थात् आम्रे यत् पूर्वं हरितरूपमभूत् तस्य नाशेनेत्यर्थः, रूपान्तरस्य पीतादेरुत्पत्तिर्भवति, किन्तु रसस्तु स एवाम्लस्तिष्ठति। एतस्यैतदेव कारणं यदत्राम्रे एतादृशस्तेजः-संयोगो जातो येन केवलं रूपमेव परिवर्तितम्, रसस्तु अम्ल एव स्थितः। केवल-रसजनकं विलक्षणं तेजःसंयोगमुदाहरति—क्वचिदिति। रसपरावृतिः रसपरि-वर्तनम्। रूपं तु हरितमेव तिष्ठतीत्याशयः। एतदेवोपपादयति—विजातीय इति। निष्कर्षं ब्रूते—तस्मादिति।

उक्तमनुभवं गन्धेऽपि विज्ञापयति—एवं गन्धजनक इति। रूपरस-योरिति। अपरावृत्तावपि—हरिताम्लौ एव रूपरसौ तिष्ठत इत्यर्थः। केवलो गन्ध एव सुरभिर्जायते। अत्रापि रूपादिजनकतेजःसंयोगापेक्षया विलक्षण एवायं गन्धजनकस्तेजःसंयोग इति तात्पर्य्यम्। एतदेव स्पर्शेऽपि बोधयति—एवं स्पर्श-जनक इति। उपपादयति—पाकवशादिति। उपसंहरति—तस्मादिति। विलक्षणविलक्षणपाकस्यैवायं महिमा यत् समानेभ्यः परमाणुभ्यो जातान्यपि द्रव्याणि घट, पट, वृक्ष, पशु, मनुष्यादिनानारूपेणानुभूयन्ते इत्याह—अतएवेति। यथाकार्यं विलक्षणपाकस्वीकारादेवेत्यर्थः। पाकवशाद् विजातीयद्रव्यान्तरोत्पत्ति-मप्युदाहरति—यथेति। गोभिर्भुक्तानां खादितानां तृणानाम्। आपरमाण्वन्त-भङ्ग इति। न्यायमते परमाणूनां नित्यत्वात् तेषां नाशरूपभङ्गासंभवात्, तान्
न्या.बो. विहाय द्वयणुकपर्य्यन्तनाशे इत्यर्थः। तृणारम्भका ये परमाणवस्तेषु विजातीयतेजः-
पृ.१६. संयोगात् पूर्वरूपादिचतुष्टयस्य तृणेषु ये हरितरूपादिविलक्षणरूपरसगन्धस्पर्शास्ते-षामित्यर्थः। तदनन्तरम् पूर्वरूपादिनाशानन्तरम्। दुग्धे यादृशं रूपं भवति, रसो भवति, गन्धो भवति, स्पर्शो भवति, तादृशरूपरसगन्धस्पर्शजनका विलक्षण-तेजःसंयोगाः जायन्ते, उत्पद्यन्ते इत्यर्थः। तदुत्तरं—दुग्धे यादृशं रूपादिकं भवति, तादृशरूपादिजनकविलक्षणतेजःसंयोगोत्पत्यनन्तरमित्यर्थः। तैरेव विलक्षणतेजः-संयोगैरेव। तादृशरूपरसादयः—दुग्धे यादृशा भवन्ति तादृशा इत्यर्थ। तादृश-रूपरसगन्धस्पर्शविशिष्टा ये दुग्धपरमाणवस्तैर्दुग्धद्वयणुकमारभ्यते—उत्पाद्यते इत्यर्थः! ततस्त्र्यणुकं ततो महादुग्धारम्भका अवयवाः उत्पद्यन्ते, ततो महादुग्धो-त्पत्तिर्भवतीति भावः।

एवं रीत्यैव पाकमहिम्ना दुग्धस्य रूपादिनाशानन्तरं दध्युत्पाद्यते

In Public domain. Digitization Muthulakshmi Research Academy

इत्याह— **एवं दुग्धारम्भकैरिति**। एवं रीत्यैव नवनीतादिकमपीत्याह— **एवं पाकमहिम्नेति**।

न्या.बो. पृ.१७. विभागलक्षणं व्याख्यातुमाह— **विभागं लक्षयतीति**। निष्कृष्टलक्षणमाह— **संयोगेति**। अत्र लक्षणे संयोगनाशकत्वं विशेषणम्, गुणत्वं विशेष्यम्। विशेषणानुपादाने गुणत्वमात्रोक्तौ रसादावतिव्याप्तिः, तद्वारणाय विशेषणोपादनम्। विशेष्यस्य स्वयं फलमाह— **विशेषणमात्रोपादाने इति**। यदि संयोगनाशकत्वं विभागत्वमित्युच्येत, तदा क्रियापि संयोगनाशिकाऽस्ति, नहि क्रियामन्तरा संयोगो नश्यति। तथा च क्रियायां विभागलक्षणातिव्याप्तिरतो गुणत्वमिति विशेष्योपादानम्। क्रियाया गुणभिन्नत्वात् नातिव्याप्तिरित्याशयः।

न्या.बो. पृ.१८. गुरुत्वलक्षणव्याख्यानायाह— **गुरुत्वं लक्षयतीति**। आद्यपतनासवायिकारणत्वं गुरुत्वस्य लक्षणम्। समवायिकारणत्वासमवायिकारणत्वे त्वग्रे विस्तरेण प्रतिपादयिष्येते। अत्रैतावदेव ज्ञेयं यत् आद्यपतनं प्रति असमवायिकारणं गुरुत्वं, द्वितीयपतनं प्रति तु वेगोऽसमवायिकारणम्। अयं भावः— यदा लोष्ठमुपरि उत्क्षिप्यते तदा तल्लोष्ठं निमेषमात्रमाकाशे एवावस्थाय शनैः पतितुमारभते, तत्रैवारम्भिकपतने गुरुत्वमसमवायिकारणम्। यदि गुरुत्वं न स्यात्तदा लोष्ठं नभस्येवावरुद्धं स्यात्, न त्ववपतेत्। अतस्तत्र गुरुत्वमसमवायिकारणम्। किन्तु प्रारम्भिकपतनानन्तरम् शीघ्रतया यत् पतनं दृश्यते तत्र वेग एवासमवायिकारणमित्यर्थः। तथा चाद्यपदादाने द्वितीयपतनासमवायिकारणे वेगेऽतिव्याप्तिरत आद्येति। तदेवाह— **द्वितीयेति**। उत्तरत्र द्रवत्वलक्षणे मूलकारेणाद्यपदं न दत्तम्, किन्तु वेगेऽतिव्याप्तिवारणाय तत्राप्याद्यपदमावश्यकमित्याह— **उत्तरत्रेति**। तथा चाद्यपदयोजनया आद्यस्यन्दनासमवायिकारणत्वं द्रवत्वस्य लक्षणं निष्पन्नं भवति।

न्या.बो. पृ.१९. स्नेहलक्षणं व्याख्यातुं प्रक्रमते— **स्नेहं लक्षयतीति**। लक्षणस्य निष्कर्षमाह— **चूर्णादीति**। चूर्णशब्दस्य स्फुटार्थत्वात् पिण्डीभावशब्दार्थमाह— **पिण्डीभावो नामेति चूर्णादेर्धारणाकर्षणहेतुभूत इति**। यतश्चूर्णादर्धार्यते, आकृष्यते वा, स विलक्षणः संयोग एव पिण्डीभावः। ननु तादृशविलक्षणसंयोगात्मके पिण्डीभावे स्नेह एव हेतुः सिद्धान्तिना भवताऽभ्युपगम्यते, परन्तु जलादिगतद्रवत्वमेव कारणं किं न स्यात्? तथा चोक्तलक्षणं न युक्तमत आह— **तादृशसंयोग इति**। न तु जलादिगतद्रवत्वस्येति। अत्र युक्तिमाह— **तथा सतीति**। तीव्राग्निसयोगेन द्रुतं यत् सुवर्णं तत्संयोगेनापि सक्तूनां धूलीनां वा पिण्डीभावः स्यात्, किन्तु नैवं भवति। उपसंहरति— **अत इति**।

लक्षणे गुणपदोपादानफलमाह— **विशेषणेति**। कालस्य जन्यमात्रं प्रति हेतुत्वेन पिण्डीभावं प्रत्यपि हेतुत्वादिति भावः। अक्षरार्थः स्पष्टः। चूर्णादिपिण्डी-

In Public domain. Digitization Muthulakshmi Research Academy

भावं प्रति स्वमतेन यो हेतुस्तमाह बोधिनीकारः—वस्तुतस्त्विति। तत्र हेतु-माह—मानाभावादिति। अयं भावः—यदि स्नेहः पिण्डीभावहेतुः स्यात्, तदा अद्रुतं यत् करकादिरूपं जलं, तेनापि सक्त्वादयः पिण्डीभावमापद्येरन्, न चैवं, तस्मात् द्रुतजलसंयोग एव पिण्डीभावे हेतुरिति। शेषं स्पष्टम्।

न्या.बो. पृ.१९. शब्दलक्षणं व्याख्यातुमाह—शब्दं लक्षयतीति। श्रोत्रग्राह्यत्वे सति गुणत्वं शब्दस्य लक्षणम्। विशेष्यदलस्य फलमाह—शब्द इति। यः गुणो यदिन्द्रियग्राह्यस्तन्निष्ठा जातिरपि तदिन्द्रियग्राह्येति नियमात् शब्दत्वस्यापि श्रोत्रग्राह्यत्वादित्याशयः। श्रोत्रेति पदप्रयोजनमाह—रूपादाविति। रूपादेर्गुणत्वेऽपि श्रोत्रग्राह्यत्वान्नातिव्याप्तिरिति भावः। शब्दानां त्रैविध्यमाह—स इति।

न्या.बो. पृ.२०. संयोगाज्जायते इति संयोगजः, विभागाज्जायते इति विभागजः, शब्दाज्जायते इति शब्दजः। संयोगजमुदाहरति—यथेति। विभागजमुदाहरति—वंशे इति। शब्दजं शब्दमुदाहरति शब्दोत्पत्तिदेशमिति। यत्र काष्ठादौ टङ्कादिप्रतीघातेन शब्द उत्पद्यते स शब्दोत्पत्तिदेशः, तमारभ्य श्रोत्रदेशपर्यन्तम्—कर्णपर्यन्तमित्यर्थः। निमित्तपवनेन—वायुद्वारा शब्दधारा जायन्ते उत्पद्यन्त इत्यर्थः। कथङ्कारं शब्दधारा जायन्ते? इति जिज्ञासायामाह—वीचीतरङ्गन्यायेन, कदम्बमुकुलन्यायेन वेति। यद्यपि वीचीतरङ्गशब्दौ पर्यायौ तथापि वीचीशब्दस्य लघुत्वद्योतकत्वात्, तरङ्गशब्दस्य च महत्त्वाशयेन प्रयुक्तत्वान्न पुनरुक्तिदोषः। यथा हि सरसि प्रस्तरादौ प्रक्षिप्ते सति तत्रैकस्तरङ्गः पूर्वं जायते, तस्मात्तरङ्गान्तरं, ततोऽपि तरङ्गान्तरमिति रीत्या तटपर्यन्तं तरङ्गा जायन्ते; यथा वा कदम्बमुकुलं भवति, तथा शब्दानां धाराः श्रोत्रदेशपर्यन्तं जायन्ते शब्दाश्च कर्णाभ्यां श्रूयन्ते इत्याशयः। तत्रोत्तरशब्दे पूर्वपूर्वशब्दः कारणम् भवतीत्याह—तत्रेति।

न्या.बो. पृ.२१. बुद्धिलक्षणं व्याख्यातुमाह—बुद्धेरिति। सर्वव्यवहारहेतुत्वे सति गुणत्वं बुद्धेर्लक्षणम्। व्यवहारपदेन घटमानय पटमानयेत्यादिशब्दप्रयोग एव ग्राह्यः। स च शब्दप्रयोगात्मको व्यवहारो ज्ञानं विना न सम्भवति। नहि घटज्ञानं विना 'घटमानय' इति कश्चिदपि व्यवहर्तुं शक्नोतीति बुद्धौ सर्वव्यवहारहेतुत्वं सिद्धम्।

स्मृतिलक्षणं व्याख्यातुमाह—स्मृतिं लक्षयतीति। संस्कारमात्रेति। संस्कारमात्रजन्यत्वमित्यस्य बहिरिन्द्रियाद्यजन्यत्वे सति संस्कारजन्यत्वमर्थः। यज्ज्ञानं चक्षुरादिबहिरिन्द्रियादिभिः जन्यं न स्यादथ च संस्कारेण जन्यं स्यात्तज्ज्ञानं स्मृतिरिति भावः। यथा कश्चित् काश्यां कमपि पुरुषं पश्यति, तदानीं दर्शनानन्तरमेव तस्यात्मनि पुरुषविषयकः संस्कार उत्पद्यते। तत्संस्कारबलादेवा-

In Public domain. Digitization Muthulakshmi Research Academy

न्यस्मिन् स्थाने उद्बोधकसमवधाने सति तेन पुरुषेण साकमिन्द्रियसन्निकर्षाभावेऽपि तस्य ज्ञानं जायते, तदेव स्मृतिः। तत्र संस्कार एव कारणं भवतीति सुतरां लक्षणं समन्वेति।

लक्षणे विशेषणकृत्यमाह—**विशेषणानुपादाने इति**। बहिरिन्द्रियाद्य-जन्यत्वविशिष्टसंस्कारजन्यत्वार्थक 'संस्कारमात्रजन्येति' पदानुपादाने इत्यर्थः। **प्रत्यक्षानुभवेऽतिव्याप्तिरिति**। तस्यापि ज्ञानत्वादिति शेषः। तद्वारणाय विशेषणोपादानमिति। तथा च प्रत्यक्षानुभवस्य बहिरिन्द्रियजन्यत्वेन संस्कार-मात्रजन्यत्वाभावान्नातिव्याप्तिरिति भावः।

विशेष्यस्य फलमाह—**संस्कारेति**। अयं भावः—संस्कारमात्र-जन्यत्वमात्रं लक्षणं स्यात् ज्ञानत्वञ्च नोपादीयेत तदा संस्कार-ध्वंसस्यापि संस्कारजन्यत्वेन तत्र स्मृतिलक्षणातिव्याप्तिः। ज्ञानत्वोपादाने तु ध्वंसस्याभावत्वान्नातिव्याप्तिः। ननु कथं संस्कारध्वंसः संस्कारजन्यस्तत्राह—**ध्वंसं प्रतीति**। अयमाशयः—यस्याभावः स प्रतियोगी। ध्वंसोऽपि अभाव एवेति संस्कारध्वंसस्य संस्कारः प्रतियोगी। एवं घटध्वंसं प्रति घटः प्रतियोगी भवतीत्यनयैव रीत्या अन्यत्रापि बोध्यम्। एवं यदि पूर्वं संस्कार एव न स्यात्तदा कस्य ध्वंसः स्यात्। यथा पूर्वं यदि घटो न स्यात्तदा दण्डेन कस्य ध्वंसो भवेत्। तस्मादेतन्मन्तव्यं यत् ध्वंसं प्रति प्रतियोगी कारणं भवतीति। तथा च संस्कार-ध्वंसेऽपि संस्कारजन्यत्वसिद्धौ तत्रातिव्याप्तिवारणाय ज्ञानत्वोपादानमावश्यक-मिति। यदा कश्चित् पुरुषः पूर्वमन्यत्र दृष्टः पुनरन्यत्र दृश्यते, तत्र 'सोऽयमिति' यज्ज्ञानं भवति, तदेव प्रत्यभिज्ञापदार्थः। तत्रातिव्याप्तिवारणाय मात्रपदम्। तथा सति नातिव्याप्तिः, तत्र प्रत्यभिज्ञायां तत्तांशे संस्कारजन्यत्वस्य सत्त्वेऽपि इदन्त्वांशे बहिरिन्द्रियजन्यत्वेन संस्कारमात्रजन्यत्वाभावात्।

अनुभवलक्षणं व्याख्यातुमाह—**अनुभवं लक्षयतीति**। मूलस्थतद्भिन्नमित्य-स्यार्थमाह—**तद्भिन्नत्वं नामेति**। लक्षणस्य पर्यवसितं रूपमाह—**तथा चेति**। स्मृतिभिन्नत्वविशेषणस्य फलमाह **तत्रेति**। **स्मृतावतिव्याप्तिरिति**। तस्या अपि ज्ञानत्वादिति शेषः। विशेष्योपादानफलमाह—**विशेष्यानुपादाने इति**। **घटादावतिव्याप्तिरिति**। घटादेरपि स्मृतिभिन्नत्वादिति शेषः। घटस्य स्मृतिभिन्नत्वेऽपि ज्ञानत्वाभावान्नातिव्याप्तिरित्याशयः।

न्या.बो. यथार्थानुभवलक्षणं व्याख्यातुमाह—**यथार्थानुभवमिति**। तद्वति तत्प्रकार-
पृ.२२.कानुभवत्वं यथार्थानुभवस्य लक्षणम्। तद्वतीत्यत्र तच्छब्दार्थश्चाह **तद्वती-त्यत्रेति**। लक्षणस्य स्वयं स्वरूपमाह—**तथाचेति**।

In Public domain. Digitization Muthulakshmi Research Academy

अयमत्राशयः—लक्ष्यताविवेचनावसरे विशेष्यता, प्रकारता, इत्युभे नाममात्रेण प्रदर्शिते। ते एवात्र विस्तरेणोच्येते। तथाहि—सर्वस्मिन्नपि सविकल्पके ज्ञाने एकं विशेष्यं भवति एकश्च प्रकारः। विशेषणमेव प्रकार इत्युच्यते। यथा 'अयं घट' इति ज्ञाने घटांशे घटत्वं प्रकारो घटश्च विशेष्योऽस्ति। घटत्वं प्रकारो यत्र तत् घटत्वप्रकारकम्, अत्र बहुव्रीहौ कप्रत्ययः। एवं घटो विशेष्यो यत्र तत् घटविशेष्यकं भवति। तथा चायं घट इति ज्ञानं घटत्वप्रकारकं घटविशेष्यकञ्चास्ति। एवं घटवद्भूतलमिति ज्ञाने घटस्य विशेषणत्वात् घट एव प्रकारः, भूतलञ्च विशेष्यमस्ति। तथाऽत्रापि घटः प्रकारो यत्रेति बहुव्रीहौ कप्रत्ययः। एवं भूतलं विशेष्यं यत्रेत्यत्रापि बहुव्रीहौ कप्रत्ययः। तथा च घटवद्भूतलमिति ज्ञानं घटप्रकारकं भूतलविशेष्यकञ्चास्तीति नैयायिकानां पन्थाः। एतद्रीत्या प्रकृते तद्वतीति सप्तम्या विशेष्यत्वार्थकत्वेन तद्वद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वं यथार्थानुभवस्य लक्षणं भवति। यथा—यत्र भूतले घटो वर्तते तद् भूतलं घटवद् भवति। तत्र यदि 'इदं भूतलं घटवदिति, ज्ञानं क्रियते तदा इदं ज्ञानं यथार्थम्। यतो हि इदं ज्ञानं तद्वद्-विशेष्यकं तत्प्रकारकञ्चास्ति। तत्पदेन प्रकारीभूतो (विशेषणीभूतः) घटरूप-धर्मोऽत्र ग्रहीतव्यः। तथा च घटवद् (भूतल) विशेष्यकं घटप्रकारकम् (घट-विशेषणकं) चेदं ज्ञानमतो यथार्थम्। एवंविधमेव चान्यदपि ज्ञानं यथार्थं भवति।

अत्रायं सारः—तत्प्रकारके ज्ञाने यद् विशेष्यमस्ति, तद् यदि तद्वत् स्यात् अर्थात् तस्य प्रकारस्याधिकरणं स्यात्, तदा तज्ज्ञानं यथार्थं भविष्यति, विशेष्यं यदि तद्वत् न स्यात्तदा तज्ज्ञानमयथार्थम् भविष्यति। एवमेव पटवद्गृहमिति ज्ञानं पटप्रकारकमस्ति, तस्य विशेष्यं गृहमपि पटवद् विद्यते। तस्मादिदं ज्ञानं यथार्थम्, तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वस्य यथार्थलक्षणस्य सत्त्वात्।

बोधिनीकारः स्वममप्युदाहरति—रजते इदं रजतमिति ज्ञानमिति। अयमाशयः—अत्रेदंपदेन पुरोवर्ती पदार्थो ज्ञेयः। तथा च इदं पुरोवर्ती पदार्थो रजतमस्तीति ज्ञानाकारः। अत्र ज्ञाने पुरो विद्यमानं रजतमेव विशेष्यं रजतत्वञ्च प्रकारः। अर्थात् इदं ज्ञानं रजतत्वप्रकारकं रजतविशेष्यकं विद्यते। विशेष्यीभूतं रजतञ्च रजतत्वरूपप्रकारवदस्ति। अतः तद्वद् (रजतत्ववद्रजत) विशेष्यकत्वे सति तत् (रजतत्व) प्रकारकत्वस्य सत्त्वाद् रजते 'इदं रजत'मिति ज्ञानं यथार्थम्! तदेवाह—अत्रेति प्रमायथार्थशब्दयोः पर्यायत्वात् मूले उक्तम्—सैवेति।

अतिप्रसङ्गवारणाय लक्षणस्य निष्कर्षमाह—तद्वदिति। तद्वन्निष्ठा या विशेष्यता, तादृशविशेष्यतानिरूपिता या तन्निष्ठा प्रकारता, तादृशप्रकारताशालित्वं

In Public domain. Digitization Muthulakshmi Research Academy

यथार्थत्वमित्यर्थः । प्रकारता हि विशेष्यतानिरूपिता भवति । अर्थात् विशेष्यता प्रकारताया निरूपिका भवति । यतो हि, यदि विशेष्यं रजतं न स्यात् तर्हि किमपेक्ष्य रजतत्वं प्रकारः स्यात् ! एवं, यदि रजतत्वं प्रकार एव न स्यात् तदा रजतं कस्य विशेष्यं कथ्येत । तस्माद् विज्ञायते यत् प्रकारता विशेष्यनिष्ठविशेष्यतारूपधर्मनिरूपिता भवति, एवं विशेष्यताऽपि प्रकारनिष्ठप्रकारतारूपधर्मनिरूपिता भवति । प्रकारताविशेष्यतयोः परस्परं निरूप्यनिरूपकभावो भवतीत्याशयः । एतदाशयेनैव चोक्तनिष्कर्षे तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतेत्युक्तम् । तत्पदेन प्रकारीभूतं रजतत्वं धर्तव्यम् । तथा च, रजतत्ववद्रजतनिष्ठा या विशेष्यता, तन्निरूपिता या रजतत्वनिष्ठा प्रकारता, तादृशप्रकारताशालित्वम् 'इदं रजतमि'ति ज्ञाने वर्तत इति लक्षणसमन्वयः । एवंविधनिष्कृष्टलक्षणस्य फलमाह–अन्यथेति । यत्र क्रमेण रङ्गरजते स्थापिते विद्येते, किन्तु भ्रमात् रङ्गस्थाने रजतं रजतस्थाने च रङ्गञ्जानाति 'इमे रजतरङ्गे' इति तत्रोक्तयथाश्रुतलक्षणस्यातिव्याप्तिरतस्तद्वारणमेव निष्कर्षस्य फलमित्याशयः । अतिव्याप्तिप्रकारं पूर्वं दर्शयति—तत्रापीति ।

अयं भावः—रङ्गरजतस्थाने रजतरङ्गे इति समूहालम्बनं यत् ज्ञानमस्ति, तत्र रजतत्वं रङ्गत्वञ्च प्रकारौ स्तः । अर्थात् इदं ज्ञानं रजतत्वप्रकारकं रङ्गत्वप्रकारकञ्चास्ते । ज्ञानमिदं तदा यथार्थमेव भविष्यति यदा पूर्वोक्तप्रकारकं सत् रजतत्ववद्विशेष्यकं रङ्गत्ववद्विशेष्यकञ्च स्यात् । इदं ज्ञानं तथा वर्ततेऽपि । यतोहि एतस्य रजतत्वरङ्गत्वप्रकारकसमूहालम्बज्ञानस्य विशेष्यीभूते पुरोविद्यमाने रङ्गरजते एव विद्येते, ते च रजतत्वद् रङ्गत्ववच्चापि स्तः । तस्माद् रजतत्ववद्विशेष्यकत्वरजतत्वप्रकारकत्वयोः, रङ्गत्ववद्विशेष्यकत्वरङ्गत्वप्रकारकत्वयोश्चोक्तसमूहालम्बने ज्ञाने सत्त्वात् यथार्थानुभवलक्षणस्य तत्रातिव्याप्तिः । उक्तनिष्कर्षे तु नातिव्याप्तिरिति समाधत्ते—उक्तेति ।

अयमाशयः—पुरः क्रमेण रङ्गरजते स्तः, किन्तु वैपरीत्येन रजतरङ्गे इति जानाति । अर्थात् रङ्गं रजतं जानाति, रजतञ्च रङ्गं जानाति । रङ्गांशे रजतत्वमवगाहते, रजतांशे च रङ्गत्वमवगाहते इति तु रहस्यम् । तथा च तदा रङ्गांशे रजतत्वमवगाहते तदा रजतत्वं प्रकारः रङ्गञ्च विशेष्यम् । प्रकारता रजतत्वनिष्ठा, विशेष्यता तु रङ्गनिष्ठा । रङ्गञ्च वस्तुतो रङ्गत्वधर्मवदस्ति न तु रजतत्वधर्मवदिति । एवञ्च रजतत्वनिष्ठा प्रकारता यदा रजतत्ववन्निष्ठविशेष्यतानिरूपिता स्यात् तदा तज्ज्ञानं यथार्थं भविष्यति । अत्र तु रजतत्वनिष्ठप्रकारता रङ्गत्ववन्निष्ठविशेष्यतानिरूपिता विद्यते । एवं यदा रजतांशे रङ्गत्वमवगाहते तदा रङ्गत्व प्रकारः रजतञ्च विशेष्यम् । प्रकारता रङ्गत्वनिष्ठा विशेष्यता च रजतनिष्ठा । रजतञ्च वस्तुतो रजत्वधर्मवदस्ति न तु रङ्गत्वधर्मवदिति ।

In Public domain. Digitization Muthulakshmi Research Academy

एवंचात्रापि रङ्गत्वनिष्ठा प्रकारता यदा रङ्गत्ववन्निष्ठविशेष्यतानिरूपिता स्यात् तदैवैतज्ज्ञानं यथार्थं स्यात्। अत्र तु रङ्गत्वनिष्ठा प्रकारता रजतत्ववन्निष्ठविशेष्यतानिरूपिता विद्यते। तस्मात् रङ्गरजतयोः स्थाने इमे रजतरङ्गे इति समूहालम्बनज्ञानस्य न याथार्थ्यापत्तिः, रजतत्ववन्निष्ठविशेष्यतानिरूपितरजतत्वनिष्ठप्रकारताशालित्वस्य, रङ्गत्ववन्निष्ठविशेष्यतानिरूपितरङ्गत्वनिष्ठप्रकारताशालित्वस्य च निष्कृष्टलक्षणलब्धस्य प्रकृतसमूहालम्बनभ्रमेऽभावादिति।

न्या.बो. एतदेव सर्वमाह बोधिनीकारः—**तज्ज्ञानस्येति**। उक्तसमूहालम्बनभ्रमस्येत्यर्थः। रङ्गांशे रजतत्वावगाहित्वेन रजतत्वप्रकारताया रङ्गत्ववन्निष्ठविशेष्यतानिरूपितत्वेऽपि रजतत्ववन्निष्ठविशेष्यतानिरूपितत्वाभावात् इति, रजतांशे रङ्गत्वावगाहित्वेन रङ्गत्वप्रकारताया रजतत्ववन्निष्ठविशेष्यतानिरूपितत्वेऽपि रङ्गत्ववन्निष्ठविशेष्यतानिरूपितत्वाभावादिति च रीत्यान्वयः। अत्रत्या सर्वापि रीतिः पूर्णं स्मरणीया यथाऽग्रे अयथार्थानुभवलक्षणव्याख्या न कठिना प्रतीयेत, परं सरला सती मनोमोदमुत्पादयेदिति। समूहालम्बनज्ञानस्य स्वरूपमाह—**नानेति**। उदाहरणन्तूक्तमेवेति।

पृ.२३.

अयथार्थानुभवलक्षणं व्याख्यातुमारभते—**अयथार्थानुभवं लक्षयतीति**। **मूले तदभाववतीति**। अत्रापि लक्षणे तत्पदेन प्रकारीभूतो (विशेषणीभूतः) धर्मो धर्त्तव्यः। सप्तम्याश्च विशेष्यत्वमर्थो ज्ञेयः। तथा च पूर्वरीत्या तदभाववान् विशेष्यो यत्र ज्ञाने तत् तदभाववद्विशेष्यकं ज्ञानम्, एवं तत् प्रकारो यत्र ज्ञाने तत् तत्प्रकारकमित्युच्यते। तथा च तदभाववद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वम् अयथार्थानुभवस्य लक्षणम्। यथा पुरोविद्यमानायां स्वच्छतरायां शुक्तौ 'इदं रजत'मिति ज्ञानमयथार्थम्। यतो रजतं नास्ति किन्तु शुक्तिमेव रजतं जानाति। शुक्तौ शुक्तित्वमनवगाह्य रजतत्वमेवावगाहते इति तात्पर्य्यम्। अत्र ज्ञाने रजतत्वं प्रकारो विद्यते, शुक्तिश्च विशेष्यभूतास्ति। सा प्रकारीभूतरजतत्वधर्मवती नास्ति किन्तु रजतत्वाभाववती विद्यते। तथा च रजतत्वाभाववद्विशेष्यकत्वे सति रजतत्वप्रकारकत्वस्योक्तज्ञाने सत्त्वात् तज्ज्ञानमयथार्थम्। अतिप्रसङ्गवारणाय पूर्वरीत्याऽत्रापि तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वं (शालिज्ञानत्वं) निष्कृष्टलक्षणं करणीयम् इत्याह—**अत्रापीति**। निष्कर्षाभावे योऽतिप्रसङ्गस्तमाह—**अन्यथेति**।

अयं भावः यत्र क्रमेण रङ्गरजते स्थापिते स्तः, तत्र च तेनैव क्रमेण "इमे रङ्गरजते, इति समूहालम्बनं ज्ञानं जायते, तज्ज्ञानं यथार्थमस्ति किन्तु निष्कृष्टलक्षणाभावे यथाश्रुतस्य मूलोक्तस्यायथार्थानुभवलक्षणस्य तत्रातिव्याप्तिः। यतो हि अत्र रङ्गत्वरजतत्वे प्रकारौ स्तः, रङ्गरजते च द्वे विशेष्ये स्तः। रङ्गरूपं

In Public domain. Digitization Muthulakshmi Research Academy

विशेष्यं रजतत्वाभाववदस्ति, रजतरूपं विशेष्यञ्च रङ्गत्वाभाववदस्तीत्यपि निर्विवादम् । यथा चात्र रङ्गरजतयोर्द्वयोरपि विशेष्यतया, तयोर्विशेष्ययोः रङ्गत्वरजतत्वरूपप्रकारौ प्रति वैपरीत्येन सम्बन्धमभिप्रेत्य इदं समूहालम्बनं ज्ञानं रजतत्वाभाववद्रङ्गविशेष्यकत्वे सति रजतत्वप्रकारकमस्ति, एवं रङ्गत्वाभाववद्रजतविशेष्यकत्वे सति रङ्गत्वप्रकारकमस्ति, अतोऽतिव्याप्तिरिति । तदेवाह—**एतत्समूहालम्बनस्येत्यादिना सत्त्वादित्यन्तेन ।**

न्या.बो. पृ.२४. निष्कृष्टलक्षणस्य तु नातिव्याप्तिरित्याह—**उक्तनिष्कर्षे त्विति ।** उक्तप्रमात्मकसमूहालम्बनं ज्ञानं रङ्गे रङ्गत्वमवगाहते, एवं रजते रजतत्वमवगाहते । अतोऽत्र विशेष्यवैपरीत्याभिप्रायोऽशक्यः । अर्थात् रङ्गत्वप्रकारस्य रङ्गमेवात्र विशेष्यम् एवं रजतत्वप्रकारस्य रजतमेव विशेष्यम् । तथा च रङ्गत्वनिष्ठा प्रकारता रङ्गनिष्ठविशेष्यतानिरूपिताऽस्ति, रङ्गश्च रङ्त्वाभाववन्नास्ति । एवञ्च रङ्गत्वाभाववन्निष्ठविशेष्यतानिरूपिता रङ्गत्वनिष्ठा प्रकारता नास्ति । तथा रजतत्वनिष्ठा प्रकारता रजतनिष्ठविशेष्यतानिरूपिता अस्ति । रजतश्च रजतत्वाभाववन्नास्ति । एवञ्च रजतत्वनिष्ठा प्रकारताऽपि रजतत्वाभाववन्निष्ठविशेष्यतानिरूपिता नास्ति । तस्मात् तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकत्वस्य अयथार्थानुभवलक्षणस्य रङ्गरजतयोः स्थले जायमाने 'इमे रङ्गरजते' इति समूहालम्वने प्रमात्मकज्ञानेऽसत्त्वात् नातिव्याप्तिरिति भावः ।

तदेतत् सर्वमाह—**तादृशप्रमाया इति ।** उदाहृतयथार्थज्ञानस्येत्यर्थः । रजतांशे रजतत्वावगाहित्वेन रजतत्वप्रकारताया रजतत्वाभाववद्रङ्गविशेष्यतानिरूपितत्वाभावात्, एवं रङ्गांशे रङ्गत्वावगाहित्वेन च रङ्गत्वप्रकारताया रङ्गत्वाभाववद्रजतनिष्ठविशेष्यतानिरूपितत्वाभावान्नातिव्याप्तिरित्यन्वयः ।

अयथार्थानुभवस्य स्वयमप्युदाहरणमाह—**यथेति ।** सुव्याख्यातमेतत् ।

सर्वत्र द्वैविध्यत्रैविध्याद्युक्तेः विभागपरतया मूलेऽपि चतुर्विधत्वोक्तिः यथार्थानुभवविभागपरैवेत्याह—**यथार्थानुभवं विभजते इति ।** विपूर्वकभज्धातोरर्थः —स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मप्रकारकबोधानुकूलव्यापाररूपः पूर्वमेव प्रतिपादितः । अत्रापि तत्समन्वयो यथा—स्वं विपूर्वकभज्धातुः, तत्समभिव्याहृतं पदं—यथार्थानुभवपदं, तदर्थतावच्छेदकं—यथार्थानुभवत्वम्, तद्व्याप्या मिथो विरुद्धाश्च यावन्तो धर्माः—प्रत्यक्षत्वानुमितित्वोपमितित्वशाब्दत्वधर्माः, तावद्धर्मप्रकारवोधाः—इदं प्रत्यक्षमियमनुमितिरियमुपमितिरयं शाब्दबोध इति बोधाः, तादृशबोधानुकूलो व्यापारः—प्रत्यक्षानुमित्युपमितिशाब्दभेदादिति वाक्यप्रयोगरूपः । स एवात्र विभागपदार्थ इत्यर्थः ।

In Public domain. Digitization Muthulakshmi Research Academy

न्या.बो. 'तत्करणमि'ति मूलस्थं पदं व्याख्यातुमाह—तत्करणमितीति । फलीभूता पृ.२९.ये प्रत्यक्षानुमित्युपमितिशाब्दास्तेषां करणमित्यर्थः। प्रत्यक्षादीनां चतुर्णां फलत्वोक्तिश्च इन्द्रिय, व्याप्तिज्ञान, सादृश्यज्ञान, पदज्ञानरूपसाधनजन्यत्वात् सङ्गच्छते । यथार्थानुभवकरणानि प्रत्यक्षानुमानोपमानशब्दाः । तान्येव न्याये चत्वारि प्रमाणान्युच्यन्ते । तेषां सामान्यलक्षणमाह—प्रत्यक्षादीति । विशेष-लक्षणमत्र कथं नोक्तमत आह—एकैकेति ।

मूलोक्तकरणलक्षणं व्याख्यातुमाह—करणलक्षणमाहेति । मूललक्षणे न्यूनतां परिजिहीर्षुः व्यापारवदिति निवेश्य व्याचष्टे—व्यापारवदिति । व्यापारवत्त्वे सति असाधारणत्वे च सति कारणत्वं करणलक्षणमित्यर्थः । यथा-दण्डो घट प्रति असाधारणकारणत्वात् भ्रमणरूपव्यापारवत्त्वाच्च करणं भवति । असाधारणत्वं किमित्याह–असाधारणत्वञ्चेति । कार्यताकारणते अपि लक्ष्यता-विवेचनावसरे नाममात्रेण सङ्केतिते । कार्यं घटादिकं, कारणं दण्डादिकम्, कार्यता घटनिष्ठा कारणता दण्डनिष्ठा । यथा पृथिवीनिष्ठाया लक्ष्यताया अवच्छेदकं पृथिवीत्वं भवति तथा घटनिष्ठायाः कार्यताया अवच्छेदकं घटत्वं, दण्डनिष्ठायाः कारणतायाश्चावच्छेदकं दण्डत्वं भवति । पूर्वोक्तप्रकारताविशेष्यतावत् कार्यता-कारणतयोरपि निरूप्यनिरूपकभावो भवति । अर्थात् कार्यतानिरूपिता कारणता भवति, कारणतानिरूपिता च कार्यता भवति । यदि कारणं न स्यात् तर्हि कस्य कार्यं कथ्यते ? एवं यदि कार्यं न स्यात् तदा किंप्रति कारणं भवेत् ! तस्मात् तयोरेकतराऽन्यतरनिरूपिता भवतीति युक्तम् । एवं यो धर्मो यस्या अवच्छेदकः सा तद्धर्मावच्छिन्नेति पूर्वन्यायात् घटत्वं कार्यतायाः अवच्छेदकमतो घटनिष्ठा कार्यता घटत्वावच्छिन्ना । तथा कार्यत्वातिरिक्तः—कार्यत्वभिन्नो यो घटत्वादि-धर्मस्तदवच्छिन्ना या घटादिनिष्ठा कार्यता, तन्निरूपिता या कारणता, तच्छा-लित्वस्य दण्डे सत्त्वात् घटं प्रति दण्डोऽसाधारणं कारणम् । तदेवोदाहरति—यथेति । लक्षण सङ्गमयति—कार्यत्वेति । दण्डेऽसाधारण कारणत्वं वर्तत एव, भ्रम्यादिरूपव्यापारवत्त्वपि वर्तते, तस्माद् दण्डः करणमित्याह—भ्रम्येति । असाधारणकारणलक्षणे कार्यत्वातिरिक्तेति विशेषणं दत्तम्, तत्रातिरिक्तपदा-दानेन घटत्वादिपदादानेन च तदेव साधारणकारणस्य लक्षणं भवतीत्याह—साधारणत्वमिति । कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वमिति तल्लक्षणम् ।

अस्यायमाशयः—कार्यता विशेषरूपेण यथा घटे वर्तते तथा सामान्यरूपेण कार्यमात्रे विद्यते । घटमात्रनिष्ठायाः कार्यताया अवच्छेदकं यथा घटत्वं तथा कार्यमात्रनिष्ठायाः कार्यताया अवच्छेदकं कार्यत्वं वर्तते । तथा च कार्यत्वाव-च्छिन्नकार्यतानिरूपितकारणताशालित्वं साधारणकारणत्वम् । ईश्वरोऽदृष्टम्

In Public domain. Digitization Muthulakshmi Research Academy

कालादिकं च कार्यमात्रं प्रति कारणं भवति न तु घटमेव पटमेव वा प्रति। तथा च कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वस्येश्वरादौ सत्त्वात् ईश्वरादिकं सर्वं जन्यपदार्थं प्रति साधारणकारणं भवतीत्याशयः। तदेवाह – **ईश्वरेति**। अदृष्टं-धर्माधर्मौ। कार्यमात्रं प्रति अदृष्टमपि कारणं भवति। स्वस्वादृष्टवशादेव कश्चिद्धनी, कश्चिद्रङ्को, बधिरो, मूकः, काणो वा भवतीति भावः।

न्या.बो. पृ.२६. कारणलक्षणव्याख्यानायाह—**कारणं लक्षयतीति**। कार्यं प्रति नियतत्वे सति पूर्ववृत्तित्वमिति लक्षणम्। कार्यं प्रति नियतत्वञ्च कार्यसत्त्वे निश्चितसत्ताकत्वम्। अर्थात् यत्र कार्यं भवेत् तत्र पूर्वमवश्यं विद्यमानतयाऽपेक्षितं स्यादिति यावत्। अयमाशयः—कस्यचिद्रासभस्योपरि मृत्तिकामानीय कुम्भकारो घटं रचितवान् तर्हि रासभः पूर्वं विद्यमानोऽपि घटं प्रति कारणं न भवति। यतो हि नहि घटोत्पत्तिपूर्वं सर्वत्र रासभस्तिष्ठत्येव, अन्यथापि मृत्तिकानयनस्य संभवात्। तस्माद् घटं प्रति नियतत्वाभावाद् रासभः तं प्रति कारणं न भवतीति।

ननु घटं प्रति नियतत्वे सति पूर्ववृत्तित्वं दण्डरूपेऽपि वर्तते ऽतो दण्डवद् दण्डरूपमपि घटं प्रति कारणं स्यादत आह – **नियतपूर्ववर्तिन इति**। अनन्यथासिद्धपदमपि—अन्यथासिद्धा ये सन्ति, तद्भिन्नत्वं लक्षणे विशेषणीयमित्यर्थः। तथा च अन्यथासिद्धभिन्नत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वमिति निष्कर्षः। दण्डरूपादीनामन्यथासिद्धत्वान्न तत्र कारणलक्षणातिव्याप्तिरित्याह—**दण्डरूपादीनामिति**। अन्यथासिद्धभेदा ग्रन्थान्तरतोऽनुसन्धेयाः।

कार्यलक्षणं व्याख्यातुमाह—**कार्यं लक्षयतीति**। लक्षणस्वरूपमाह—**प्रागभावेति**।उपपादयति—**कार्योत्पत्तेरिति**। घटादिकार्योत्पत्तेः पूर्वमित्यर्थः। इह घटो भविष्यतीति प्रतीतिर्या जायते, तस्यां प्रतीतौ घटोत्पत्तिप्राक्कालिको घटाभावो विषयीभूतो विद्यते स एव प्रागभावनाम्ना व्यवह्रियते। यस्याभावः स प्रतियोगीति नियमात् उक्तघटप्रागभावप्रतियोगित्वस्य घटे सत्त्वाद् घटः कार्यमुच्यते इति भावः।

न्या.बो. पृ.२७. मूलकारकृतं कारणलक्षणविभागं किञ्चिद्विशिष्यानुवदति—**समवायीत्यादि**।

समवायिकारणलक्षणं व्याख्यातुमाह—**समवायिकारणं लक्षयतीति**। मूलोक्तलक्षणस्यार्थमाह—**यस्मिन्निति**। यस्मिन् समवेतं सदित्यस्यार्थः समवायेन सम्बद्धं सदिति। अयं भावः—अवयवावयविनोः परस्परं समवायः सम्बन्ध इति पूर्वमस्माभिरुक्तम्। कपालद्वयमवयवभूतं घटश्चावयवी। तथा चावयवीभूतो घटः अवयवभूतयोः कपालयोः समवायसम्बन्धेन सम्बद्धः सन् उत्पद्यतेऽतो घटं प्रति

In Public domain. Digitization Muthulakshmi Research Academy

कपालद्वयं समवायिकारणम् । एवं गुणगुणिनोरपि समवाय एव सम्बन्ध इत्यप्युक्तम् । तथा च पटरूपात्मको गुणः समवायेन गुणिनि पटे सम्बद्धः सन् उत्पद्यतेऽतः पटरूपस्य समवायिकारणं पटः । तन्तुषु लक्षणं सङ्गमयति— तन्तुष्विति ।

सामान्यलक्षणमाह—सामान्यलक्षणन्त्विति । समवायसम्बन्धावच्छिन्ना या कार्यता, तन्निरूपितं यत् तादात्म्यसम्बन्धावच्छिन्नं कारणत्वं, तदेव समवायिकारणत्वमित्यर्थ ।

अस्यायमाशयः—यथा लक्ष्यताया अवच्छेदकं पृथिवीत्वादिकमुक्तम्, तथा कार्यताया अपि घटत्वादिकमवच्छेदकं भवतीत्यप्यसाधारणकारणत्वव्याख्यायां प्रत्यपादि । तत्रेदमपि बोध्यं यत् अवच्छेदकं धर्मसम्बन्धभेदेन द्विविधं भवति । येन सम्बन्धेन कार्यं कारणे तिष्ठेत् स एव कार्यतावच्छेदकः सम्बन्धः । येन सम्बन्धेन कारणं तिष्ठेत् स एव सम्बन्धः कारणतावच्छेदकः सम्बन्धो भवति । एवं यत्र कार्यमुत्पादनीयं तत्रैव कारणस्यापि सत्ताऽऽवश्यकी, अन्यथा प्रयागस्थमृत्तिकातः काश्यां घट उत्पद्येत । तथा च समवायेन सम्बन्धेन घटः कपालयोरुत्पद्यतेऽतो घटनिष्ठायाः कार्यताया अवच्छेदकः सम्बन्धः समवायः । यो धर्मो यस्या अवच्छेदक इति पूर्वनियमवत् यः सम्बन्धो यस्या अवच्छेदको भवति सा तत्सम्बन्धावच्छिन्ना भवति । तथा च घटनिष्ठा कार्यता समवायसम्बन्धावच्छिन्ना, घटत्वधर्मावच्छिन्ना चास्तीति सिद्धम् । तथा कार्यकारणयोः सामानाधिकरण्यापेक्षणात् घटो यदि समवायेन कपाले उत्पद्यते तदा तत्रैव (कपाले) कारणीभूतं कपालमप्यपेक्ष्यते, कपाले च कपालं तादात्म्यसम्बन्धेन तिष्ठति, स्वस्मिन् स्वस्य तादात्म्यसम्बन्धाभ्युपगमात् । तथा च कपालनिष्ठकारणताया अवच्छेदकः सम्बन्धस्तादात्म्यम्, एवं तन्निष्ठकारणताया अवच्छेदको धर्मः कपालत्वम् । पूर्वरीत्या च कारणता तादात्म्यसम्बन्धावच्छिन्ना कपालत्वधर्मावच्छिन्ना च सिद्धा । एवं सर्वापि कार्यता सम्बन्धस्थाने समवायसम्बन्धावच्छिन्नाऽत्र ज्ञेया, धर्मस्थाने तु घटत्वपटत्वादिस्वस्वधर्मावच्छिन्ना । एवं कारणतापि सर्वा सम्बन्धस्थाने तादात्म्यसम्बन्धावच्छिन्नाऽत्र ज्ञेया; धर्मस्थाने तु कपालत्वतन्तुत्वादिस्वस्वधर्मावच्छिन्ना भवतीति । तथा चेदं लक्षणं घटं प्रति समवायिकारणे कपालयोः, पटं प्रति च समवायिकारणे तन्तुष्वेव घटतेऽतो घटादिकं प्रति कपालादिकमेव समवायिकारणमिति । लक्षणं कपालरूपे लक्ष्ये संगमयति—समवायसम्बन्धेनेत्यादि । व्याख्यातप्रायमेतत् ।

न्या.बो. पृ.२८. सप्तसु पदार्थेषु मध्ये द्रव्यमेव कस्यापि समवायिकारणं भवतीति रहस्यम् उक्तलक्षणरूपया युक्त्या प्रकटयति—समवायेनेति । समवायसम्बन्धावच्छिन्न-

In Public domain. Digitization Muthulakshmi Research Academy

जन्यभावत्वावच्छिन्नजन्यभावनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणताया द्रव्ये एव सत्त्वादित्यर्थः। सामान्यादीनां नित्यतया तेषु कारणापेक्षैव नास्तीत्यत आह—**द्रव्यगुणकर्मसु त्रिष्विति**। गुणकर्माणि प्रति द्रव्यमेव समवायिकारणं द्रव्यं प्रति तु कपालादिरूपा द्रव्यावयवा एव समवायिकारणमित्याह—**द्रव्येत्विति**। पटरूपात्मकगुणं प्रति पटात्मकं द्रव्यं समवायिकारणमित्युदाहृतं, तदेव प्रकटयति—**गुणादावपीति**।

असमवायिकारणलक्षणं व्याख्यातुमाह– **असमवायिकारणं लक्षयतीति**। स्वरूपप्रदर्शनपुरःसरं तस्य द्वैविध्यमाह—**कार्येणेत्यादिना**। कार्येण पटादिना सहैकस्मिन्नर्थे तन्त्वादौ समवेतं सत्—समवायसम्बन्धेन सम्बद्धं सत् यत् कारणं तदेकमसमवायिकारणं भवति। यत्र कार्यं समवायसम्बन्धेन भवेत् तत्रैव समवायसम्बन्धेन यत् कारणं तिष्ठेत् तत् प्रथममित्यर्थः। एवं यत् कारणेन—स्वकार्यसमवायिकारणेनेत्यर्थः, सह एकस्मिन्नर्थे तन्त्वादौ समवेतं सत्—समवायसम्बन्धेन सम्बद्धं सत् कारणं भवति तद्द्वितीयमसमवायिकारणमित्यर्थः।

न्या.बो. प्रथमलक्षणानुसारेण प्रथमसमवायिकारणं सामान्यतः प्रदर्शयति–**जन्येति**।
पृ.२८. यावन्ति जन्यद्रव्याणि, तेषु अवयवसंयोग एवासमवायिकारणम्। यतो हि जन्यद्रव्यं घटादिरूपकार्यं समवायसम्बन्धेन कपालादौ तिष्ठति तत्रैव च कपालद्वयसंयोगः समवायेन तिष्ठति, गुणगुणिनोः समवायात्। तस्मात् सर्वत्र जन्यद्रव्यं प्रत्यवयवसंयोगः असमवायिकारणं भवतीति सिद्धम्। यत्र सामान्ययोः कार्यकारणभावस्तत्र विशेषयोरपि भवतीति सिद्धान्तात् मूलकृता प्रदर्शितं विशेषोदाहरणं स्पष्टयितुमाह—**पटात्मकार्ये इति**। स्पष्टार्थः। मूलकृता लक्षितस्य स्वयं व्याख्यातस्य च द्वितीयासमवायिकारणस्य मूलकृत्प्रदर्शितमुदाहरणं स्पष्टयितुमाह–**द्वितीयमिति**।

अयमाशयः—यत् कारणं स्वकार्यसमवायिकारणेन सह एकस्मिन्नर्थे समवायेन सम्बद्धं सत् कारणं भवति, तदसमवायिकारणं भवति। यथा पटरूपं प्रति तन्तुरूपमसमवायिकारणम्। यादृशं हि तन्तूनां रूपं भवति, तादृशमेव पटस्यापि रूपं भवतीति सर्वविदितम्। तत्र स्वं—तन्तुरूपं, तस्य कार्यं पटरूपम्, तस्य समवायिकारणं पट इति समवायिकारणव्याख्याने प्रतिपादितम्। तथा च तन्तुरूपकार्यपटरूपसमवायिकारणीभूतः पटः समवायसम्बन्धेन तन्तुषु तिष्ठति, अत्रैव च तन्तुरूपमपि समवायसम्बन्धेन तिष्ठतीति पटरूपं प्रति तन्तुरूपमसमवायिकारणम्। एवमेव घटरूपं प्रति कपालरूपमसमवायिकारणम्। यतो हि कपालरूपस्य यत्कार्यं घटरूपं, तस्य यत् समवायिकारणं घटः, स समवायेन कपालयोस्तिष्ठति तत्रैव समवायेन कपालरूपस्यापि सत्त्वादिति भावः। समन्वयप्रकारमेवाह—**कारणेन सहेति**। स्पष्टोऽर्थः।

In Public domain. Digitization Muthulakshmi Research Academy

द्विविधासमवायिकारणसाधारणं लक्षणमाह—**सामान्यलक्षणन्त्विति**। समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता या समवायस्वसमवायिसमवेतत्वान्यतर-सम्बन्धावच्छिन्ना कारणता तदाश्रयत्वमसमवायिकारणत्वमिति।

अयं भावः—येन सम्बन्धेन कार्यं भवेत् स कार्यतावच्छेदकसम्बन्धः। एवं येन सम्बन्धेन कारणं तिष्ठेत् स कारणतावच्छेदकसम्बन्धः। कार्यं यत्रोत्पादनीयं तत्रैव कारणेनापि भवितव्यमिति सर्वं पूर्वमुक्तम्। तथा चासमवायिकारणस्य द्विविधे उदाहरणे कार्यतावच्छेदकः समवाय एव सम्बन्धः, कारणतावच्छेदकस्तु प्रथमे समवायसम्बन्धः द्वितीये च स्वसमवायिसमवेतत्वसम्बन्धो भवति। कथमिति चेत् श्रूयताम्—प्रथमे पटं प्रति तन्तुसंयोगोऽसमवायिकारणम्। तत्र पटः समवायसम्बन्धेन तन्तुषूत्पद्यते, तत्रैव तन्तुसंयोगोऽपि विद्यमानः सन् कारणं भवत्यतोऽत्र कार्यताकारणते उभे अपि समवायसंम्बन्धावच्छिन्ने भवतः। द्वितीये च पटरूपं प्रति तन्तुरूपमसमवायिकारणं भवति। तत्र कार्यं पटरूपं समवायेन पटे भवति, तत्रैव पटे कारणीभूतं तन्तुरूपं स्वसमवायिसमवेतत्वसम्बन्धेन वर्तते। यतोऽत्र स्वपदेन तन्तुरूपं गृह्यते, तत्समवायिकारणं तन्तवः, तत्र समवेतत्वं—समवाय-सम्बन्धेन विद्यमानत्वं पटेऽस्ति। अतोऽत्र कार्यता समवायसम्बन्धावच्छिन्ना, कारणता च स्वसमवायिसमवेतत्वरूपपरम्परासम्बन्धावच्छिन्नाऽस्ति। अन्यतर-शब्दस्य वाकारार्थे प्रयुक्तत्वात् समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता या समवायसम्बन्धावच्छिन्ना कारणता, तदाश्रयत्वस्य प्रथमकारणतामादाय तन्तुसंयोगे समन्वयः, तथा तादृशकार्यतानिरूपितस्वसमवायिसमवेतत्वसम्बन्धावच्छिन्ना या कारणता, तदाश्रयत्वस्य च लक्षणस्य द्वितीयकारणतामादाय तन्तुरूपे समन्वयः।

न्या.बो. समवायमाश्रित्य समन्वयमाह न्यायबोधिनीकारः—**द्रव्यासमवायिकारणी-**
पृ.३०. **भूतेति**। व्याख्यातप्रायमेतत्।

आद्यपतनासमवायिकारणं गुरुत्वम्, एवमाद्यस्यन्दनासमवायिकारणं द्रवत्वम् इति पूर्वमुक्तम्, तदेवात्र प्रसङ्गात् समर्थयति—**एवमिति**। आद्यपतनं—कार्यम्, तत् समवायेन लोष्टादावुत्पद्यते, तत्रैव लोष्टे समवायेन विद्यमानं सद् गुरुत्वं कारणं भवति। तथा च समवायसम्बन्धावच्छिन्नाद्यपतननिष्ठकार्यतानिरूपितसमवाय-सम्बन्धावच्छिन्नकारणताया गुरुत्वे सत्त्वाद् गुरुत्वमाद्यपतनस्यासमवायिकारणं भवति। एवमाद्यस्यन्दनं समवायेन जले उत्पद्यते, तत्रैव समवायेन विद्यमानस्य द्रवत्वस्य कारणत्वात् द्रवत्वमसमवायिकारणं भवतीति भावः।

स्वसमवायिसमवेतत्वसम्बन्धमाश्रित्य सामान्यलक्षणस्य स्वयमपि समन्वय-माह टीकाकारः—**अवयवीति**। घटपटरूपं हि अवयविनो घटपटादेर्गुणभूतं कपालतन्तुरूपं च अवयवस्य कपालतन्त्वादेर्गुणभूतं, तस्येत्यर्थः। कारणत्वादित्य-

In Public domain. Digitization Muthulakshmi Research Academy

ग्रेण सम्बन्धः। तत्सम्बन्धावच्छिन्ना—स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नेत्यर्थः। समन्वयप्रकारं स्वयं प्रदर्शयति—अवयवगुणकपालतन्तुरूपादेरिति।

न्या.बो. निमित्तकारणलक्षण स्पष्टयितुमाह—निमित्तकारणं लक्षयतीति।
पृ.३१.लक्षणन्तु टीकायामेवोक्तम्।

त्रिविधकारणलक्षणानि व्याख्यातानि, सम्प्रत्युपसंहृतं करणलक्षणं व्याख्यातुमाह—तदेतदितीति। त्रिविधकारणमध्ये यदसाधारणं कारणं तत् करणमिति लक्षणम्।

नन्वेतस्य लक्षणस्य कपालद्वयसंयोगे तन्तुसंयोगे चातिव्याप्तिः। पूर्वोक्तस्य कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वस्यैवासाधारणलक्षणत्वात्। प्रकृते कार्यत्वातिरिक्तघटत्वपटत्वधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वस्य कपालसंयोगे तन्तुसंयोगे च सत्त्वादिति चेदत्राह—व्यापारवत्त्वे सतीति। तथा चोक्तासाधारणकारणत्वस्य तादृशसंयोगे सत्त्वेऽपि तस्य व्यापारवत्त्वाभावान्नातिव्याप्तिः। दण्डादौ तु असाधारणत्वं व्यापारवत्त्वञ्चास्तीति घटादिकं प्रति दण्डादेः करणत्वं सूपपन्नम्। अक्षरार्थस्तु व्याख्ययैव गतार्थः।

ननु व्यापारवत्त्वे सतीति करणलक्षणे विशेषितं, तत्र व्यापारत्वमेव किमित्याह—व्यापारत्वञ्चेति। तज्जन्यत्वे सति तज्जन्यजनकत्वमिति व्यापारलक्षणम्। अत्र तत्पदेन करणत्वेनाभिप्रेतो दण्डादिर्गृह्यते। भ्रमिर्भ्रमणम्। स हि दण्डाज्जन्यो भवति, अथ च दण्डजन्यो यो घटस्तस्य जनकोऽपि भवति, तस्मात् भ्रम्यादिर्व्यापारः कथ्यते। तद्वत्त्वाच्च दण्डः करणं भवति। एवं कपालसंयोगतन्तुसंयोगादिरपि क्रमेण कपालतन्त्वोः व्यापारो भवति। कपालसंयोगस्य कपालजन्यत्वे सति कपालजन्यस्य घटस्य जनकत्वात्, एवं तन्तुसंयोगस्य तन्तुजन्यत्वे सति तन्तुजन्यस्य पटस्य जनकत्वात्। एतदेवाह—भवति हीत्यादिना घटपटजनकत्वा-
न्या.बो.दित्यन्तेन। असाधारणत्वविशेषणस्य फलमाह—करणलक्षणे इति। ईश्वरा-
पृ.३२.दृष्टादेरपि व्यापारवत्कारणत्वात् करणत्वं स्यादतः कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणत्वरूपमसाधारणत्वं विशेषितम् ईश्वरादेस्तु कार्यत्वसामान्यावच्छिन्नं प्रति कारणत्वादिति भावः।

चक्षूरसनात्वग्घ्राणश्रोत्रमनांसि षडिन्द्रियाण्येव प्रत्यक्षप्रमाणपदेनोच्यन्ते। तल्लक्षण प्रत्यक्षज्ञानकरणत्वं मूलकारेणोक्तम्, तदेव व्याख्यातुमाह—षड्विधेति। प्रमाभूतेषु प्रत्यक्षादिषु,—इत्यत्रादिपदेन अनुमित्युपमितिशाब्दाः पूर्वोक्ता गृह्यन्ते। तत्र प्रत्यक्षात्मकं यज्ज्ञानं चाक्षुष, रासन, घ्राणज, स्पार्शन, श्रात्रण, मानसप्रत्यक्षं, तत् प्रति असाधारणकारणत्वात् इन्द्रियसन्निकर्षरूपव्यापारवत्त्वाच्चेन्द्रियाण्येव करणानि भवन्तीति तेषां प्रत्यक्षप्रमाणत्वं सिद्धम्। पर्यवसितमाह—अत इति।

In Public domain. Digitization Muthulakshmi Research Academy

संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेष्यविशेणभावश्चेति षड्विधसन्निकर्षाः प्रत्यक्षज्ञानहेतवो लक्ष्यन्ते, त एवेन्द्रियजन्यज्ञाने (प्रत्यक्षे) इन्द्रियव्यापारा इति केचन मन्यन्ते। किन्तु तत्राद्यान्तिमौ विहाय शेषाणां चतुर्णां समवायरूपतया, समवायस्य च नित्यतया तेषामिन्द्रियजन्यत्वाभावात् तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारता न संभवतीति तत्रेन्द्रियमनःसंयोग एव बाह्यप्रत्यक्षे जननीये इन्द्रियव्यापारो मन्तव्यः, बाह्यप्रत्यक्षे सर्वैरेवेन्द्रियैः साकं मनसः संयोगसत्त्वादित्याह—आद्येत्यारभ्य बोध्येत्यन्तम्। विशेषणविशेष्यभावसन्निकर्षस्याभावप्रत्यक्ष एवोपयोगितया भावप्रत्यक्षस्थलीय-व्यापाराभिप्रायेणाद्यातिरिक्तत्वमुक्तम्। सुखादीनां मानसप्रत्यक्षे चक्षुरादिपञ्चेन्द्रियाणामनावश्यकत्वात् तत्रेन्द्रियमनःसयोगो व्यापारो न भवितुमर्हति, किन्तु आत्ममनः संयोग एव व्यापार इत्याह—मानसेति।

न्या.बो. प्रत्यक्षप्रमालक्षणं व्याख्यातुमाह—प्रत्यक्षप्रमाणेति। इन्द्रियार्थसन्निकर्ष-
पृ.३३.जन्यज्ञानत्व प्रत्यक्षत्वम्। ननु प्रत्यक्षपदेन प्राणिप्रत्यक्षवत् ईश्वरप्रत्यक्षमपि ग्रहीतुं शक्यते, तथा च प्राणिप्रत्यक्षस्येन्द्रियार्थसन्निकर्षजन्यत्वेऽपि ईश्वरप्रत्यक्षस्य नित्यत्वेनेन्द्रियार्थसन्निकर्षजन्यत्वाभावात् तत्र प्रत्यक्षलक्षणाव्याप्तिरित्यत आह—जन्यप्रत्यक्षस्यैवेति। तथा चेश्वरप्रत्यक्षं लक्ष्यमेव नास्ति, अतस्तत्र नैव गच्छतु लक्षणं न तावता काऽपि हानिरित्यर्थः। ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति मूलकृता कृतमीश्वरप्रत्यक्षसाधारण लक्षणं व्याचष्टे—ज्ञानमिति। ज्ञानं करणं येषां तानि ज्ञानकरणकानि, तद्भिन्नमित्यर्थः। अत्र ज्ञानपदेन यद्ग्राह्यं तदाह—व्याप्तिज्ञानं सादृश्यज्ञानं पदज्ञानमिति। अनुमितौ व्याप्तिज्ञानस्य, उपमितौ सादृश्यज्ञानस्य शाब्दे च पदज्ञानस्य करणत्वात् तानि ज्ञानकरणकानि भवन्तीत्याह - ज्ञानकरणकानि अनुमित्युपमितिशाब्दानीति। प्रत्यक्षे इन्द्रियाणामेव करणतया ज्ञानकरणकभिन्नत्वं सुतरां प्रत्यक्षेऽस्तीत्याह— तद्भिन्नमिति। सर्वत्र प्रत्यक्षे लक्षणं सङ्गमयति—तथा चेति। प्रत्यक्षसामान्ये—प्राणिप्रत्यक्षे ईश्वरप्रत्यक्षे चेत्यर्थः।

निर्विकल्पकसविकल्पकयोर्लक्षणे व्याख्यातुं पूर्वं प्रत्यक्षविभागं प्रदर्शयति प्रत्यक्षं विभजते इति। निष्प्रकारकं ज्ञानं निर्विकल्पकमिति मूललक्षण व्या-
न्या.बो.चष्टे—प्रकारतेति। विशेषणमेव प्रकार इति पूर्वमुक्तम्। तथा च प्रकारता
पृ.३४.शून्यं यज्ज्ञानं तन्निर्विकल्पकमित्यर्थः। यत्र ज्ञाने किमपि विशेषणं न भवति, तन्निर्विकल्पकमिति तात्पर्य्यम्। यथा बालविज्ञानमस्माकञ्चोपेक्षात्मकं ज्ञानम्।

सर्वं ज्ञानं सविषयकं भवति, नहि किमपि ज्ञानं निर्विषयं भवति। अतएव ज्ञानं विषयि कथ्यते, तत्र भासमानपदार्थाश्च विषयाः कथ्यन्ते। यथा 'अयं घट'

In Public domain. Digitization Muthulakshmi Research Academy

इति ज्ञाने भासमानो घटादिः विषयसंज्ञया व्यवह्रियते। विषयता विषयनिष्ठा भवति। सा च विषयता त्रिविधा भवति। एका प्रकारताख्यविषयता, द्वितीया विशेष्यताख्यविषयता, तृतीया संसर्गताख्या विषयता चेति। यथा अयं घट इति ज्ञाने प्रकारीभूते घटत्वे प्रकारताख्या विषयता विद्यते। विशेष्यीभूते घटे विशेष्यताख्या विषयताऽस्ति। एवं घटघटत्वयोः समवायरूपसंसर्गे संसर्गताख्यविषयता विद्यते। तथा च निर्विकल्पके ज्ञाने प्रकारताविरहात् विशेष्यताऽपि नास्ति, तयोरभावे तयोरनुचरी संसर्गताऽपि नास्ति। तथा च निर्विकल्पके ज्ञाने त्रिविधविषयतामध्ये एकस्या अपि विषयताया अभावात् लक्षणत्रयं भवितुमर्हतीति सर्वं हृदि कृत्वाऽऽह—**निर्विकल्पके इति। चतुर्थीति**। विलक्षणैव काचिदित्यर्थः।

सविकल्पकप्रत्यक्षलक्षणं व्याख्यातुमाह—**सविकल्पकमिति। विषयतायाः ज्ञाननिरूपितत्वादिति**—यदि ज्ञानं न स्यात् घटादिः कस्य विषयो भवेत्तस्मात् विषयता ज्ञाननिरूपिता भवतीत्याशयः। यदा विषयता ज्ञाननिरूपिता तदा ज्ञानं विषयतानिरूपकमित्याह—**ज्ञानस्य विषयतानिरूपकत्वेनेति**। अतः प्रकारतानिरूपकज्ञानत्वम् अर्थात् प्रकारताख्यविषयतानिरूपकज्ञानत्वं सविकल्पकस्य लक्षणमिति।

अत्र त्रिविधाया अपि विषयतायाः सम्भवात् लक्षणान्तरमपि सम्भवतीत्याह—**एवमिति**। उदाहरणमाह—**यथेति**। अयं डित्थ इति, अयं ब्राह्मण इति च ज्ञाने इदंपदार्थो विशेष्यः। डित्थत्वं ब्राह्मणत्वञ्च प्रकारो। तथा च इदन्त्वावच्छिन्नविशेष्यतानिरूपितडित्थत्वनिष्ठप्रकारताशालिज्ञानत्वात्, इदन्त्वावच्छिन्नविशेष्यतानिरूपितब्राह्मणत्वनिष्ठप्रकारताशालिज्ञानत्वाच्चेमे ज्ञाने सविकल्पके भवतः

न्या.बो. पृ.३९. चाक्षुषादिषड्विधप्रत्यक्षकारणीभूताः षड्विधसन्निकर्षाः मूले प्रोक्तास्तानेव विभागप्रदर्शनपूर्वकं व्याख्यातुमारभते **चाक्षुषादीति**। ज्ञानं विषयीति पूर्वमुक्तम्। विषये ज्ञानं विषयतासम्बन्धेन तिष्ठति, सम्बन्धसत्ता सम्बन्धिसत्ताया नियामिका भवति यतो यत्र घटसंयोगो वर्तते तत्र संयोगसम्बन्धेन घटोऽपि विद्यत एव। तथा च ज्ञानीया विषयता विषये विद्यतेऽतो ज्ञानमपि विषये विषयतासम्बन्धेन तिष्ठति। चाक्षुषादिकं ज्ञानमपि द्रव्यादौ विषये विषयतासम्बन्धेनैवोत्पद्यते। तदेतत् सर्वमभिप्रेत्याह—**द्रव्यवृत्तीति**। द्रव्यनिष्ठेत्यर्थः। तथा च द्रव्यवृत्तिलौकिकविषयतासम्बन्धन चाक्षुषत्वावच्छिन्नचाक्षुषं प्रति चक्षुःसंयोगः कारणम्। यस्य द्रव्यस्य चक्षुषा प्रत्यक्षं करणीयमस्ति, तस्मिन् द्रव्ये चक्षुःसंयोग आवश्यक इत्यर्थः।

एवं द्रव्यसमवेतं रूपादिकं, तद्वृत्तिविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति—अर्थात् द्रव्यसमवेतस्य रूपादेः प्रत्यक्षे करणीये चक्षुःसंयुक्तसमवायः

In Public domain. Digitization Muthulakshmi Research Academy

कारणम् । अत्र चक्षुःसंयुक्तं द्रव्यं, तत्र समवायो रूपस्येति । द्रव्यसमवेतं रूपादिकं तत्समवेतं शुक्लत्वनीलत्वादिकं तद्वृत्तिविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति, अर्थात् शुक्लत्वादेः प्रत्यक्षे करणीये चक्षुःसंयुक्तसमवेतसमवायः कारणम् । अत्र चक्षुःसंयुक्तं भूतलादिद्रव्यं, तत्समवेतं रूपं तत्र समवायः शुक्लत्वादेरस्तीति समन्वयः ।

न्या.बो. पृ.३६. अन्यत्राप्युदाहर्तुं द्रव्यग्राहकत्वं पूर्वमवधारयति—द्रव्यग्राहकाणीति । घ्राणरसनश्रवणानि तु गुणमात्रग्राहकाणीत्यतस्तानि पश्चादुदाहरिष्यन्ते इत्याह—अन्यानीति । त्वगिन्द्रियस्थले उदाहरति—अत इति । द्रव्यप्रत्यक्षे त्वक्संयोगः कारणमिति प्रथमवाक्यार्थः । द्रव्यसमवेतशीतस्पर्शादिप्रत्यक्षे त्वक्संयुक्तं द्रव्यं तत्र यः शीतादेः समवायस्तद्रूपः सन्निकर्षः कारणमिति द्वितीयवाक्यार्थः । द्रव्यसमवेतः शीतस्पर्शादिः तत्समवेतं शीतत्वादिकं, तत्प्रत्यक्षे, त्वक्संयुक्तद्रव्यसमवेते शीतस्पर्शादौ यः शीतत्वादेः समवायः, तद्रूपः सन्निकर्षः कारणमिति तृतीयवाक्यार्थः ।

आत्मरूपद्रव्यप्रत्यक्षमुदाहरति—एवमिति । आत्मप्रत्यक्षे चक्षुरादीनामसामर्थ्यात् मनसैव तत्प्रत्यक्षं जायतेऽतस्तत्प्रत्यक्षं तद्वृत्तिसुखदुःखादिप्रत्यक्षञ्च मानसप्रत्यक्षनाम्ना व्यवह्रियते । तत्रात्मनो मानसप्रत्यक्षे आत्मना सह मनःसंयोगः कारणम् । आत्मसमवेतं यत् सुखदुःखादिकं, तस्य मानसप्रत्यक्षे मनःसंयुक्तसमवायः कारणम् । अत्र मनःसंयुक्त आत्मा तस्मिन् समवायः सुखादेरस्तीति । एवमात्मसमवेते सुखादिके समवेतं यत् सुखत्वादिकं तत्प्रत्यक्षं प्रति मनःसंयुक्तसमवेतसमवायः कारणम् । अत्र च मनःसंयुक्त आत्मा, तत्समवेतं सुखादिकं, तत्र समवायः सुखत्वादेरिति भावः । रसनघ्राणयोस्त्विवति । तद्गतजातिः—रसगन्धगता रसत्वगन्धत्वादिजातिः । द्वितीयतृतीययोरिति । संयुक्तसमवायसंयुक्तसमवेतसमवाययोरित्यर्थः । रसगन्धप्रत्यक्षे आद्यः, रसत्वगन्धत्वप्रत्यक्षे द्वितीयः सन्निकर्षः कारणमित्यर्थः ।

न्या.बो. पृ.३७. समवाय-समवेतसमवायसन्निकर्षावुदाहरति—श्रवणेति । शब्दप्रत्यक्षे समवायसन्निकर्षः कारणम् । यतो हि श्रवणेन्द्रियं नाकाशस्वरूपाद् भिन्नमस्ति । अत आकाशस्वरूपे श्रोत्रेन्द्रिये शब्दस्य समवायसम्बन्धाङ्गीकार इति भावः । ककारादिशब्दवृत्तिकत्वादिप्रत्यक्षे समवेतसमवायः कारणमित्याह—शब्दवृत्तीति ।

अभावप्रत्यक्षहेतुभूतं विशेषणविशेष्यभावसन्निकर्षं व्याख्यातुमाह—अभावप्रत्यक्ष इतीति । मूलोक्तसन्निकर्षस्यार्थमाह— विशेषणविशेष्यभाव इति । कीदृशाभावप्रत्यक्षे किंविधो विशेषणतासन्निकर्षः कारणमिति स्फोरणायाह—

In Public domain. Digitization Muthulakshmi Research Academy

न्या.बो.पञ्चविधेति । कार्यकारणस्वरूपं प्रदर्शति—तथाहीति । द्रव्यमधिकरणं यस्य पृ.३८.स द्रव्याधिकरणकोऽभावः, तत्प्रत्यक्षे—भूतलादिद्रव्यनिष्ठो यो घटाद्यभावस्तत्प्रत्यक्षे इत्यर्थः । तत्र इन्द्रियसंयुक्तविशेषणता कारणम्, इन्द्रियसंयुक्ते भूतले घटाभावस्य विशेषणत्वादिति भावः । द्वितीयं कार्यकारणभावमाह—द्रव्यसमवेतेति । द्रव्यसमवेतमधिकरणं यस्याभावस्य, स द्रव्यसमवेताधिकरणकः, तत्प्रत्यक्षे इत्यर्थः । द्रव्यं—घटादिरूपं द्रव्यं, तत्र समवेतं घटत्वं, तत्र विद्यमानो यः पृथिवीत्वाभावः, तत्प्रत्यक्षे इति तात्पर्यम् । तत्र इन्द्रियसंयुक्तसमवेतविशेषणतासन्निकर्षः कारणम् । इन्द्रियसंयुक्तो यो घटस्तत्र समवेतं यद् घटत्वं, तत्र पृथिवीत्वाभावस्य विशेषणत्वात् । तृतीयमाह—द्रव्यसमवेतसमवेतेति । द्रव्यं घटः, तत्समवेतं रूपं, तत्समवेतरूपत्वादौ वर्तमानो यो नीलत्वाद्यभावः, तत्प्रत्यक्षे इत्यर्थः । इन्द्रियसंयुक्तो घटः, तत्समवेतं रूपं, तत्समवेतं रूपत्वं, तत्र नीलत्वाभावस्य विशेषणत्वादिति भावः । स्वयमुदाहरति—घटे पटत्वाभाव इत्यादि । व्याख्यातमेतत् ।

इति तर्कसंग्रहन्यायबोधिनीव्याख्यायां कलायां प्रत्यक्षपरिच्छेदः ।

In Public domain. Digitization Muthulakshmi Research Academy

अथानुमानपरिच्छेदः

न्या.बो. अनुमितिकरणमनुमानं, परामर्शजन्यं ज्ञानमनुमितिरित्यनुमानानुमित्यो-
पृ.३९.र्लक्षणे मूलकारेणोक्ते ते एव व्याख्यातुमारभते—**अनुमानं लक्षयतीत्यादिना**। मूले अनुमितिकरणपदेन व्याप्तिज्ञानं बोधनीयमित्याह—**अनुमिताविति**। अतो व्याप्तिज्ञानमेवानुमानप्रमाणसंज्ञया व्यवह्रियत इति बोद्धव्यम्। अनुमितौ जननीयायां लक्षयिष्यमाणः परामर्श एव व्यापारो भवतीत्याह—**परामर्श इति**। व्याप्तिज्ञानरूपकरण-परामर्शरूपतद्व्यापाराभ्यामनुमितिरूपं कार्यमुत्पद्यत इत्याह—**अनुमितिरिति**। लक्षणसमन्वयपुरस्सरं परामर्शस्य व्यापारत्वमुपपादयति—**परामर्शस्येति**। परामर्शो हि व्याप्तिज्ञानाज्जायते, व्याप्तिज्ञानजन्यामनुमितिं जनयति चेत्यतः तज्जन्यत्वे सति तज्जन्यजनकत्वात् परामर्शो व्यापार इत्युपपन्नम्। अनुमानलक्षणस्वरूपमाह—**अनुमितीति**। अनुमानपदवाच्यमाह—**अनुमानं व्याप्तिज्ञानमिति**। **एतस्येति**। व्याप्तिज्ञानं हि परामर्शरूपव्यापारद्वारा अनुमितिं प्रत्यसाधारणकारणं (कार्यत्वातिरिक्तानुमितित्वधर्मावच्छिन्नकार्यतानिरूपितकारणताशालि) भवत्यतो व्याप्तिज्ञानमनुमितिकरणमिति सिद्धम्।

परामर्शजन्यत्वरूपमनुमितिलक्षणं व्याख्यातुं प्रतीकमुपादत्ते—**परामर्शजन्यमिति**। परिष्कृतं लक्षणस्वरूपमाह—**परामर्शजन्यत्वविशिष्टज्ञानत्वमिति**। परामर्शजन्यत्वविशेषणस्य फलमाह **अत्रेति**। ज्ञानत्वमात्रोपादाने इत्यर्थः। **प्रत्यक्षादावतिव्याप्तिरिति**। तस्यापि ज्ञानत्वादिति शेषः। **तद्वारणायेति**। प्रत्यक्षस्य इन्द्रियसन्निकर्षजन्यत्वेन परामर्शजन्यत्वाभावाद् वारणमिति भावः। ज्ञानत्वानुपादाने दोषमाह—**परामर्शजन्यत्वमात्रोक्ताविति**। परामर्शध्वंसो हि परामर्शजन्योऽस्ति, यतो हि यदि परामर्श एव न स्यात्तदा कस्य ध्वंसो भवेत्? ध्वंसं प्रति प्रतियोगिनः कारणत्वात्। तस्मात् परामर्शध्वंसस्यापि परामर्शजन्यत्वेन तत्रातिव्याप्तिः, ज्ञानत्वोपादाने तु नातिव्याप्तिः, ध्वंसस्य ज्ञानभिन्नत्वादिति भावः।

न्या.बो. परामर्शलक्षणं व्याख्यातुं पूर्वं तदवतारयति—**अनुमितीत्यादि व्याप्ति-**
पृ.४०.**विशिष्टेत्यन्तम्**। व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वं परामर्शस्य लक्षणं मूले उक्तम्। अत्र व्याप्तिविशिष्टञ्च पक्षधर्मताज्ञानञ्चेति रीत्या कर्मधारयसमासः। ननु साहचर्यरूपाया व्याप्तेः हेतावेव वैशिष्ट्यसत्त्वात् कथं तद्वैशिष्ट्यं पक्षधर्मताज्ञाने प्रोक्तमित्यत आह—**विशिष्टपदस्य प्रकारतानिरूपकपरत्वादिति**। तथा

In Public domain. Digitization Muthulakshmi Research Academy

च व्याप्तिविशिष्टमित्यस्य व्याप्तिप्रकारकमित्यर्थः। अत्र व्याप्तिः प्रकारो यत्र ज्ञाने तद् व्याप्तिप्रकारकम्। एवञ्च व्याप्तिप्रकारकत्वं पक्षधर्मताज्ञानेऽस्त्येवेति नोक्तदोषः। पक्षधर्मतायाः ज्ञानमिति षष्ठीसमासात् पक्षधर्मताज्ञानशब्दो निष्पद्यते। अत्र षष्ठ्याः विषयत्वमर्थः। धर्मतापदस्य च सम्बन्धोऽर्थः। तथा च पक्षसम्बन्धि-विषयकं ज्ञानमिति लभ्यते। एतदेवाह—**पक्षधर्मताज्ञानमित्यत आरभ्य सम्बन्धार्थकत्वादित्यन्तेन ग्रन्थेन। कर्मधारयसमासेन इति**। तथा च यत्र यत्र कर्मधारयसमासो भवति तत्र सर्वत्रैव समस्यमानपदार्थयोरभेद एव संसर्गो भासते, यथा नीलश्चासौ घटश्चेति विग्रहेण कर्मधारयसमासे य एव नीलपदार्थो भवति स एव घटपदार्थो भवतीति नीलाभिन्नो घट इति तत्र बोध्यते, तद्वद् अत्रापि व्याप्तिप्रकारकाभिन्नं यत् पक्षसम्बन्धिविषयकं ज्ञानं, तत् परामर्श इति तात्पर्यम्। पक्षसम्बन्धिपदेन (पक्षधर्मपदेन) हेतुर्गृह्यते इत्यवधारणीयम्। उदाहरणमाह मूले—**वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं परामर्श इति**। अत्र ज्ञाने प्रकारीभूतायाः (विशेषणीभूतायाः) व्याप्तेः पर्वतरूपपक्षसम्बन्धिनो धूमस्य च भानात् इदं ज्ञानं व्याप्तिप्रकारकपक्षसम्बन्धिविषयकं जातमत एवंविधं ज्ञानमेव परामर्श इति सिद्धम्।

न्या.बो. पृ.४१. ननु धूमो वह्निव्याप्यः, आलोकवान् पर्वत इत्याकारकसमूहलम्बनज्ञानेऽपरामर्शभूते उक्तलक्षणस्यातिव्याप्तिः, अत्रापि प्रकारविधया व्याप्तेः, पर्वतरूप-पक्षसम्बन्धिन आलोकस्य च भानेन व्याप्तिप्रकारकपक्षसम्बन्धिविषयकत्वादिति पूर्वपक्षमाह - **एवं सतीति**। निष्कर्षेणोत्तरयति—**पक्षनिष्ठविशेष्यतेति**। प्रकारताविशेष्यतयोः मिथो निरूप्यनिरूपकभावो भवतीति बहुशः पूर्वमुक्तम्। तथा च पक्षनिष्ठविशेष्यतानिरूपिता या हेतुनिष्ठा प्रकारता, तन्निरूपिता या व्याप्तिनिष्ठाप्रकारता, तच्छालिज्ञानत्वमिति परामर्शस्य निष्कृष्टं लक्षणम्। अनेन वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं परामर्शो भविष्यति। यतस्तत्र विशेष्यः पर्वतः, विशेष्यता पर्वतनिष्ठा, तन्निरूपिता प्रकारता हेतुभूते धूमे, तन्निरूपिता प्रकारता व्याप्ताविति तच्छालिज्ञानत्वस्य तत्र सत्वात्। वह्निव्याप्यो धूमः आलोकवान् पर्वत इति समूहालम्बनज्ञाने तु नातिव्याप्तिः। यतस्तत्र पर्वतनिष्ठ-विशेष्यतानिरूपिता प्रकारता आलोके विद्यते किन्तु तन्निरूपिता प्रकारता व्याप्तौ नास्ति, आलोके व्याप्तेरविशेषणत्वात्। धूमनिरूपिता प्रकारता तु व्याप्तौ वर्तते, किन्तु तस्मिन् धूमे पर्वतनिष्ठविशेष्यतानिरूपिता प्रकारतैव नास्ति, पर्वतरूपे विशेष्ये आलोकस्यैव विशेषणत्वेन धूमस्य विशेषणत्वाभावात्। तथा च तत्र पक्षनिष्ठविशेष्यतानिरूपितहेतुनिष्ठप्रकारतानिरूपितव्याप्तिनिष्ठप्रकारताशालिज्ञान-त्वाभावान्नातिव्याप्तिरिति भावः।

In Public domain. Digitization Muthulakshmi Research Academy

परामर्शलक्षणं परिष्कृत्य सम्प्रत्यनुमितिलक्षणं निष्कर्षयति—एतादृश-परामर्शेति। पक्षनिष्ठविशेष्यतानिरूपितहेतुनिष्ठप्रकारतानिरूपितव्याप्तिनिष्ठ-प्रकारताशालिज्ञानजन्यत्वे सति ज्ञानत्वमनुमितित्वमित्यर्थः।

अनुमितिपरामर्शयोर्विशिष्य कार्यकारणभावमाह—अनुमितीति। पर्व-तत्वावच्छिन्नोद्देश्यतेति।

अयमाशयः—उद्देश्यं विधेयञ्चेति द्वयमप्यनुमितावनुभूयते। यदुद्दिश्य किमपि विधीयते तदुद्देश्यम् कथ्यते, किमप्युद्दिश्य यद्विधीयते तद्विधेयमिति कथ्यते। यथा पर्वतमुद्दिश्य वह्निर्विधीयतेऽतः पर्वतोऽत्र उद्देश्यः, वह्निर्विधेयः उद्देश्यता पर्वतनिष्ठा विधेयता च वह्निनिष्ठाऽस्ति। यथा लक्ष्यताया अवच्छेदकं पृथिवीत्वं, लक्ष्यता च पृथिवीत्वावच्छिन्ना भवति, तथैवात्र उद्देश्यताया अवच्छेदकं पर्वतत्वं, विधेयतायाश्चावच्छेदकं वह्नित्वम्। पर्वतनिष्ठोद्देश्यता पर्वतत्वावच्छिन्ना, वह्नि-निष्ठा विधेयता च वह्नित्वावच्छिन्ना। धर्मसम्बन्धभेदेनावच्छेदकस्य द्वैविध्यात् वह्निनिष्ठा विधेयता यथा वह्नित्वधर्मेणावच्छिन्ना तथा संयोगसम्बन्धेनाप्य-वच्छिन्ना, संयोगेनैव वह्नेः पर्वते विधेयत्वात्। वह्नित्वावच्छिन्ना विधेयतास्ति यस्यामनुमितौ, सा वह्नित्वावच्छिन्नविधेयताकानुमितिः। बहुव्रीहौ कप्रत्ययः। एवं प्रकारताविशेष्यतादिवत् उद्देश्यताविधेयतयोरपि परस्परं निरूप्यनिरूपकभाव-सत्त्वात् पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगसम्बन्धावच्छिन्नवह्नित्वधर्मा-वच्छिन्नवह्निनिष्ठविधेयताकानुमितित्वावच्छिन्नं प्रति अर्थात् पर्वतो वह्निमान् इत्याकारानुमितिं प्रति वह्निव्याप्तिविशिष्ट (व्याप्य) धूमवान् पर्वत इत्या-कारकः वह्नित्वावच्छिन्नप्रकारतानिरूपिता या व्याप्तित्वावच्छिन्ना प्रकारता, तन्निरूपिता या धूमत्वावच्छिन्ना प्रकारता, तन्निरूपिता या पर्वतत्वावच्छिन्ना विशेष्यता, तच्छालिनिर्णयः कारणमिति भावः। एतच्च जगदीशभट्टाचार्य-मतेनोक्तम्।

एतन्मते यत्रैकस्मिन्नेव पदार्थे किञ्चिन्निरूपिता विशेष्यता तिष्ठति, किञ्चिन्निरूपिता च प्रकारता तिष्ठति, तत्रत्यप्रकारताविशेष्यतयोरभेद एव भवति अतस्तत्र तन्मते विशेष्यतामनुक्त्वा प्रकारतैव व्यवह्रियते। यथाऽत्रैव वह्निव्याप्तिविशिष्टधूमवान् पर्वत इति परामर्शे वह्निनिष्ठप्रकारतानिरूपित-विशेष्यता व्याप्तौ वर्तते, एवं तत्रैव धूमनिष्ठविशेष्यतानिरूपितप्रकारताऽप्यस्ति। वह्न्यपेक्षया विशेष्यीभूता धूमापेक्षया प्रकारीभूता (विशेषणीभूता) व्याप्तिर-स्तीति यावत्। एवं धूमस्य व्याप्त्यपेक्षया विशेष्यत्वात् पर्वतापेक्षया च प्रकार-त्वात् धूमे व्याप्तिनिष्ठप्रकारतानिरूपिता विशेष्यता विद्यते, एवं पर्वतनिष्ठ विशेष्यतानिरूपिता प्रकारताऽपि विद्यते। अतोऽत्र विशेष्यतामनुक्त्वा प्रकारतैव

In Public domain. Digitization Muthulakshmi Research Academy

केवलं व्यवह्रियते जगदीशभट्टाचार्यानुसारिभिः। अतस्तन्मतेनोक्तकार्यकारणभावे वह्नित्वावच्छिन्नप्रकारतानिरूपिता या व्याप्तित्वावच्छिन्ना प्रकारता इत्येवोक्तं न तु वह्नित्वावच्छिन्नप्रकारतानिरूपिता या व्याप्तित्वावच्छिन्नविशेष्यतेत्युक्तम्।

गदाधरभट्टाचार्यमते तु यत्रैकस्मिन्नेव पदार्थे विशेष्यताप्रकारते उभे तिष्ठतस्तत्र विशेष्यताप्रकारतयोर्नभिदो भवति, किन्तु तयोरवच्छेद्यावच्छेदकभाव एव भवत्यतस्तन्मतेन कार्यकारभावं परिष्करोति—**अभेदानङ्गीकर्तृमते इति।**

न्या.बो. वह्नित्वावच्छिन्नप्रकारतानिरूपिता या व्याप्तिनिष्ठविशेष्यता, तादृशविशेष्यत्वा-
पृ.४२. वच्छिन्ना या व्याप्तित्वावच्छिन्ना प्रकारता, तन्निरूपिता या धूमनिष्ठविशेष्यता, तादृशविशेष्यत्वावच्छिन्ना या धूमत्वावच्छिन्ना प्रकारता, तन्निरूपिता या पर्वतत्वावच्छिन्ना विशेष्यता तच्छालिनिर्णयः उक्तस्वरूपानुमितिं प्रति कारणमिति भावः। अनुमितिकारणीभूतस्यैवंविधनिर्णयस्य स्वरूपमाह—**स चेति।**

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इत्यत्र व्याप्तिर्घटकीभूता विद्यते तस्याः स्वरूपं व्याख्यातुमारभते—**यत्रेतीति।** यत्र यत्रेति वाक्ये द्विरुक्तं यत्रेति पद वीप्सां गमयति। सा च वीप्सा यावन्ति धूमाधिकरणानि सन्ति, तेषु सर्वेष्वेव वह्निरस्तीति बोधयति। एतावता वह्निर्धूमव्यापक इत्यर्थतो लभ्यते इति सर्वमाह—**यत्रपदवीप्सेत्यादिना लब्धमित्यन्तेन ग्रन्थेन।** यत्र यत्रेति वाक्यस्य स्पष्टीकरणं स्वयं मूलकारेणैव 'साहचर्यनियमो व्याप्ति'रिति वाक्येन कृतं, तदेव व्याख्यातुं न्यायबोधिनीकार आरभते—**तदेवेति। एतदर्थस्त्विति।** साहचर्यनियम इत्यस्यार्थस्त्वित्यर्थः। नियतस्य साहचर्यं व्याप्तिरिति भावः। नियतपदस्य 'व्यापकम्' इत्यर्थः, साहचर्यपदस्य च 'सामानाधिकरण्य'मित्यर्थः इत्याह—**नियतत्वमिति।** व्यापकश्च वह्निर्भवतीत्युक्तमेव। समानमधिकरणं यस्य स समानाधिकरणः, तस्य भावः सामानाधिकरण्यम्। नियतस्य व्यापकीभूतस्य वह्नेः सामानाधिकरण्यं धूमेऽस्ति, यतः यद् वह्नेरधिकरणं वर्तते महानसादि, तदेव धूमस्याप्यधिकरणं वर्तते। ततो वह्न्यधिकरणमहानसादिवृत्तित्वमेव वह्निसामानाधिकरण्यमिति लभ्यते।

न्या.बो. एवमाशयवानेव टीकाकारो विशेषरूपेण व्याप्तिस्वरूपमाह—**तथा चेति।**
पृ.४३. धूमव्यापकीभूतो यो वह्निस्तत्सामानाधिकरण्यं व्याप्तिरिति भावः। वह्नौ कीदृश धूमव्यापकत्वमित्याह—**धूमसमानेति।** धूमसमानाधिकरणीभूतो योऽत्यन्ताभावः, तत्प्रतियोगिताया अनवच्छेदकीभूतो यो धर्मस्तद्वत्त्वमित्यर्थः। धूमसमानाधिकरणत्वञ्च धूमाधिकरणे वर्तमानत्वम्। तथा च धूमाधिकरणं पर्वतादिकं, तत्र वर्तमानोऽभावो घटाभावः (घटत्वावच्छिन्नप्रतियोगिताकः),

In Public domain. Digitization Muthulakshmi Research Academy

तादृशाभावस्य प्रतियोगी घटः, प्रतियोगिता घटनिष्ठा, तस्या अवच्छेदकं घटत्वम्, अनवच्छेदकं वह्नित्वं धर्मः, तादृशधर्मवत्त्वस्य वह्नौ सत्त्वात् वह्निर्धूमस्य व्यापकः, व्यापकीभूतवह्निसामानाधिकरण्यञ्च धूमे व्याप्तिरिति । एतदेव सर्वं स्वयमप्याह टीकाकारः—तथा हीति । एतावता हेतुसमानाधिकरणात्यन्ताभावीयप्रतियोगितानवच्छेदकीभूतसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति लभ्यते । एतस्य समन्वयस्तु स्वयमेवोक्तदिशाऽवसेयः । इयमेव च सिद्धान्तभूताऽन्वयव्याप्तिरित्याह—इयमिति ।

पूर्वपक्षिणां व्याप्तिमाह—**साध्याभाववदवृत्तित्वमिति** । साध्यो वह्निः, तदभावः वह्न्यभावः, तद्वान् जलहृदादिः, तत्र वृत्तित्वं मीनादेः, अवृत्तित्वञ्च धूमस्यास्तीति वह्निनिरूपिता व्याप्तिर्धूमे गच्छतीति समन्वयः । धूमस्य व्याप्तिस्तु वह्नौ न गमिष्यति । तत्र साध्यो धूमः, तदभावो धूमाभावः, तद्वत् अयःपिण्डम्, तत्र वृत्तित्वस्यैव वह्नौ सत्त्वात् इति भावः । अतो धूमवान् वह्नेरिति वह्निना धूमानुमानं न भवितुमर्हति किन्तु धूमेनैव हेतुना वह्न्यनुमानं 'वह्निमान् पर्वत' इत्याकारकं भविष्यतीति ।

एतस्या एव पूर्वपक्षव्याप्तेः परिष्कृतं स्वरूपमाह—**साध्यतेत्यादि** । साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकधर्मावच्छिन्ना च या प्रतियोगिता, तादृशप्रतियोगितानिरूपको यः प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकधर्मावच्छिन्नवैयधिकरण्यावच्छिन्नोऽभावः, तदधिकरणनिरूपितं यत् हेतुतावच्छेदकसम्बन्धावच्छिन्नं वृत्तित्वं, तादृशवृत्तित्वनिष्ठं यत् वृत्तित्वत्वं, तदवच्छिन्ना या वृत्तित्वनिष्ठा प्रतियोगिता, तादृशप्रतियोगितानिरूपकोऽभावो व्याप्तिरिति समस्तवाक्यस्य विग्रहः ।

अयं भावः—साध्यताप्रतियोगिताहेतुतादीनां समेषामेव लक्ष्यतावत् किमप्यवच्छेदकं भवति । तच्च सम्बन्धधर्मभेदेन द्विविधं भवति । यत्र यदुपयोगि प्रतीयते ग्रन्थकारेण तत्र तदुपादीयते । यत्र द्वयमप्युपयोगि तत्र द्वयमप्युपादीयते । एवं येन सम्बन्धेन साध्यं पक्षे साध्यते, स सम्बन्धः साध्यतावच्छेदकः । यथा पर्वतो वह्निमानित्यत्र पर्वते पक्षे वह्निरूपं साध्यं संयोगेन सम्बन्धेन साध्यते, तस्मात् वह्निनिष्ठसाध्यतावच्छेदकसम्बन्धः संयोगः । यथा ह्रदादौ संयोगेन वह्नेरभावो गृह्यते तस्मात् वह्न्यभावीयवह्निनिष्ठप्रतियोगितायाः अवच्छेदकः सम्बन्धः संयोगः । येन सम्बन्धेन हेतुः पक्षे तिष्ठति स हेतुतावच्छेदकसम्बन्धः । यथा पर्वतो वह्निमान् धूमादित्यत्र धूमः पर्वते संयोगेन वर्ततेऽतो धूमनिष्ठहेतुताया अवच्छेदकसम्बन्धः संयोग एव । साध्यतादीनामवच्छेदको धर्मः वह्नित्वादिकमिति तु लक्ष्यतावच्छेदकपृथिवीत्ववद् बोध्यम् । एतैरवच्छेदकीभूतैः सम्बन्धैर्धर्मैश्च साध्यतादयो अवच्छिन्ना

In Public domain. Digitization Muthulakshmi Research Academy

भवन्ति। वैयधिकरण्यञ्च तदधिकरणेऽविद्यमानत्वम्। साध्याभाववदवृत्तित्वमिति लघुलक्षणे यदवृत्तित्वमस्ति, तस्यैव वृत्तित्वाभावः अर्थात् वृत्तित्वत्वावच्छिन्नवृत्तित्वनिष्ठप्रतियोगितानिरूपकाभाव इत्यर्थः।

पर्वतो वह्निमान् धूमादित्यत्रास्य लक्षणस्य समन्वयस्त्वित्थम्—साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्ना, साध्यतावच्छेदकवह्नित्वधर्मावच्छिन्ना च या वह्निनिष्ठा प्रतियोगिता तादृशप्रतियोगिताकोऽभावो वह्न्यभावः, स चाभावः प्रतियोगितावच्छेदकसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकवह्नित्वधर्मावच्छिन्नवैयधिकरण्यावच्छिन्नोऽप्यस्ति, वह्न्यधिकरणे पर्वते वह्न्यभावस्याविद्यमानत्वात्। तादृशवह्न्यभाववान् ह्रदादिः, तन्निरूपितं यत् हेतुतावच्छेदकीभूतसंयोगसम्बन्धावच्छिन्नं वृत्तित्वं, तत् मत्स्यादौ शैवालादौ च वर्तते, तादृशवृत्तित्वनिष्ठं यद् वृत्तित्वत्वं, तदवच्छिन्ना या वृत्तित्वनिष्ठा प्रतियोगिता, तन्निरूपकाभावोऽर्थात् वृत्तित्वाभाव धूमे हेतौ वर्तत इति तत्र व्याप्तिलक्षणसमन्वयः। एवंविधाया

न्या.बो. व्याप्तेः पूर्वपक्षरूपत्वात् पूर्वोक्तायाः सिद्धान्तव्याप्तेरेव युक्तत्वात् पूर्वपक्षव्याप्तौ
पृ.४४. दूषणमाह तच्चेति। केवलान्वयिनि—केवलान्वयिसाध्यके 'इदं वाच्यं ज्ञेयत्वादि'त्यादिस्थले इत्यर्थः। अव्याप्तमिति। संसारे कोऽपि पदार्थो नास्ति यो वाच्यो न भवेत्, तथा च वाच्यत्वाभावो न कुत्राप्यायास्यतीति वाच्यत्वाभावाधिकरणाप्रसिद्ध्या तद्वृत्तित्वादिकं सर्वमेवाप्रसिद्धमिति अप्रसिद्धिनिबन्धनाऽव्याप्तिरिति भावः।

स्वार्थानुमानपरार्थानुमानभेदेनानुमानं द्विविधमित्युक्तं मूले, तत्र स्वार्थानुमानस्यार्थमाह—**स्वार्थानुमानं नामेति**। न्यायेन = प्रतिज्ञाहेतूदाहरणोपनयनिगमनसमुदायेनाप्रयोज्यमनुमानं स्वार्थमित्यर्थः। परार्थानुमानमाह—**न्यायेति**। न्यायेन = उक्तसमुदायेन प्रयोज्यमनुमानं परार्थमित्यर्थः। स्वार्थानुमाने प्रतिज्ञादीनां नावश्यकता, परार्थानुमाने तु प्रतिज्ञादिकमावश्यकमिति भावः। कथमित्यस्य तु

न्या.बो. मूले एवास्त्युत्तरम्। न्यायत्वं किमिति प्रश्ने आह—**न्यायत्वञ्चेति**। अवयवत्वं
पृ.४५. किमित्याह—**अवयवत्वञ्चेति**। प्रतिज्ञाद्यन्यतमत्वन्तु प्रतिज्ञाभिन्नत्वे सति हेतुभिन्नत्वे सति उदाहरणभिन्नत्वे सति उपनयभिन्नत्वे सति निगमनभेदवान् यस्तत्प्रतियोगिकभेदवत्त्वम्।

न्या.बो. अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति लिङ्गं त्रिविधम्।
पृ.४६. 'हेतुरपदेशो लिङ्गं करणमित्यनर्थान्तरमिति' कणादसूत्रानुसारं लिङ्गपदेन हेतुर्गृह्यते। तत्रान्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकीति मूलोक्तं प्रथमलिङ्गस्वरूपं व्याख्यातुमाह—**अन्वयेनेतीति**। अन्वयेन व्याप्तिमदित्यस्यार्थमाह—व्यापकेति। सिद्धान्तिनां पूर्वोक्तहेतुव्यापकसाध्यसामानाधिकरण्यरूपान्वयव्याप्ति-

In Public domain. Digitization Muthulakshmi Research Academy

मानिति तात्पर्यम्। व्यतिरेकेण व्याप्तिमदित्यस्यार्थमाह—व्यतिरेकेणेतीति। व्यतिरेकशब्दस्य वाच्यार्थमाह—व्यतिरेको नामाभाव इति। भावार्थमाह—तथाचेति। अन्वयव्याप्तिर्हि साध्यहेत्वोर्भवति, व्यतिरेकव्याप्तिस्तु साध्याभाव-हेत्वभावयोर्भवतीत्याशयः। इयमपि व्याप्तिः साहचर्यरूपैव, किन्तु अन्वयव्याप्तौ हेतुसाध्ययोः साहचर्यम्, अत्र तु साध्याभावहेत्वभावयोः साहचर्यमिति विशेष इत्याह—इयञ्चेति। यथा यत्र यत्र धूमस्तत्र तत्र वह्निरिति साहचर्यमन्वय-व्याप्तिर्भवति तथैव यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभाव इति साहचर्यं व्यतिरेक-

न्या.बो.व्याप्तिर्भवतीत्यर्थः। यथान्वयव्याप्तौ 'यत्र' पदवीप्सया वह्नौ धूमव्यापकत्वं लभ्यते,

पृ.४७.तथात्रापि यत्रपदवीप्सया धूमाभावे वह्न्यभावव्यापकत्वं लभ्यत इत्याह—यत्रपदवीप्सयेति।

ननु वह्निधूमयोः साहचर्यात् यथान्वयव्याप्तिः धूमनिष्ठा भवति तथात्रापि यत्र यत्रेति साहचर्यनियमात् व्यतिरेकव्याप्तिर्वह्न्यभावनिष्ठा भवति। तथा च धूमः अन्वयव्याप्तिमान् भवन्नपि व्यतिरेकव्याप्तिमान्न भवति, तर्हि कथं धूमहेतु-रन्वयव्यतिरेकित्वेन गीयते इत्यत आह—एवञ्चेति। अयं भावः—व्यतिरेक-व्याप्तिर्यद्यपि वह्न्यभावनिष्ठा भवति तथापि स्वाश्रयीभूतवह्न्यभावव्यापकी-भूताभावप्रतियोगित्वरूपलम्बायमानसम्बन्धेन धूमनिष्ठैवास्ति। तत्र स्वं व्यतिरेक-व्याप्तिः, तदाश्रयीभूतो वह्न्यभावः, तद्व्यापकीभूतोऽभावः धूमाभावः, तत्प्रति-योगित्वं धूमेऽस्तीत्येतेन सम्बन्धेन व्यतिरेकव्याप्तेः धूमनिष्ठतया धूमो व्यतिरेक-व्याप्तिमान् भवति, एवं पूर्वोक्तधूमव्यापकवह्निसामानाधिकरण्यरूपान्वयव्याप्ति-मांश्च भवतीति तस्यान्वयव्यतिरेकिलिङ्गत्वेन गीयमानता युक्तैवेति। व्यतिरेक-परामर्शस्य स्वरूपमाह—व्यतिकेरेति।

न्या.बो. द्वितीयलिङ्गस्वरूपं व्याख्यातुमाह—केवलान्वयिन इति। केवलान्वयिनो

मू.४८.मूलोक्तलक्षणे मात्रपदस्यार्थकथनपुरःसरं तत्स्वरूपमाह—व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वं केवलान्वयित्वमिति। यथा-घटोऽभिधेयः प्रमेयत्वादित्यत्र केवलमन्वयव्याप्तिरेवास्ति 'यत्र यत्र प्रमेयत्वं तत्र तत्र अभिधेयत्व'मिति, न तु व्यतिरेकव्याप्तिरस्ति, प्रमेयत्वाभिधेयत्वयोरखिले जगति सत्त्वेन तदभावस्यैवा-प्रसिद्धेः। अतः प्रमेयत्वं लिङ्गं केवलान्वयि।

लक्षणान्तरमाह—अथवेति। केवलान्वयि साध्यं यस्य तत् केवलान्वयि लिङ्गं भवतीत्यर्थः। अथवेति लक्षणान्तरकरणे निमित्तमाह—एतच्चेति। तदेवोपादयति—साध्यस्येति। अयं भावः—यद्यपि 'इदमभिधेयं द्रव्यत्वात्' इत्यत्रत्यो द्रव्यत्वहेतुः व्यतिरेकी अस्ति, तथापि साध्यस्य केवलान्वयित्वादेव व्यतिरेकव्याप्तिर्न भविष्यति। यतो हि यत्र यत्र द्रव्यत्वाभावः इति तु वक्तुं

In Public domain. Digitization Muthulakshmi Research Academy

शक्यते, किन्तु तत्र तत्र अभिधेयत्वाभाव इति न शक्यते वक्तुं, तथा चैतावतैवात्र व्यतिरेकव्याप्तिर्नैव सम्भविनीति **अन्वयमात्रव्याप्तिकं केवलान्वयीति** मूलोक्तं लक्षणमुपपद्यत इत्याशयः। ननु साध्ये कीदृशं केवलान्वयित्वमुच्यते इत्यत आह – **अत्यन्तेति**। अत्यन्ताभावस्य न प्रतियोगि यत् साध्यं, तत् केवलान्वयि भवतीत्यर्थः। संसारे कुत्रापि अभिधेयत्वाभावो नास्ति तस्मादभिधेयत्वे प्रतियोगित्वमपि नास्ति। अतोऽभिधेयत्वं साध्यं केवलान्वयि, केवलान्वयिसाध्यकत्वाच्च द्रव्यत्वं लिङ्गं केवलान्वयि भवतीति भावः।

ननु निरुक्तं केवलान्वयित्वं गगनाभावे संयोगाभावे चाव्याप्तम्, गगनाभावस्य, गगनस्वरूपो योऽभावो गगनाभावाभावः तत्प्रतियोगित्वात्, एवं संयोगाभावस्यापि संयोगस्वरूपसंयोगाभावाभावप्रतियोगित्वादिति शङ्कते—**नचेति**। उत्तरयति—
न्या.बो. **स्वविरोधीति**। स्वविरोधी, वृत्तिमांश्च योऽभावः, तदप्रतियोगित्वं केवलान्व-
पृ.४९. यित्वम्। स्वपदेन प्रतियोगी ग्राह्यः। तथा च गगनाभावः गगनाभावाभावस्य प्रतियोगी वर्तते किन्तु स गगनाभावाभावः वृत्तिमान्नास्ति, गगनाभावाभावस्य गगनस्वरूपतया गगनस्य वृत्तिमत्त्वानभ्युपगमात्। एवं संयोगाभावोऽपि यद्यपि संयोगाभावाभावस्य प्रतियोगी वर्तते तथापि स संयोगाभावाभावः संयोगस्वरूपतया वृत्तिमानस्ति किन्तु स्वपदग्राह्यस्य संयोगाभावरूपप्रतियोगिनः विरोधी नास्ति, यत्र वृक्षे मूलावच्छेदेन कपिसंयोगाभावो विद्यते तत्रैव वृक्षे शाखावच्छेदेन कपिसंयोगस्यापि सत्त्वात्। वृक्षे देशभेदेन संयोगोऽपि विद्यते संयोगाभावोऽपि विद्यत इत्याशयः। तथा च गगनाभावे संयोगाभावे च स्वविरोधिवृत्तिमदभावप्रतियोगित्वाभावात् तयोः केवलान्वयित्वमक्षतम्। नव्यरीत्या केवलान्वयित्वमाह—**एकेति**। एकजातीयसम्बन्धेन-स्वरूपेण गगनाभावसंयोगाभावयोः सर्वत्र विद्यमानत्वेन तयोः केवलान्वयित्वमिति भावः।

केवलव्यतिरेकत्वं व्याकर्त्तुमारभते—**केवलव्यतिरेकिण इति**। **निश्चितेति**। अन्वयव्यतिरेकव्याप्त्योः स्वरूपं तु प्रदर्शितमेव। केवलव्यतिरेकि लिङ्गमुदाहरति—**यथेति**। पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यत्र गन्धवत्त्वं लिङ्गं केवलव्यतिरेकि, यत्र यत्र गन्धवत्त्वं तत्र तत्र इतरभेदवत्त्वमित्यन्वयव्याप्तेः, सकलाया गन्धवत्पृथिव्याः पक्षत्वेन, ग्रहासम्भवात्। किन्तु यत्रेतरभेदो नास्ति, तत्र गन्धवत्त्वमपि नास्तीति व्यतिरेकव्याप्तेरेवात्र संभवात् इति भावः।
न्या.बो. एतदेवोपपादयति—**अत्रेत्यादिना प्रदर्शितवानित्यन्तेन ग्रन्थेन**। गन्ध-
पृ.५०. व्यापकेतरभेदसामानाधिकरण्यरूपान्वव्याप्तिग्रहाभावे हेतुरुक्तः—**अत्र यद्गन्धवदिति**।

'पृथिवी इतरेभ्यो भिद्यतं' इत्यनुमितौ हेतुभूतं व्यतिरेकव्याप्तिघटितं परामर्शस्वरूपमाह—**एवम्प्रकारेणेति**। इतरभेदाभावव्यापकीभूताभावप्रतियोगिगन्धवती

In Public domain. Digitization Muthulakshmi Research Academy

पृथिवीति परामर्शाकारः। यत्र यत्र इतरभेदाभावोऽस्ति यथा जले, तत्र गन्धाभावो विद्यतेऽत इतरभेदाभावव्यापकीभूताभावः गन्धाभावः, तत्प्रतियोगी गन्धः, तद्वती पृथिवीति परामर्शवाक्यार्थः। पृथिवीत्वावच्छिन्नोद्देश्यतानिरूपितेतरभेदत्वावच्छिन्नविधेयताकः इत्यनेन 'पृथिवी इतरेभ्यो भिन्ना' इत्यस्यार्थः उक्तः। यथा जलमित्यादेर्मूलस्य यथाश्रुतमर्थमाह—यथाश्रुतमूलार्थस्त्विति। मूलोक्तस्य यदिति पदस्य जलमित्यर्थः। 'इतरेभ्यो न भिद्यते' इति मूलस्य इतरभेदाभाववदित्यर्थः। न तद् गन्धवदित्यस्यार्थः 'जलमितरभेदाभावव्यापकगन्धाभावव' दिति। एवं सति मूलकारस्य कोऽभिप्रायो निःसृत इत्याह—इत्येवं प्रकारेणेति। अनेन व्यतिरेकयोः साध्याभावहेत्वभावयोः व्याप्तिः प्रदर्शिता। 'न चेयं तथे' त्यत्रेयंपदार्थमाह—इयं पृथिवीति। "न तथा" इत्यस्यार्थः—इतरभेदाभावव्यापकगन्धाभाववती न किन्तु तदभावात्मकगन्धवतीति। तस्मान्न तथेति मूले 'तस्मात्' पदस्यार्थः—गन्धाभावाभाववत्त्वादिति। 'न तथे' त्यस्यार्थमाह—इतरभेदाभाववती न किन्तु इतरभेदाभावाभाववती अर्थात् इतरभेदवतीत्यर्थं इति।

न्या.बो. पक्षलक्षणव्याख्यानायावतारयति—सन्दिग्धेतीति। मूललक्षणार्थमाह—
पृ.४१. साध्यप्रकारकेति। साध्यं प्रकारो यस्य स साध्यप्रकारकः सन्देहः, तत्र यो विशेष्यः सः पक्ष इत्यर्थः। साध्यप्रकारकः संदेहः कीदृशो भवतीत्याह—सन्देहश्चेति। तथा च पर्वत वह्निमान्नवेति संदेहे पर्वतस्य विशेष्यतया पर्वत एव पक्ष इति भावः। इदं च प्राचां लक्षणम्, तेषां मतेऽनुमितिपूर्वं पक्षे साध्यसन्देहस्यावश्यमुत्पत्तेः स्वीकारात्। किन्तु नव्यानां नैष पन्थाः। ते हि गगनं मेघवन्नवेति संदेहाभावेऽपि गगनस्य पक्षत्वसत्त्वेन घनगर्जितश्रवणेन 'गगनं मेघवदिति' गृहान्तर्वर्तिपुरुषस्यानुमितिर्भवतीति दृष्ट्वा साध्यप्रकारकसन्देहविशेष्यत्वं पक्षत्वमिति नानुमन्यन्ते, किन्तु अनुमित्युद्देश्यत्वं पक्षत्वम्। तथा च मेघानुमितौ साध्यसन्देहाभावेऽपि अनुमित्युद्देश्यतया गगनस्य पक्षत्वं नव्यमते उपपन्नम्। इति सर्वमाह—इदञ्चेत्यादिना स्थिरीकृतमित्यन्तेन।

न्या.बो. सपक्षलक्षणं व्याख्यातुमवतारयति—निश्चितेतीति। साध्यप्रकारको यो
पृ.४२. निश्चयः तद्विशेष्यत्वं सपक्षत्वमिति भावः। साध्यप्रकारकं निश्चयमाह—निश्चयश्चेति। तथा चानुमितेः पूर्वं महानसे साध्यस्य निश्चयसत्त्वात् महानसं सपक्षो भवति। विपक्षत्वं व्याचष्टे—साध्याभावेति। साध्याभावप्रकारको यो निश्चयः तद्विशेष्यत्वं विपक्षत्वमित्यर्थः। निश्चयप्रकारमाह—निश्चयश्चेति। तथा चात्र वह्न्यभावप्रकारके निश्चये ह्रदस्य विशेष्यत्वेन ह्रदो विपक्षः कथ्यते। पर्वतो वह्निमानित्यनुमितौ पर्वतः पक्षः, महानसं सपक्षः, ह्रदो विपक्ष इति तात्पर्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

इदम्पर्यन्तं सद्धेतवो व्याख्याताः, इतो हेत्वाभासान् (असद्धेतून्) व्याख्यातुमारभते—**एवमिति**। हेत्वाभासपदार्थमाह—**हेतुवदिति**। हेतुवद् ये आभासन्तेमात्रं, न तु वस्तुतो हेतवस्ते हेत्वाभासा इत्यर्थः। दुष्टहेतव इति यावत्। ते च हेत्वाभासाः पञ्च। तथा च गौतमसूत्रम्—**"सव्यभिचार-विरुद्ध प्रकरणसम-साध्यसम-कालातीता हेत्वाभासाः" (१।२।४)**। ननु के दोषाः यैर्दोषैर्हेतवो
न्या.बो. दुष्टहेतव इति कथ्यते ? तत्राह—**दोषाश्चेति**। ननु व्यभिचारादिदोषः साक्षात्-
पृ.४३. सम्बन्धन हेतौ तिष्ठतीति सव्यभिचारो हेतुः दुष्टः प्रतिपाद्यतान्नाम किन्तु ये बाधादिदोषाः हेतौ न तिष्ठन्ति। किन्तु पक्षादौ एव तिष्ठन्ति, तत्रत्यहेतवः कथं दुष्टाः कथ्येरन्निति शङ्कामपाकर्तुमाह—**एकज्ञानेति**। तथा च एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धेन सर्वे एव हेतवो दोषवन्तो भविष्यन्तीति न कापि क्षतिः।

पृथक् पृथक् दोषलक्षणानि त्वग्रे वक्ष्यन्ते, इह पञ्चविधदोषसाधारणं लक्षणं तावदाह—**यद्विषयकत्वेनेति**। अत्र तृतीयाया अवच्छिन्नत्वमर्थः। ज्ञानस्येति षष्ठ्या निष्ठत्वमर्थः। तथा च यद्विषयकत्वावच्छिन्नं ज्ञाननिष्ठमनुमितितत्करणान्यतरप्रतिबन्धकत्वं तत्त्वं दोषसामान्यलक्षणम्। यद्विषयकं ज्ञानम् अनुमितितत्करणान्यतरप्रतिबन्धकं स दोष इति तात्पर्यम्।

अयं भावः—दोषा हि अनुमितिं तत्करणीभूतं व्याप्तिज्ञानञ्च प्रतिबध्नन्ति। तत्र प्रतिबन्धकता दोषज्ञानेऽस्ति, प्रतिबध्यता चानुमितितत्करणीभूतव्याप्तिज्ञानयोरस्ति। एवं सति लक्ष्यतास्थलोक्तनियमानुसारं दोषज्ञाननिष्ठाया अनुमितितत्करणान्यतरनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताया अवच्छेदकं दोषविषयकज्ञानत्वम्। एवं दोषज्ञाननिष्ठोक्तप्रतिबन्धकता दोषविषयकज्ञानत्वावच्छिन्ना (दोषविषयकत्वावच्छिन्ना) भवति। तथा च यद्विषयकत्वावच्छिन्ना दोषज्ञाननिष्ठा अनुमितितत्करणान्यतरनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता तत्त्वं दोषत्वमिति पर्यवसितम्। यथा ह्रदो वह्निमानित्यनुमितौ वह्न्यभाववद्ध्रद इत्याकारकबाधो दोषः। तत्र वह्न्यभाववद्ध्रदविषयके ह्रदो वह्न्यभाववानिति ज्ञाने सति ह्रदो वह्निमानित्यनुमितिर्न जायते, तथा च ह्रदो वह्निमानित्यनुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताया वह्न्यभाववद्ध्रदविषयके ज्ञाने सत्त्वेन एतत्स्थले वह्न्यभाववद्ध्रदरूपबाधदोषः। एवं धूमवान् वह्नेरित्यनुमितिस्थले धूमाभाववद्वृत्तित्वं वह्निगतं व्यभिचारनामकदोषः। तत्र धूमाभाववद्वृत्तिर्वह्निरिति व्यभिचारज्ञाने सति धूमाभाववदवृत्तिर्वह्निरिति व्याप्तिज्ञानं न जायते। तथा च धूमाभाववदवृत्तिवह्निरिति व्याप्तिज्ञानरूपानुमितिकरणनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताया धूमाभाववद्वृत्तित्वरूपव्यभिचारज्ञाने सत्त्वेन एतत्स्थले

In Public domain. Digitization Muthulakshmi Research Academy

धूमाभाववद्वृत्तित्वरूपो व्यभिचारो दोषः। तद्वत्त्वाच्च वह्निर्हेतुः व्यभिचारी भवति। दुष्टहेतुनिरूपणस्य प्रयोजनमाह—हेतौ दोषज्ञाने इति।

सव्यभिचारं व्याख्यातुमारभते—सव्यभिचारमिति। लक्षणमाह—साधारणाद्यन्यतमत्वमिति। अन्यतमपदार्थस्तु पूर्वमुक्तः। साधारणत्वस्वरूपमाह—साध्याभाववद्वृत्तित्वमिति। फलनिर्देशसहितमुदाहरणमाह—वह्निमान् प्रमेयत्वादिति। अत्र साध्यो वह्निः, तदभाववान् ह्रदादिः, तत्र प्रमेयत्वस्य
न्या.बो. वृत्तित्वमिति लक्षणसमन्वयः। असाधारण इतीति। सर्वसपक्षविपक्षव्यावृत्तत्वे
पृ.४४. सति पक्षमात्रवृत्तित्वम् इत्यसाधारणलक्षणे सर्वसपक्षव्यावृत्तत्वस्यार्थमाह—निश्चितेति। सपक्षपदेन निश्चितसाध्यवतो ग्रहणात् व्यावृत्तत्वपदस्यावृत्तित्वार्थकत्वाच्चेति भावः। साध्यवदवृत्तित्वपदस्य साध्यासामानाधिकरण्यमित्यर्थं इत्याह—साध्यवदवृत्तित्वमिति। एवं रीत्यैव सर्वविपक्षव्यावृत्तत्वमपि निश्चितसाध्याभावासामाधिकरण्यरूपं ज्ञेयम्। वाद्युक्तदुष्टहेतौ एवंविधासाधारणत्वज्ञानस्य फलमाह—हेताविति।

न्या.बो. अनुपसंहारिलक्षणं व्याख्यातुमाह—अनुपसंहारिणं लक्षयतीति। अन्वय-
पृ.४५. व्यतिरेकदृष्टान्तरहितत्वमनुपसंहारित्वमित्यस्य तात्पर्यमाह—उभयत्रेति। दृष्टान्ताभावादिति = सपक्षविपक्षयोरभावादित्यर्थः। हेतुमाह—सर्वस्यैवेति। पक्षत्वात् = सन्दिग्धसाध्यवत्त्वात्। पक्षातिरिक्ताप्रसिद्धेरिति—निश्चितसाध्यवतो निश्चितसाध्याभाववतश्चाप्रसिद्धेरुभयी अपि व्याप्तिर्नास्तीति भावः। तथा चात्रानुमितिहेतुः परामर्श एव न सेत्स्यतीत्याशयः। परिष्कृतमनुपसंहारित्वमाह—किञ्चिदिति। किञ्चिद्विशेष्यको यो निश्चयः तदविषयीभूतं साध्यं यस्य हेतोः स किञ्चिद्विशेष्यकनिश्चयाविषयसाध्यकः, तत्त्वे सति, किञ्चिद्विशेष्यकनिश्चयस्याविषयीभूतः साध्याभावो यस्य हेतोः स हेतुः किञ्चिद्विशेष्यकनिश्चयाविषयसाध्याभावकः, तत्त्वमनुपसंहारित्वमित्यर्थः। यादृशेन हेतुना तत् साध्यमनुमीयेत यत् साध्यमन्यत्र (पक्षातिरिक्ते) क्वचित् निश्चितं न स्यात् न वा तदभाव (साध्याभाव) एव क्वचिन्निश्चितो भवेत्, स हेतुरनुपसंहारी भवतीत्याशयः। अनुपसंहारित्वज्ञानस्य फलमाह—एतदीयेति। व्याप्तिसंशयजननद्वारेति। यत्र साध्यसाध्याभावान्यतरनिश्चयः क्वचिदपि न भवति, तत्र साध्यहेत्वोः साध्याभावहेत्वभावयोर्वा साहचर्यरूपव्याप्तिनिश्चयो नैव जायते अपि तु व्याप्तिसंशय एव जायते, तत्रेत्यर्थः।

साध्याभाववदवृत्तित्वमेव व्याप्तिर्युक्ता, केवलान्वयी हेतुश्चानुपसंहारिणि अन्तर्भावनीय इत्याशयेनानुपसंहारित्वं वस्तुगत्या लक्षयति—वस्तुतस्त्विति।

In Public domain. Digitization Muthulakshmi Research Academy

न्या.बो. पृ.२६. विरुद्धं हेत्वाभासं व्याख्यातुमुपक्रमते—विरुद्धं लक्षयतीति । साध्याभावव्याप्त इति । साध्याभावव्याप्तिमानित्यर्थः । का साध्यभावव्याप्तिरित्याह—साध्याभावव्याप्तिः साध्याभावनिरूपितव्यतिरेकव्याप्तिरिति । एतस्या एव पूर्वोपदर्शित स्वरूपमाह—साध्यव्यापकीभूताभावप्रतियोगित्वमिति । साध्यं सिषाधयिषुर्वादी साध्यव्याप्तं हेतुमनुपन्यस्य साध्याभावव्याप्तमेवोपन्यस्तवानतः स स्वयमेव निगृहीतो भवतीत्याशयानः टीकाकार एतज्ज्ञानफलमाह—तथा चेति । सत्प्रतिपक्षस्थलेऽपि एवमेवानुमितिप्रतिबन्ध इत्यतिदिशति—एवमिति । ननु यदि विरुद्धसत्प्रतिपक्षयोरुभयत्रापि एकदिशैवानुमितिप्रतिबन्धस्तदा तयोः को भेद इत्याह—विरुद्धसत्प्रतिपक्षयोरिति । विरुद्धस्थले एक एव हेतुर्भवति यः साध्यसाधकत्वेनोपन्यस्यमानोऽपि साध्याभावमेव साधयति, सत्प्रतिपक्षस्थले तु द्वौ हेतू भवतः, एकः साध्यसाधकत्वेनोपन्यस्तोऽपरश्च साध्याभावसाधकत्वेनोपन्यस्त इति तयोर्भेदः ।

न्या.बो. पृ.२७. सत्प्रतिपक्षस्वरूपमाह—साध्याभावेति । साध्याभावव्याप्यः प्रतिहेतुरर्थात् द्वितीयः प्रतिद्वन्द्वी हेतुः, तद्वान् पक्षो यद्धेतौ सति, स सत्प्रतिपक्ष इत्यर्थः । तयोरपरं भेदकारणमाह—साध्याभावेति । साध्याभावसाधकस्यैव हेतोः अज्ञान्वशात् साध्यसाधकत्वेनोपन्यस्तत्वात् वादिनोऽतितरामसामर्थ्यं सूचितं भवतीत्याशयः ।

नामतोऽसिद्धभेदाः प्रतिपादिता अपि लक्षिता नेति तल्लक्षणमाह—आश्रयासिद्धिर्नामेति । पक्षताया अवच्छेदको यो धर्मस्तद्विशिष्टस्य पक्षस्याप्रसिद्धिरित्यर्थः । मूलोपदर्शितादेवोदाहरणात् एतज्ज्ञानफलमाह—अत्रेति । गगनीयत्वं गगनसम्बन्धित्वमित्यर्थः ।

न्या.बो. पृ.२८. स्वरूपासिद्धिमाह—स्वरूपासिद्धिर्नामेति । एतादृशो हेतुरुपादीयते यश्च पक्षे स्यादेव नेत्यर्थ ! एतज्ज्ञानफलमाह—तथा चेति । परामर्शे हि पक्षो हेतुमत्तया ज्ञायते, तथा च पक्षस्य हेतुशून्यत्वेऽनुमितिहेतुभूतः परामर्श एव नोत्पद्यते इत्यर्थः ।

व्याप्यत्वासिद्धं हेत्वाभासं व्याख्यातुं प्रतीकमुपादते—व्याप्यत्वासिद्ध इतीति । सोपाधिको हेतुर्व्याप्यत्वासिद्ध इति मूलोक्तं लक्षणम् । उदाहरणमपि मूल एवास्ति । इतः "व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम्" इति रीत्या कथमुपाधिना हेतौ व्यभिचारित्वमनुमीयत इति स्पष्टयितुं पूर्वं भूमिकामारचयति—प्रकृते इति । उपाधिर्हि साध्यव्यापकत्वे सति साधनाव्यापकः । यथा धूमवान् वह्नेरित्यनुमितिस्थले साध्यो धूमः साधनं वह्निरस्ति । यत्र यत्र धूमोऽस्ति तत्र तत्रार्द्रेन्धनसंयोगोऽस्ति अत आर्द्रेन्धनसंयोगो धूमव्यापकः । एवं

In Public domain. Digitization Muthulakshmi Research Academy

सति सुतरां धूम आर्द्रेन्धनसंयोगव्याप्य इत्याह—धूमव्यापकत्वमिति। एवं यत्र यत्र वह्निरस्ति तत्र तत्रार्द्रेन्धनसंयोगो नास्ति यथा अयोगोलके, अत आर्द्रेन्धनसंयोगः साधनस्य वह्नेरव्यापको विद्यते। तथा च सुतरां वह्नौ आर्द्रेन्धनसंयोगाव्याप्यत्वं सिद्धमित्याह—एवमिति। अव्याप्यत्वमेव व्यभिचारित्वमित्याह—तदेवेति। यद्व्यभिचारित्वं यत्र तद्व्याप्यव्यभिचारित्वमपि तत्रेति नियमात्—आर्द्रेन्धनसंयोगरूपोपाधिव्यभिचारित्वं वह्नावस्ति, ततस्तद्व्याप्यधूमव्यभिचारित्वमपि वह्नावस्ति इत्याह—तथा चेति।

अनुमानप्रकारमपि स्वयमेव दर्शयति—अनुमानेति। पूर्वानुमानहेतु = वादिनोऽनुमाने यो हेतुस्तमित्यर्थः। अत्र सामान्यव्याप्तिं प्रदर्शयति—यो यत्-
न्या.बो. साध्येति। उपाधेः फलमाह—एवं प्रकारेणेति। प्रकृतानुमानम् = पर्वतो
पृ.५९. धूमवानित्यनुमानं, तत्र हेतुभूतो वह्निः। तस्मिन् पक्षे = वह्नि पक्षीकृत्येत्यर्थः। साध्यव्यभिचारोत्थापकतया = साध्यव्यभिचारानुमापकतयेत्यर्थः। व्याप्यत्वासिद्धि-
न्या बो. रूपदोषज्ञानफलमाह—तथा चेति। साध्याभाववद्वृत्तित्व व्यभिचारः, साध्या-
पृ.६०. भाववदवृत्तित्वं व्याप्तिरिति विवेकः।

बाधितनामानं हेत्वाभासं व्याख्यातुं प्रतीकमुपादत्ते यस्येतीति। अर्थः सुगमः। उदाहरणं मूलत एव ज्ञेयम्। एतद्धेत्वाभासज्ञानफलमाह—तथा चेति। अस्य हेत्वाभासस्य बाधित इति नामकरणे निमित्तमाह—बाधितसाध्यकत्वादिति। बाधितं साध्यं यस्य स बाधितसाध्यको हेतुः, तत्त्वादित्यर्थः। साध्यस्य बाधितत्वादिति यावत्।

। इति तर्कसंग्रहन्यायबोधिनीव्याख्यायां कलायामनुमानपरिच्छेदः।

In Public domain. Digitization Muthulakshmi Research Academy

अथोपमानपरिच्छेदः

न्या.बो. पृ.६१. उपमानम्=उपमाननामकं तृतीयं प्रमाणम्। लक्षयति=लक्षणद्वारा बोधयति। उपमितिकरणमितीति। उपमितिनामिकायाः तृतीयप्रमितेः करणमुपमानं प्रमाणमित्यर्थः। कोपमितिनाम्नी प्रमितिरिति जिज्ञासायां प्रदर्शितां तां व्याख्यातुं प्रतीकमुपादत्ते—उपमितिं लक्षयतीति। संज्ञा का? संज्ञी कः? तयोः सम्बन्धश्च क इति संज्ञासंज्ञीतिप्रतीकोपादानपुरःसरं प्रदर्शयति—संज्ञानामेति। निष्कर्षमाह—तथा चेति। उपमानप्रमाणपदेन किं ग्राह्यमित्यत आह—उपमानं नामेति। आरण्यकपुरुषोक्त "गोसदृशो गवय" इत्यतिदेशवाक्यार्थविषयकं ज्ञानमित्यर्थः। 'अयं गवयशब्दवाच्य' इत्युपमित्युत्पत्तौ अतिदेशवाक्यार्थविषयकं शाब्दज्ञानं करणम्। व्यापारोऽत्र क इत्यत आह—अतिदेशवाक्यार्थस्य स्मरणं व्यापार इति। फलमाह—उपमितिरिति। उपमितिकरणभूतमुपमानप्रमाणं स्फुटयति—गोसदृश इति। अस्मिन् 'गोसदृशो गवयपदवाच्य' इत्यतिदेशवाक्यार्थबोधे गोसदृश इति विशेष्यम्, गवयपदवाच्यत्वं प्रकारः, अतो गोसादृश्यावच्छिन्नविशेष्यकं गवयपदवाच्यत्वप्रकारकं ज्ञानं लभ्यते इति भावः।

। इति तर्कसंग्रहन्यायबोधिनीव्याख्यायां कलायामुपमानपरिच्छेदः।

In Public domain. Digitization Muthulakshmi Research Academy

अथ शब्दपरिच्छेदः

न्या बो. शब्दं व्याख्यातुमुपक्रमते—शब्दं लक्षयतीति । लक्ष्यलक्षणे विवेचयति—
पृ.६२.आप्तोच्चरितत्वे सति वाक्यत्वं लक्षणम्, प्रमाणशब्दत्वं लक्ष्यतावच्छेदकमिति । एतेन प्रमाणभूतः शब्दो लक्ष्यो भवति । आप्तोच्चरितत्वे सतीति विशेषणस्य फलमाह—वाक्यत्वमात्रोक्तावति । वाक्यत्वमिति विशेष्यस्य फलमाह—तावन्मात्रोक्ताविति । आप्तोच्चरितत्वमात्रोक्तावित्यर्थः । किं नामाप्तत्वमित्याह– आप्तत्वञ्चेति । घटवद्भूतलमिति शब्दप्रयोगहेतुभूतं यज्ज्ञानं घटवदिदं भूतलमित्याकारकं, तद्वत्त्वमित्यर्थः । एतदनन्तरं पर्य्यवसितं शब्दप्रमाणलक्षणमाह—तथा चेति । ज्ञात्वा ह्यर्थं कश्चिच्छब्दं प्रयुङ्क्ते, नहि हिमालयस्थमौषधमजानानस्तद्वाचकं शब्दं प्रयुङ्क्ते भिषजां वरेण्योऽपीति प्रयोगहेतुभूतयथार्थज्ञानजन्यत्वं शब्दे सूपपन्नम् । इति तु प्राचीनमताभिप्रायेण ।

नव्यानां मतमाह-- वस्तुतस्त्वति । प्राचीनमते पदमेव करणम्, नवीनमते तु पदस्य ज्ञानमेव करणमर्थात् प्रमाणम्, शब्दस्य करणत्वे अतीतानागतशब्दात् शाब्दबोधानुपपत्तिरिति भावः । फलव्यापारौ तु द्वयोर्मते तुल्यौ । व्यापारमाह - वृत्तिज्ञानेति । वृत्तिज्ञानसहकृतं यत् पदज्ञानं तज्जन्या या पदार्थोपस्थितिः सैव
न्या बो.व्यापार इति भावः । फलमाह—वाक्यार्थज्ञानमिति । अनुमित्यादिवत् शाब्द-
पृ.६३.बोध इति फलस्य संज्ञा । वृत्तिरेव केत्यत आह—वृत्तिर्नामेति । शक्तिलक्षणान्यतररूपेति । द्विविधैवेत्यर्थः । एतेन सांप्रतिकाद्यभिमतस्य व्यञ्जनादेः वृत्तित्वमपाकृतं भवति । कथमिति त्वन्यतोऽनुसन्धेयम् । तत्र शक्तिस्वरूपमाह—शक्तिर्नामेति । घटादिविशेष्यको यो घटादिपदजन्यबोधविषयत्वप्रकारक ईश्वरसङ्केतः स शक्तिरित्यर्थः । सङ्केताकारस्त्वीदृशः—अस्मात् पदादयमर्थो बोद्धव्य इति । अत्र 'अयमर्थः' इति भागो घटादिरूपविशेष्यबोधकः । 'अस्मात् पदात्' इत्यस्य एतत्पदजन्ये यर्थः । तव्यप्रत्ययान्तस्य 'बोद्धव्य' इति पदस्य बोधविषयत्वेनेश्वरसङ्केतविषयत्वमर्थः तथा च एतदर्थविशेष्यकैतत्पदजन्यबोधविषयत्वप्रकारक ईश्वरसङ्केतः शक्तिरिति लभ्यते । अतो घटादेरर्थत्वात् घटादिविशेष्यकेत्याद्युक्तिर्युक्ता । एवंविध ईश्वरसङ्केतः ईश्वरेच्छारूप एव भवतीत्याह—ईश्वरसङ्केतो नामेति । ईश्वरेच्छैव एवंविधा शक्तिरित्याह--सैवेति । एतावता विषयतासम्बन्धेन घटपदनिरूपिता शक्तिर्घटेऽस्तीति लभ्यते । तथा च घटविषयकशक्तिनिरूपकत्वाद् घटादिपदं शक्तमित्युच्यते इत्याह शक्तिनिरूपकत्वमेवेति । अर्थः पदानां शक्य इत्युच्यते. कथमित्याह —विषयतासम्बन्धेनेति । पदनिरूपितायाः शक्तेः विषयतासम्बन्धेनाश्रयो अर्थो भवतीत्यत इत्यर्थः ।

In Public domain. Digitization Muthulakshmi Research Academy

शक्तिलणान्यतररूपायां वृत्तौ शक्तिरुक्ता, लक्षणा केत्याह—**शक्यसम्बन्धो लक्षणेति**। शक्यस्य यः सम्बन्धः सामीप्यादिः, स एव लक्षणेत्यर्थः। यथा गङ्गायां घोषः इत्यत्र गङ्गापदस्य शक्यार्थः प्रवाहः, तत्र घोषः (आभीरपल्ली) क्षणमपि वर्त्तितुं नार्हति, तस्माद् गङ्गापदस्य सामीप्यसम्बन्धवति तीरे लक्षणा, अतस्तस्माद् वाक्याद् गङ्गातीरे घोष इत्यर्थो लक्षणया लभ्यते। गौणी-शुद्धाभेदेन लक्षणा द्वेधेत्याह—**सेति**। तत्र गौणीमाह—**गौणी नामेति**। दृष्टान्तं प्रदर्शयति—**यथेति**। माणवकस्तु सिंहो नास्ति, किन्तु विशिष्टे लक्षणां कृत्वा सिंहसदृशो माणवक इत्यर्थो लभ्यते। इयमेव गौणी लक्षणा। शुद्धायास्त्रैविध्यमाह—**जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेतीति**। प्रथमामाह—**लक्ष्यतावच्छेदकरूपेणेति**। गङ्गापदस्य लक्ष्यं तीरं भवत्यतो लक्ष्यतावच्छेदकं तीरत्वं, तेन रूपेणेत्यर्थः। लक्ष्यमात्रबोधेति मात्रपदेद शक्यार्थस्य प्रवाहादेर्व्यवच्छेदः। उदाहरति—**यथा गङ्गायां घोष इति**। गङ्गापदस्य वाच्यो (शक्यः) यः प्रवाहः तत्सम्बन्धस्य तीरे सत्त्वादिति। अग्रे सुगमोऽन्वयबोधः। द्वितीयामाह—**लक्ष्यतेति**। या शक्यार्थसहितं लक्ष्यार्थं बोधयति सा अजहल्लक्षणा कथ्यते। उदाहरति—**यथा काकेभ्य इति**।

न्या बो. अयमाशयः—काकेभ्यो दधि रक्ष्यतामिति वाक्येन काकेभ्य एव दधिरक्षणं
पृ.६४. करणीयं न विडालादिभ्य इत्यर्थो न भवति, किन्तु यावन्तो दध्युपघातका विडालादयस्तेभ्यः सर्वेभ्य एव दधि रक्षणीयमिति वक्तुस्तात्पर्यं तत्रास्ति। अतस्तत्र काकपदस्य दध्युपघातके लक्षणा स्वीक्रियते। तथा च लक्ष्यतावच्छेदकीभूतदध्युपघातकत्वेन रूपेणापरे विडालादयो बोध्यन्ते। एवं सति काकपदशक्यार्थः काकोऽपि न हीयतेऽतोऽजहल्लक्षणेत्यन्वर्थेयं संज्ञेति। अक्षरार्थः स्पष्टः।

यत्र लक्षणया शक्यार्थेषु कश्चिदर्थो हीयते कश्चिदर्थो न हीयते, सा जहदजहल्लक्षणा भवति, तां च वेदान्तिनां मतेनोदाहरति—**जहदजहल्लक्षणेति**। स्वयं तस्याः स्वरूपमाह—**सा चेति**। अत्र शक्यतावच्छेदकं परित्यज्यते व्यक्तिमात्रं बोध्यत इत्याशयः।

अयं सारः—वेदान्तनये तत् त्वमसीति श्रुतौ तत्पदेन सर्वज्ञत्वविशिष्टात्मव्यक्तिः बोध्यते, त्वम्पदेन चाल्पज्ञत्वविशिष्टात्म (जीवात्म) व्यक्तिर्बोध्यते। घटो द्रव्यमितिवत् "तत् त्वमिति" प्रथमान्ताभ्यां पदाभ्यामभेदो बोध्यते। स चाभेदः सर्वज्ञाल्पज्ञव्यक्त्योरनुपपन्नः, ततोऽत्र जहदजहल्लक्षणया सर्वज्ञत्वाल्पज्ञत्वांशौ हित्वा व्यक्त्यंशश्चाहित्वा परस्परमभिन्नमात्ममात्रं बोध्यत इति।

आकाङ्क्षालक्षणं व्याख्यातुमाह—**आकाङ्क्षां लक्षयतीति**। **पदस्येतीति**। पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षेति मूलोक्तं लक्षणम्, तस्यायमर्थः—व्यतिरेकोऽभाव इत्यनर्थान्तरम्। एकं पदं यत्पदाभाववशात्

In Public domain. Digitization Muthulakshmi Research Academy

अन्वयं नानुभावयति अर्थात् शाब्दबोधं न जनयति, तस्य पदस्य तस्मिन् पदान्तरे आकाङ्क्षेति। एतस्यैव व्याख्यामाह टीकाकारः—अव्यवहितोत्तरत्वादि-सम्बन्धेनेति।

अयमाशयः—घटमिति पदं यदोच्चार्यते तदैव घटीयं कर्मत्वमिति बोधो जायते, घटस्येति यदोच्चार्यते तदैव घटीयः सम्बन्ध इति बोधो जायते। अतः घटपदाव्यवहितोत्तरम् अम्पदोच्चारणमावश्यकम्, एवं घटपदोत्तरं स्य-(ङस्) पदोच्चारणमावश्यकम्, केवले घटेति अमिति वा पदे उच्चारिते

न्या बो किञ्चिद्बोधानुत्पादात्। अत्र घटमिति पदेऽव्यवहितोत्तरत्वसम्बन्धेन घटपदविशिष्टम्

पृ.६९.अम्पदमस्ति, एवं घटस्येत्यत्र अव्यवहितोत्तरत्वसम्बन्धेन घटपदविशिष्टं स्यपद-मस्ति, घटपदापेक्षया ऽव्यवहितोत्तर एव अम्पदस्य स्यपदस्य च वर्तमानत्वात्। एतावतैतदायाति यत् यत्पदाव्यवहितोत्तरं यत्पदाभावे सति यादृशशाब्दबोधो न जायते, तादृशशाब्दबोधे अव्यवहितोत्तरत्वसम्बन्धेन तत्पदवत्त्वं तद्पदे आकाङ्क्षेति। अत्र घटमिति पदे घटपदं प्रकारः अम्पदं विशेष्यम्, घटपदनिष्ठा या प्रकारता साऽव्यवहितोत्तरत्वसम्बन्धेन। अत एतदायाति यत् घटीयं कर्मत्वमिति बोध-जननाय अव्यहितोत्तरत्वसम्बन्धेन घटपदप्रकारकम् अम्पदविशेष्यकं घटमित्येता-वज्ज्ञानमावश्यकम्, एवंविधज्ञानाभावे तु शाब्दबोधो न जनिष्यते। तथा च अव्यवहितोत्तरत्वसम्बन्धेन यत्पदप्रकारकयत्पदविशेष्यकज्ञानाभावप्रयुक्तः (ज्ञाना-भाववशात्) यादृशशाब्दबोधो न जायतेऽव्यवहितोत्तरत्वसम्बन्धेन तत्पदवत्त्वं तत्पदनिष्ठमाकाङ्क्षेति टीकाकृतां निष्कृष्टं प्रकारान्तरम्। अत एव अम्घट इति वैपरीत्येनोच्चारणे सति अम्पदस्यैव प्रकारतया घटपदप्रकारकाम्पदविशेष्य-कज्ञानाभावात् घटीयं कर्मत्वमिति स्वाभीष्टः शाब्दबोधो न जायते। तस्मात् सिद्धमाकाङ्क्षाज्ञानं शाब्दबोधं प्रति कारणमिति। पङ्क्त्यर्थस्तु व्याख्ययैव निपुणं करणीय इति।

न्या.बो अर्थाबाधो योग्यतेति मूलस्यार्थमाह—बाधाभाव इति। अर्थबाधाभावो

पृ ६६.योग्यतेत्यर्थः। अग्निना सिञ्चेदिति मूलोदाहृतं व्याचष्टे—अग्निनेति।

सन्निधिनिरूपणे "असहोच्चारितानी" त्यस्यार्थमाह—विलम्बोच्चारिता-नीति।

लौकिकवैदिकद्विविधवाक्ययोः वैदिकपदेन यद्गृह्यते तदाह—वेदवाक्य-मित्यर्थ इति। नहि वेदवाक्यमेव प्रमाणं, किन्तर्हि वेदमूलकानि स्मृत्यादीन्यपि सर्वाणि प्रमाणत्वेन ग्राह्याणीत्याह—इदमुपलक्षणमिति। लौकिकपदस्यार्थमाह—वेदवाक्यभिन्नमिति। लौकिकवाक्यमाप्तोक्तमेव प्रमाणं, तत्राप्तोक्तत्वं किम्? तदाह आप्तत्वञ्चेति। शब्दादिप्रयोगहेतुभूतं यद् यथार्थज्ञानं तद्वत्त्वमित्यर्थः

। इति तर्कसंग्रहन्यायबोधिनीव्याख्यायां कलायां शब्दपरिच्छेदः।

—:०:—

In Public domain. Digitization Muthulakshmi Research Academy

अथावशिष्टपरिच्छेदः

न्या.बो. पूर्वं यथार्थानुभवभेदा व्याख्याता इदानीमयथार्थानुभवभेदान् व्याख्यातु-
पृ.६७.माह—यथार्थानुभवमिति । एकस्मिन्नित्यादिसंशयस्वरूपं व्याचष्टे—एकधर्मा-
वच्छिन्नेति । एकधर्मावच्छिन्ना या विशेष्यता, तादृशविशेष्यतानिरूपिता या भावाभावोभयनिष्ठा प्रकारता, तादृशप्रकारतानिरूपकं यज्ज्ञानं तद् संशय इत्यर्थः। यथा जीवो नित्यो नवेति ज्ञानं संशयः । अत्रैकधर्मः जीवत्वं, तदवच्छिन्ना विशेष्यता जीवनिष्ठा, तन्निरूपिता प्रकारता नित्यत्वतदभावयोरुभयोरस्ति, तादृशप्रकारताक-मिदं ज्ञानमतोऽत्र लक्षणसमन्वयः। ननूक्तलक्षणानुसारं यत्रैकस्मिन् विशेष्ये भावाभावौ विशेषणीभूतौ स्याताम्, तदेव ज्ञानं संशयः कथ्येत, किन्तु अयं स्थाणुर्वा पुरुषो वेति ज्ञानं संशयो न भवेद्, तत्र स्थाणुत्वपुरुषत्वयोर्भावयोरेव विशेषणत्वा-दिति शङ्कामपाकर्त्तुमाह—भावद्वयेति । अप्रसिद्धेरिति । भावद्वयकोटिकः संशयो मयाऽपि नाङ्गीक्रियत इति भावः। शङ्कितस्थले संशयत्वमुपपादयति—स्थाणुर्वेत्यत्रेति ।

न्या.बो. व्याप्यारोपेणेतीति । यथा—पर्वतो वह्निमान् इत्यनुमितौ शङ्कानिवा-
पृ.६८.रणाय "यद्यत्र वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात्" इति तर्कः प्रयुज्यते । अत्र वह्न्यभावो व्याप्यो धूमाभावश्च व्यापकः। तर्के किं कारणमित्याह—तर्के इति । व्याप्यस्य वह्न्यभावादेः व्यापकस्य धूमाभावादेः पर्वतादावभावनिश्चय इत्यर्थः । अन्यथेति । 'यदि वह्निर्न स्यात् धूमोऽपि न स्यात्' इत्युक्तौ न स्याद्-धूमोऽपि, का नो हानिरिति परो ब्रूयादिति भावः ।

सुखलक्षणं व्याख्यातुमाह—सुखं निरूपयतीति । इतरविषयिणी येच्छा, तदनधीना येच्छा, तद्विषयीभूतं यत् तत् सुखमित्यर्थः । इष्टं वस्तु द्विविध भवति, साक्षात् परम्परया च । साक्षादिष्टं सुखं परम्परया चेष्टं तत्साधनम् । सुख-साधनीभूते भोजनादौ तदैवेच्छा भवति, यदा पूर्वं सुखस्येच्छा स्यात् । अतो भोजनेच्छा सुखेच्छाधीना । तथा च सुखेच्छाधीनेच्छाविषयत्वात् भोजने न सुख-लक्षणातिप्रसङ्गः। सुखेच्छा तु नेतरेच्छाधीनाऽत इतरेच्छानधीनेच्छाविषयत्वात् सुखे लक्षणसमन्वयः ।

यथाश्रुतेऽनुकूलत्वप्रकारकज्ञानविशेष्यत्वरूपे सुखलक्षणेऽभिप्रेते घटोऽनुकूल इति ज्ञानस्यानुकूलत्वप्रकारकघटविशेष्यकतया विशेष्यीभूते घटे सुखलक्षणातिव्याप्ति-
न्या.बो.रित्याह—यथाश्रुते इति । निष्कृष्टलक्षणे इतरेच्छानधीनेति विशेषणानुक्तौ
पृ.६९.इच्छाविषयत्वमात्रस्य सुखलक्षणत्वे दोषमाह—सुखेच्छाधीन इति । तथा

In Public domain. Digitization Muthulakshmi Research Academy

भोजनादेः सुखेच्छाधीनेच्छाविषयत्वेन इतरेच्छानधीनेच्छाविषयत्वाभावात् भोजनादौ सुखलक्षणस्य नातिव्याप्तिरिति भावः। सुखे लक्षणसमन्वयमाह—सुखेच्छाया इति। अर्थात् सुखेच्छा नेतरेच्छाधीना, किन्तु सुखमिदमिति सुखत्वप्रकारकज्ञानमात्राधीनाऽत इतरेच्छानधीनेच्छाविषयत्वात् सुखे भवति लक्षणसमन्वयः।

दुःखलक्षणं व्याख्यातुमाह—दुःखं निरूपयतीति।

निष्कृष्टं लक्षणमाह—अत्रापीति। इतरद्वेषानधीनेत्यस्य फलमाह—द्वेषविषयत्वमात्रोक्ताविति। अयमाशयः—सर्पो न साक्षात् द्वेषविषयः, किन्तु तज्जन्यं दुःखमेव साक्षात् द्वेषविषयः, सर्पस्तु दुःखजनकत्वाल्लोकैर्द्विष्यतेऽतो दुःखद्वेषाधीनद्वेषविषयत्वात् सर्पो न दुःखं किन्तु दुःखसाधनमिति। एतत्स्वयमुपपादयति सर्पजन्यदुःखादाविति। अत्रत्यं रहस्यमाह—फलेच्छेति। फलं सुखम्, उपायो भोजनादिः। एवं दुःखमपि फलं, सर्पादिरुपायः। उपायेच्छां प्रति फलेच्छा कारणं भवति। अतः फलेच्छाधीनैवोपायेच्छा भवति। एवमुपायद्वेषं प्रति फलद्वेषः कारणम्। अतः फलद्वेषाधीन एवोपायद्वेष इति भावः।

न्या.बो. संस्कारस्वरूपव्याख्यानायाह—संस्कारं विभजते इति। वेगस्य सर्व-
पृ.७०.प्रसिद्धत्वात् भावनास्वरूपमाह—अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावना-
न्या.बो.लक्षणमिति। विशेषणफलमाह—अत्रेति। स्पष्टोऽर्थः। स्मृतिहेतुत्वरूपविशे-
पृ.७१.ष्यानुपादानेऽनुभवजन्यत्वमात्रस्य चोक्तौ दोषमाह—तावन्मात्र इति।

अयं भावः—यदि प्रतियोग्येव न भवेत्तर्हि कस्य ध्वंसो भवेत्? अतो ध्वंसं प्रति प्रतियोगिनः कारणत्वम्। अनया रीत्या अनुभवध्वंसं प्रत्यपि अनुभवस्य प्रतियोगिविधया कारणता। एवञ्चानुभवध्वंसस्यानुभवजन्यत्वात्तत्रातिव्याप्तिवारणाय स्मृतिहेतुत्वं देयम्। तथा चानुभवध्वंसस्य स्मृतिं प्रति हेतुत्वाभावात् नातिव्याप्तिरिति।

ननु यत्र पूर्वं दण्डोऽयमिति प्रत्यक्षं, तदनन्तरं दण्डी पुरुष इति दण्डविशिष्टपुरुषप्रत्यक्षमुत्पन्नं, तत्र दण्डी पुरुष इत्याकारकप्रत्यक्षे भावनालक्षणातिव्याप्तिः, तस्य दण्डोऽयमिति प्रत्यक्षात्मकानुभवजन्यत्वे सति भाविन्यां दण्डी पुरुष इति स्मृतौ हेतुत्वात्। न च दण्डी पुरुष इति प्रत्यक्षं प्रति दण्डोऽयमिति प्रत्यक्षात्मकज्ञानस्य कथं कारणत्वमिति वाच्यम् दण्डी पुरुष इति ज्ञानस्य दण्डप्रकारकज्ञानत्वेन विशिष्टबुद्धित्वात्, विशिष्टबुद्धिं प्रति च दण्डादिरूपविशेषणज्ञानस्य कारणत्वाङ्गीकारादित्याशङ्कते—नन्वित्यादिना चेदित्यन्तेन ग्रन्थेन। अत्रत्यशङ्काया उपपादनञ्च सरलत्वात् स्वयम्बोध्यम्।

In Public domain. Digitization Muthulakshmi Research Academy

न्या.बो. उत्तरयति—अत्र ब्रूम इत्यादिना नातिव्याप्तिरित्यन्तेन ग्रन्थेन।

पृ.७२. अयमाशयः—अनुभवजन्यत्वं नाम अनुभवत्वावच्छिन्नकारणतानिरूपित-कार्यताशालित्वम्। अर्थात् अनुभवत्वावच्छिन्ना या अनुभवनिष्ठा कारणता, तादृश-कारणतानिरूपिता या कार्यता, तादृशकार्यताशालि यत् तदेवात्रानुभवजन्यपदेन विवक्षितमिति। अत्र कारणता अनुभवत्वेन रूपेण विवक्षितेति तात्पर्य्यम्। दण्डी पुरुष इति बुद्धित्वावच्छिन्नकार्यतानिरूपिता कारणता दण्डोऽयमिति ज्ञाने विद्यते, किन्तु तज्ज्ञानं न दण्डानुभवत्वेन रूपेण कारणं तत्र भवति, दण्डानुभवादिव दण्ड-स्मरणादपि दण्डी पुरुष इति विशिष्टबुद्ध्युत्पत्तेः, किन्तु अनुभवस्मरणसाधारणेन दण्डज्ञानत्वेनैव। अतो विशिष्टबुद्धित्वावच्छिन्नकार्यतानिरूपिता कारणता दण्डज्ञानत्वावच्छिन्ना न तु दण्डानुभवत्वावच्छिन्ना। तथा च अनुभवत्वावच्छिन्न-कारणतानिरूपितकार्यताशालित्वरूपस्यानुभवजन्यत्वस्य दण्डी पुरुष इति प्रत्यक्षेऽभावान्न भावनालक्षणातिव्याप्तिरिति। अक्षरार्थस्तु स्वयमेव बोध्यः।

न्या.बो. उक्तपरिष्कृतलक्षणं भावनायां सङ्गमयति—तथा हीति। अवच्छेदक-

पृ.७३. मिति। भावनात्वावच्छिन्नकार्यतानिरूपिता याऽनुभवनिष्ठा कारणता, तस्या अनुभवत्वं कारणतावच्छेदकमित्यर्थः। अत्रापि अवच्छेदकादिपरिचयार्थं "गन्धवती पृथिवी" इत्यत्रत्या न्यायबोधिनीव्याख्या पुनरनुसन्धेया। शेषः स्पष्टार्थः।

भावनालक्षणे स्मृतिहेतुत्वविशेषणस्य वैयर्थ्यमाशङ्कते—नन्वेवमिति। अयमत्र पूर्वपक्षाशयः—स्मृतिहेतुत्वविशेषणं हि अनुभवध्वंसेऽतिव्याप्ति-वारणाय प्रागुपात्तम्। सा चातिव्याप्तिः अनुभवजन्यत्वविशेषणेनैव नायाति। तथा हि सामान्यतो ध्वंसं प्रति प्रतियोगिनः कारणत्व प्रतियोगित्वेनैव रूपेण भवति। एवं तत्तध्वंसं प्रति तत्तत्प्रतियोगिव्यक्तेः तत्तद्व्यक्तित्वेनैव कारणत्वं भवति, अर्थात् ध्वंसनिष्ठकार्यतानिरूपिता कारणता सामान्यतः प्रतियोगित्वाव-च्छिन्ना, विशेषतश्च तत्तद्व्यक्तित्वावच्छिन्ना भवति, न तु अनुभवत्वेनाप्यवच्छिन्ना भवति। तथा चानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताशालित्वरूपानुभव-जन्यत्वविशेषणस्याभावादेव अनुभवध्वंसे नातिव्याप्तिरिति व्यर्थं स्मृतिहेतुत्व-विशेषणमिति भावः। अक्षरार्थस्तु स्पष्टः।

न्या.बो. उत्तरयति—स्मृतावतिव्याप्तिवारणायैवेति। अयं भावः—स्मृतिं

पृ.७४. प्रत्यनुभव एव कारणं न तु स्मृतिरपि, अतो घटस्मृतित्वावच्छिन्नं प्रति घटानु-भवस्य घटानुभवत्वेनैव कारणता न तु घटज्ञानत्वेन। यदि स्मृतिं प्रति स्मृत्य-नुभवौ द्वावपि कारणे भवेताम् तदोभयसाधारणं ज्ञानत्वमेव स्मृतिकारणता-वच्छेदकं भवेत् न त्वेवमस्ति, तस्मात् स्मृतिव्यावृत्तमनुभवत्वमेव स्मृतिनिष्ठ-कार्यतानिरूपितकारणतावच्छेदकम्। तथा चानुभवत्वावच्छिन्नकारणतानिरूपित-कार्यताशालित्वस्य स्मृतावपि सत्त्वात् तत्रैव भावनालक्षणातिव्याप्तिवारणाय

In Public domain. Digitization Muthulakshmi Research Academy

स्मृतिहेतुत्वमुक्तम् । तथा सति स्मृतौ अनुभवजन्यत्वसत्त्वेऽनि स्मृतिहेतुत्वाभावात् नातिव्याप्तिरिति भावः । अक्षराणि तु स्वयं योज्यानि ।

न्या.बो. पृ.७१. सामान्यलक्षणं व्याख्यातुमाह—**सामान्यं निरूपयतीति** । लक्षणस्वरूपमाह—**नित्यत्वे सतीति** । गोत्वं हि नित्यत्वात् अनेकासु गोव्यक्तिषु समवायेन सत्त्वाच्च सामान्यम् । सामान्य जातिरित्यनर्थान्तरम् । नित्यत्वविशेषणस्य फलमाह—**नित्यत्वेति** । संयोगो हि द्विष्ठो भवति । अतोऽनेकसमवेतत्वात् तत्रातिव्याप्तिवारणाय नित्यत्वे सतीति देयम् । संयोगो न नित्य इति नातिव्याप्तिः । अनेकसमवेतत्वानुक्तौ नित्यत्वमात्रस्य चोपादाने दोषमाह—**अनेकेति** । आकाशस्य नित्यत्वेऽपि अनेकसमवेतत्वाभावात् नातिव्याप्तिरिति भावः । अनेकपदोपादानस्य फलमाह—**अनेकेति** । नित्यत्वे सति समवेतत्वमात्रोक्तौ आकाशगतैकत्वसंख्यापरिमाणादेः जलीयपरमाणुगतरूपादेश्च नित्यत्वात् स्वाधिकरणे समवायसम्बन्धेन वर्तमानत्वाच्च तत्र तत्रातिव्याप्तिवारणायानेकेति पदम् । तथा च तेषामेकैकस्मिन् समवेतत्वेन नातिव्याप्तिरिति । नित्यत्वे सत्यनेकनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तितावत्त्वम्, नित्यत्वे सति स्वाश्रयान्योन्याभावाधिकरणनिरूनितसमवायसम्बन्धावच्छिन्नवृत्तितावत्त्वं वा सामान्यत्वमिति निष्कर्षः । स्वं=जातित्वेनाभिमतं गोत्वादिकम् ।

न्या.बो. पृ.७६. विशेषलक्षणं व्याख्यातुमाह—**नित्यद्रव्यवृत्तय इतीति** । नित्यद्रव्यवृत्तय इति वाक्यम् प्रयोजकपरतया व्याचष्टे—**नित्यद्रव्येष्विति** । व्यावर्तकाः इत्यस्यार्थमाह—**इतरभेदानुमितिहेतव इति** । एतदेव स्फुटयति—**नित्यद्रव्यवृत्तित्वेति** । नित्यद्रव्यवृत्तित्वरूपा या पक्षधर्मता, तत्प्रयोज्या या इतरभेदानुमापकता, तच्छालिनो विशेषाः भवन्ति ।

अयं भावः—विशेषा हि नित्यद्रव्येषु परमाण्वादिषु इतरपरमाण्वादिभ्यो भेदमनुमापयन्ति, अतो विशेषेषु इतरभेदानुमापकता विद्यते । अनुमितिं प्रति व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य हेतुतया विशेषनिष्ठानुमापकतायाः प्रयोजिका नित्यद्रव्यवृत्तित्वरूपा पक्षधर्मता भवत्येव । तथाहि अयं घटोऽस्माद् घटाद्भिद्यते भिन्नावयवारब्धत्वात् । एवं रीत्या त्रसरेणुपर्यन्तं गत्वा, अयं त्रसरेणुः अस्मात् त्रसरेणोर्भिन्नः, भिन्नावयवारब्धत्वात्, तत इदं द्वयणुकमस्माद् द्वयणुकाद् भिन्नं भिन्नावयवारब्धत्वात् इति भिन्नावयवारब्धत्वहेतुना द्वयणुकपर्यन्तम् इतरभेदः साध्यते । किन्तु परमाण्वादिनित्यद्रव्येष्ववयवाभावात् नानेन हेतुना परमाणुषु मिथः इतरभेदः साधयितुं शक्यते । किन्तु अयं परमाणुः अस्मात् परमाणोर्भिन्नः विशेषादिति विशेष एव तत्र हेतुर्भवति । हेतुर्हि पक्षे वर्तमान एव साध्यं साधयति नावर्तमानः । तथा च नित्यद्रव्यरूपपक्षवृत्तित्वमनुमापकतायां प्रयोजकं सिद्धमेव । निष्कर्षमाह—

In Public domain. Digitization Muthulakshmi Research Academy

नित्यद्रव्यनिष्ठेति । नित्यद्रव्यनिष्ठा या विशेष्यता, तन्निरूपिता या एकमात्रवृत्तिभेदानुमितिजनकतावच्छेदकप्रकारता, तादृशप्रकारताश्रयत्वं विशेषत्वमित्यर्थः ।

इदमत्र रहस्यम्—नित्यद्रव्यरूपपक्षे इतरभेदानुमितौ करणीयायाम् इतरभेदरूपसाध्यव्याप्यविशेषवन्नित्यद्रव्यमित्याकारकः परामर्शो जनकः । अत्र नित्यद्रव्यं विशेष्यं, विशेष्यता नित्यद्रव्यनिष्ठा, तन्निरूपिता प्रकारता विशेषनिष्ठा, सैव च परामर्शनिष्ठाया जनकताया विषयविधया अवच्छेदिका । अत इतरभेदानुमितिजनकतावच्छेदकप्रकारताश्रयत्वस्य विशेषपदार्थे सत्त्वाल्लक्षणसमन्वयः ।

उक्तनिष्कर्षे भेदविशेषणीभूतैकमात्रवृत्तित्वविशेषणस्य फलमाह– पार्थिवपरमाणाविति । 'पार्थिवपरमाणुः जलादिभिन्नो गन्धात्' इत्यत्र जलादिभेदव्याप्यगन्धवान् पार्थिवपरमाणुरित्याकारकपरामर्शस्य जनकतया तदवच्छेदकीभूतप्रकारताश्रयत्वस्य गन्धे सत्त्वादतिव्याप्तिरतः एकमात्रवृत्तित्वं भेदविशेषणम् । तथा च गन्धो नैकस्मिन्नेव परमाणौ इतरभेदानुमितिं जनयति किन्तु सर्वेषु परमाणुष्विति नातिव्याप्तिः । विशेषस्तु एकस्मिन्नेवानुमितिं जनयतीति भावः । 'घटः इतरेभ्यो भिद्यते, तद्घटीयरूपात्' इति स्थले घटनिष्ठविशेष्यतानिरूपितैकमात्रवृत्तिभेदानुमितिजनकतावच्छेकप्रकारताश्रयत्वस्य तद्घटीयरूपे सत्त्वात्तत्र विशेषलक्षणातिव्याप्तिरतो नित्यद्रव्यनिष्ठविशेष्यतानिरूपितेत्युक्तम् । तथा च घटस्यानित्यद्रव्यत्वाद् वारणम् ।

न्या.बो. उक्तनिष्कर्षकरणस्य प्रयोजनमाह—एतेनेति । प्रयोजकत्वाभिप्रायेण
पृ.७७.नित्यद्रव्यवृत्तय इति पदस्य प्रयोज्यत्वाभिप्रायेण च व्यावर्तका इति पदस्य व्याख्यानेनेत्यर्थः । नित्यद्रव्यविशेष्यकेतरभेदानुमितिप्रयोजका इति । विशेषा इति शेषः । विफलमिति । ननु नित्यद्रव्यवृत्तय इति पदम् स्वरूपप्रदर्शनपरं स्यादतो न विफलमत आह—स्वरूपाख्यानस्यापीति । व्यावर्तकपदेनैव कृतत्वादित्यर्थः । प्रयुक्तमिति । प्रयोज्यप्रयोजकभावस्य प्रकृते प्रकटनेन तत्सार्थक्यमिति भावः ।

समवायं व्याख्यातुमाह · समवायमिति । सम्बन्धपदार्थमाह—सम्बन्धत्वमिति । विशिष्टप्रतीतिः=रूपी घटो दण्डी पुरुष इति प्रतीतिः । उभयत्र क्रमेण समवायसंयोगौ विशिष्टप्रतीतिनियामकावतस्तौ सम्बन्धौ ब्रूयेते । समवायलक्षणे नित्यपदफलमाह—तावदिति । समवायोऽयुतसिद्धयोस्तिष्ठतीत्यतोऽयुत-
न्या.बो.सिद्धवृत्तिरित्युच्यते । अयुतसिद्धपदार्थं बोधयितुं प्रतीकमुपादत्ते—ययोर्द्वयोर्मध्य
पृ.७८.इतीति । यन्निष्ठं कालनिष्ठाधिकरणतानिरूपिताधेयतासामान्यं यदवच्छिन्नं तदुभयान्यतरत्वमयुतसिद्धत्वमित्यर्थः ।

अयमाशयः—सर्वे पदार्थाः कालिकसम्बन्धेन काले तिष्ठन्ति स्वाधिकरणावच्छेदेन । यथा घटत्वं काले कालिकसम्बन्धेन विद्यते घटावच्छेदेन, न तु पटा-

In Public domain. Digitization Muthulakshmi Research Academy

वच्छेदेन । अत्र कालोऽधिकरणं, घटत्वमाधेयम्, घटोऽवच्छेदकः । तथा च घटत्वनिष्ठं कालनिष्ठाधिकरणतानिरूपिताधेयतासामान्यं घटावच्छिन्नमस्ति, अतो घटत्वं घटश्च परस्परमयुतसिद्धौ भवत इति भावः ।

अत्यन्ताभावं व्याख्यातुमाह—अत्यन्ताभावमिति । परिष्कृतं तल्लक्षणमाह—प्रागभावेत्यादि । प्रत्येकपदव्यावृत्तिमाह—ध्वंसेति । ध्वंसे अतिव्याप्तिवारणाय प्रागभावाप्रतियोगित्वे सतीति, प्रागभावेऽतिव्याप्तिवारणाय ध्वंसाप्रतियोगित्वे सतीति, अन्योन्याभावेऽतिव्याप्तिवारणायान्योन्याभावभिन्नत्वे सतीति पदान्युक्तानि । आकाशेऽतिव्याप्तिवारणायाभावत्वमित्युक्तम् । त्रैकालिकेति पदमपसार्य मूललक्षणमेव किञ्चित् परिष्कृत्याङ्गीकरोति—वस्तुतस्त्विति ।
न्या.बो. ध्वंसप्रागभावयोरतिव्याप्त्यभावं प्रदर्शयति—ध्वंसप्रागभावयोश्चेति । ननु
पृ.७९. तर्हि मूलोक्तत्रैकालिकेतिपदस्य का गतिरत आह—स्वरूपाख्यानमेवेति । स्वरूपकथनमात्रमित्यर्थः ।

अन्योन्याभावं निरूपयतीति । अभावत्रयवारणाय विशेषणम्=तादात्म्यसम्बन्धावच्छिन्नत्वरूपविशेषणमित्यर्थः । ननु तादात्म्यसम्बन्धावच्छिन्नप्रतियोगित्वावगाहिज्ञानविषयत्वमन्योन्याभावत्वं स्यात्, न तु तादात्म्यसम्बन्धावच्छिन्नप्रतियोगितानिरूपकत्वमन्योन्याभावत्वमिति शङ्कायामाह—घटाभाववन्नेतीति । तथा च तादृशप्रतीतिविषयत्वस्य घटादौ सत्त्वात् तत्रातिव्याप्तिवारणायैव 'प्रतियोगिताक' इति विशेष्यदलमित्यर्थः । उक्तप्रतियोगितानिरूपकोऽन्योन्याभाव एव भवति न तु घटादिरिति तु सारः ।

ननु तर्कसङ्ग्रहग्रन्थमूले द्रव्यगुणादयः सप्तैव पदार्था निरूपिताः सादृश्यादयो न्यायसूत्रोक्तप्रमाणादयश्च पदार्थास्तु न निरूपिताः, अतो न्यूनतेत्याशङ्कां 'सर्वेषामि'ति मूलव्याख्यानायावतारयति—नन्विति । न्यायसूत्रोक्तषोडशपदार्थान्
न्या.बो. सूत्रोपन्यासेन ज्ञापयति—प्रमाणप्रमेयसंशयप्रयोजनेत्यादि ।
पृ.८०. एतेषां कथं सप्तस्वन्तर्भाव इति चेत्, इत्थम्—प्रमाणानि चत्वारि प्रत्यक्षानुमानोपमानशब्दाः । तेषु प्रत्यक्षं प्रमाणमिन्द्रियात्मकम्, इन्द्रियाणां च घ्राणरसनचक्षुःत्वक्छ्रोत्राणां क्रमेण पृथिवीजलतेजोवाय्वाकाशात्मकद्रव्येष्वन्तर्भावः । मनोरूपेन्द्रियस्यापि द्रव्ये अन्तर्भावः । व्याप्तिज्ञानसादृश्यज्ञानपदज्ञानानाम् अनुमानोपमानशब्दप्रमाणभूतानां गुणेऽन्तर्भावः । आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् । एतेषु इन्द्रियाणामन्तर्भावस्तु द्रव्ये कथित एव । आत्मनो द्रव्ये, शरीरस्य द्रव्ये, गन्धरसरूपस्पर्शशब्दानामर्थपदवाच्यानां गुणे, बुद्धेर्गुणे, वाग्बुद्धिशरीरारम्भरूपायाः प्रवृत्तेः यत्नरूपतया गुणे, रागद्वेषमोहरूपदोषाणां क्रमेणेच्छाद्वेषमिथ्याज्ञानस्वरूपाणां गुणे, प्रेत्य=मृत्वा भावो=जननमिति व्युत्पत्त्या मरणोत्तरजन्मैव प्रेत्यभावः, तत्र चरमप्राणशरीरसंयोगध्वंसो मरणम्,

In Public domain. Digitization Muthulakshmi Research Academy

आद्यप्राणशरीरसंयोगो जन्म । तथा च तादृशसंयोगरूपस्य प्रेत्यभावस्य गुणे, सुखदुःखानुभवरूपस्य मुख्यफलस्य गुणे, शेषफलानां तु यथासंभवं द्रव्यादिषु, दुःखस्य गुणे, आत्यन्तिकदुःखध्वंसरूपस्यापवर्गस्याभावे, संशयस्य गुणे, साध्यत्वेनेच्छाविषयरूपस्य प्रयोजनस्य यथायथं द्रव्यादिषु, दृष्टान्तस्य महानसादेर्यथायथं द्रव्यादिषु, शब्दस्वरूपाणाम् प्रतिज्ञाद्यन्यतमरूपावयवानां गुणे, व्याप्यारोपेण व्यापकारोपस्य तर्कस्य ज्ञानविशेषात्मकतया गुणे, निर्णयस्य गुणे, तत्त्वबुभुत्सोः कथा वादः—विजिगीषुकथा जल्पः—स्वपक्षस्थापनाहीनकथा वितण्डा । कथा नाम नानावक्तृकः पूर्वोत्तरपक्षप्रतिपादकवाक्यसन्दर्भः । तथा चोक्तरूपाणां वादादीनां त्रयाणां शब्दरूपतया गुणे, हेत्वाभासानां यथायथं द्रव्यादिषु, अभिप्रायान्तरेण प्रयुक्तशब्दस्यार्थान्तरं प्रकल्प्य दूषणाभिधानरूपस्य च छलस्य गुणे, असदुत्तररूपजातेर्गुणे, पराजयहेतुस्वरूपनिग्रहस्थानानां यथायथं द्रव्यादिष्वन्तर्भाव इत्यर्थः । तत्र विशिष्य प्रतिज्ञातस्य पक्षादेः परित्यागरूपप्रतिज्ञाहानेरभावे, परोक्तदोषोद्दिधीर्षया पूर्वमनुक्तविशेषणविशिष्टतया प्रतिज्ञातार्थकथनरूपस्य प्रतिज्ञान्तरस्य गुणे, स्वोक्तसाध्यादिविरुद्धहेत्वादिकथनरूपस्य प्रतिज्ञाविरोधस्य गुणे, स्वोक्तसाध्यादेः परेण दूषणे कृते तत्साध्यापलापरूपस्य प्रतिज्ञासंन्यासस्याभावे, परोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टहेतुकथनरूपस्य हेत्वन्तरस्य गुणे, प्रकृतानाकाङ्क्षिताभिधानरूपस्य अर्थान्तरस्य गुणे, अवाचकपदप्रयोगरूपस्य निरर्थकस्य गुणे, अवाचकवाक्यप्रयोगरूपस्याविज्ञातार्थस्य गुणे, परिषत्प्रतिवादिबोधानुकूलोपस्थित्यजनकवाक्यप्रयोगरूपाविज्ञातार्थस्य गुणे, अभिमतवाक्यार्थबोधानुकूलाकाङ्क्षाशून्यपदप्रयोगरूपस्यापार्थकस्य गुणे, समयनिबन्धनीभूतो यः कथाक्रमः तद्विपरीतक्रमेणाभिधानरूपस्य अप्राप्तकालस्य गुणे, यत्किञ्चिदवयवशून्यावयवाभिधानरूपस्य न्यूनस्य गुणे, अधिकहेत्वाद्यभिधानरूपस्याधिकस्य गुणे, पुनरभिधानरूपस्य पुनरुक्तस्य गुणे, परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणरूपाननुभाषणस्याभावे, परिषदा विज्ञातार्थस्य वादिना त्रिरभिहितस्याप्यविज्ञानरूपाविज्ञानस्याभावे, उत्तरार्हं परोक्तं बुद्ध्वापि उत्तरस्याप्रतिपत्तिरूपाया अप्रतिभाया अभावे, कथाविच्छेदरूपस्य विक्षेपस्याभावे, स्वपक्षे दोषमनुद्धृत्य परपक्षे दोषाभिधानरूपमतानुज्ञायाः गुणे, निग्रहस्थानं प्राप्तवतो निग्रहस्थानानुद्भावनरूपस्य पर्यनुयोज्योपेक्षणस्याभावे, निग्रहस्थानानवसरे तन्निग्रहस्थानाभिधानरूपस्य निरनुयोज्यानुयोगस्य गुणे, कथायां स्वीकृतसिद्धान्तप्रच्यवनरूपस्यापसिद्धान्तस्याभावे, हेत्वाभासानां यथायथं द्रव्यादिष्वन्तर्भाव इति भावः ।

ननु सादृश्यस्य क्वान्तर्भाव इत्यत आह—तद्भिन्नत्वेति । अयमाशयः—सादृश्यं हि तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्, धर्मवत्त्वञ्च धर्म एव । यथा चन्द्रसदृशे मुखे चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिरूपभूयोधर्मवत्त्वस्य

In Public domain. Digitization Muthulakshmi Research Academy

सत्त्वात् मुखे चन्द्रसादृश्यमस्तीति । तथा चात्र सादृश्यमाह्लादकत्वम् । आह्लादश्च सुखविशेषः । तज्जनकत्वमाह्लादकत्वम् । जनकत्वञ्चाव्यवहितप्राक्क्षणावच्छेदेन वृत्तित्वम् । वृत्तित्वस्य च स्वरूपसम्बन्धात्मकतया मुखाद्यात्मकत्वमेवेति । क्वचिच्च सादृश्यं गवाद्यात्मकमेवेति तस्य नातिरिक्तपदार्थत्वमिति भावः ।

ग्रन्थान्तोक्तस्य काणादन्यायमतयोरिति श्लोकस्यान्वयबोधमाह—**काणादन्यायाभिन्नेति** । काणादन्यायाभिन्नं यन्मतद्वयं तद्विषयिणी या बालसमवेताऽभिन्ना व्युत्पत्तिः, तादृशव्युत्पत्तिप्रयोजिका या अन्नम्भट्टविद्वन्निष्ठा भूतकालिकी कृतिः, तादृशकृतिविषयाभिन्नः तर्कसंग्रहाख्यो ग्रन्थ इत्यर्थः ।

न्या.बो. हे कृष्ण ! सच्चिदानन्दघन परमात्मन् ! (तव) लम्बिनः त्वदाधाराः गाः—
पृ.८१. मम सान्तःकरणानि इन्द्रियाणि अव—पाहि सदा तव चरणारविन्दलग्नानि कुरु इति धिया, पूषा इव पूषा अर्थात् भगवान् भास्कर इव जगति सकलार्थप्रकाशकः न्यायशास्त्रव्याख्यानेन सर्वव्युत्पित्सुभ्यः सकलपदार्थसार्थप्रबोधको गोवर्धनस्तं परमात्मानमभ्यर्चन् अस्ति । काभिः सामग्रीभिरभ्यर्चनां करोतीत्याह—**विपुलाभीरसभाजनेत्यादि** । रसानां भाजनेन सर्वरसशिरोमणिना भक्तिरसेन (पूरिततया) जिताः विबुधेन्द्राणामपि महापण्डितानामपि स्तवाः याभिस्तादृशीभिः विपुलाभिरभिरचनाभिः वाग्विलासैरभ्यर्चनन्नस्तीति भावः ।

इति न्यायवेदान्तसांख्ययोगाचार्य श्रीकेदारनाथत्रिपाठिप्रणीतायां
तर्कसंग्रहन्यायबोधिनीव्याख्यानां कलायाम्
अवशिष्टपरिच्छेदः समाप्तः ।

सारण्यमण्डले पुण्ये ग्रामे विष्णुपुराभिधे ।
जनिस्त्रिपाठिनो लब्ध्वा रामादेर्यो विहारिणः ॥
न्यायव्याकरणे श्रीमत्सूर्यनारायणाद् गुरोः ।
वेदान्तं विश्रुताच्छ्रीमद्धरिहरकृपालुतः—
श्रुत्वा वादविदग्रणीः स विदितः केदारनाथः कृती,
मोहान्तप्रवरं गिरिं हरिहरं संश्रित्य सर्वात्मना ।
अङ्काङ्काङ्कविधौ व्यधत्त विशदां व्याख्यां कलानामिकाम् ।
नव्यन्यायनयप्रवेशमनसां शीघ्रावबोधप्रदाम् ॥

—:०:—

In Public domain. Digitization Muthulakshmi Research Academy

काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्

In Public domain. Digitization Muthulakshmi Research Academy

श्रीगणेशाय नमः

तर्कसंग्रहः

हिन्दीव्याख्योपेत-पदकृत्य-सहितः

प्रत्यक्षपरिच्छेदः

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥

पदकृत्यम्

श्रीगणेशं नमस्कृत्य पार्वतीशङ्करं परम् ।
मया चन्द्रजसिंहेन क्रियते पदकृत्यकम् ॥ १ ॥
यस्मादिदमहं मन्ये बालानामुपकारकम् ।
तस्माद्धितकरं वाक्यं वक्तव्यं विदुषा सदा ॥ २ ॥

विश्वेशं जगत्कर्तारं श्रीसाम्बमूर्तिं हृदि मनसि निधाय नितरां धारयित्वा, गुरुवन्दनं च विधाय कृत्वेत्यर्थः। बालेति। [1]अत्राधीतव्याकरणकाव्यकोशोऽनधीतन्यायशास्त्रो बालः। व्यासादावतिव्याप्तिवारणायाऽनधीतन्यायेति। स्तनन्धयेऽतिप्रसक्तिवारणायाऽधीतव्याकरणेति। सुखेति।

हिन्दी

भवं भवानीं वाग्देवीं न्यायाचार्यांश्च भूरिशः।
प्रणम्य पदकृत्यस्य टिप्पणीं भाषयाऽऽरभे ॥

१. मङ्गलश्लोकमें बालशब्दसे वयकी दृष्टिसे बालक अर्थ अभिप्रेत नहीं है, किन्तु जिसने व्याकरण काव्य और कोशका अध्ययन किया है तथा न्याय-शास्त्रका अध्ययन नहीं किया है, वही यहाँ बाल है। व्याकरणादिके ज्ञाता व्यास आदिमें इस बाललक्षणकी अतिव्याप्ति न हो जाय, इसलिए 'अनधीतन्याय'' यह पद दिया गया। माताका स्तनपान करनेवाले शिशुमें इस लक्षणकी अतिव्याप्ति न हो, इसके लिए "अधीतव्याकरण'' इत्यादि पद दिये गये।

In Public domain. Digitization Muthulakshmi Research Academy

पदार्थाः कति कानि च तेषां नामानि?—

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः ।

द्रव्याणि कति, कानि च तानि ?—

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।

पदकृत्यम्

[A]सुखेनानायासेन बोधाय पदार्थतत्त्वज्ञानायेत्यर्थः। तर्यन्ते प्रमितिविषयीक्रियन्ते इति तर्का द्रव्यादिपदार्थास्तेषां सङ्ग्रहः सङ्क्षेपेणोद्देशलक्षणपरीक्षा यस्मिन् स ग्रन्थः। नाममात्रेण वस्तुसंकीर्तनमुद्देशः, यथा द्रव्यं गुण इति। असाधारणधर्मो लक्षणम्, यथा गन्धवत्त्वं पृथिव्याः। लक्षितस्य लक्षणं सम्भवति न वेति विचारः परीक्षा। अत्रोद्देशस्य पक्षज्ञानं फलं, लक्षणस्येतरभेदज्ञानं, परीक्षाया लक्षणे दोषपरिहार इति मन्तव्यम्।

१. तत्रेति। तत्र सप्तपदार्थमध्ये इत्यर्थः। द्रव्याणि नवैवेत्यन्वयः। एवं तत्रेति पदं चतुर्विंशतिर्गुणा इत्यादिनाऽप्यन्वेति। [B]द्रव्यत्वजातिमत्त्वं, गुणवत्त्व, समवायिकारणत्वं वा द्रव्यसामान्यलक्षणम्।

हिन्दी

A. "सुखबोधाय" का अर्थ है—विना श्रमके द्रव्यादि-पदार्थोंका तत्त्वज्ञान करानेके लिये। प्रमाणके द्वारा अवगत किये जानेवाले द्रव्य आदि पदार्थ ही यहाँ "तर्क" हैं, उनका संग्रह अर्थात् संक्षेपसे उद्देश, लक्षण और परीक्षा होनेसे इस ग्रन्थका नाम तर्कसंग्रह है।

केवल नाम द्वारा वस्तुके उल्लेखको उद्देश कहते हैं, जैसे–द्रव्य गुण कर्म इत्यादि। वस्तुमें रहनेवाले असाधारण धर्मको लक्षण कहते हैं, जैसे—केवल पृथिवीमें रहने वाला गन्धवत्त्वधर्म पृथिवीका असाधारण (निज) धर्म होनेसे पृथिवीका लक्षण है। पृथिवी आदि लक्षित पदार्थका गन्धवत्त्व आदि लक्षण हो सकता है या नहीं—इस प्रकारके विचारको परीक्षा कहते हैं। पदार्थोंके उद्देश अर्थात् नामनिर्देशका फल है—पक्षका ज्ञान होना। पक्षमें इतरभेदका ज्ञान कराना लक्षणका फल है। जैसे—गन्धवत्त्व-लक्षणसे पृथिवीमें जलादिसे भेदका ज्ञान हो सकता है। लक्षणमें दोषका निवारण करा देना परीक्षाका फल है।

१. तत्र अर्थात् सात पदार्थोंके अन्तर्गत पृथिवी जल, तेज, वायु, आकाश, काल, दिशा आत्मा और मन ये नव ही द्रव्य हैं। इस प्रकार तत्रपदका सम्बन्ध आगे भी "चतुर्विंशतिर्गुणाः "पञ्च कर्माणि" इत्यादिके साथ है। अर्थात् उक्त सात पदार्थोंमें गुण रूप रस आदि चौबीस हैं, कर्म उत्क्षेपण आदि पाँच हैं, इत्यादि।

In Public domain. Digitization Muthulakshmi Research Academy

कतिः गुणाः के च ते ?—

रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः ।

कियन्ति कर्माणि कानि च तानि ?—

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ।

सामान्यं कतिविधं ?—

परमपरं चेति द्विविधं सामान्यम् ।

पदकृत्यम्

परमपरं चेति । परसामान्यपरसामान्यमित्यर्थः । [1]परत्वं चाधिकदेशवृत्तित्वम् । अपरत्वं न्यूनदेशवृत्तित्वम् ।

२. तदेव हि लक्षणं यदव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रयशून्यम्, यथा गोः सास्नादिमत्त्वम् । अव्याप्तिश्च लक्ष्यैकदेशावृत्तित्वम्, अत एव गोर्न कपिलत्वं लक्षणं, तस्याव्याप्तिग्रस्तत्वात् । अतिव्याप्तिश्च लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वम्, अत एव गोर्ण शृङ्गित्वं लक्षणं तस्यातिव्याप्तिग्रस्तत्वात् ।

हिन्दी

B. द्रव्यत्वजातिसे युक्त होना, गुणवान् होना या कार्यके प्रति समवायिकारण होना ये द्रव्यके सामान्य लक्षण हैं ।

परसामान्य और अपरसामान्य ये दो प्रकारके सामान्य होते हैं ।

१. जो सामान्य किसीकी अपेक्षा अधिक देशमें रहे वह परसामान्य हैं और जो किसीकी अपेक्षा न्यून देशमें रहे वह अपरसामान्य है । जैसे—पृथिवीत्वादिकी अपेक्षा द्रव्यत्व परसामान्य है तथा द्रव्यत्वकी अपेक्षा पृथिवीत्व आदि अपरसामान्य है ।

२. लक्षण वही होता है, जो अव्याप्ति, अतिव्याप्ति और असंभवरूप तीनों दोषोंसे रहित हो । जैसे गौका "सास्नावत्त्व" लक्षण है । लक्षणका लक्ष्यके किसी भागमें न रहना अव्याप्ति है । इसीलिये कपिलत्व गौका लक्षण नहीं है, क्योंकि श्वेत गौमें नहीं रहनेसे वह अव्याप्तिदोषसे ग्रस्त है । लक्ष्यमें रहते हुए अलक्ष्यमें भी रहना अतिव्याप्ति है । इसीलिये शृङ्गित्व गौका लक्षण नहीं है, क्योंकि महिषमें भी रहनेके कारण शृङ्गित्वलक्षण अतिव्याप्तिदोषसे ग्रस्त है । लक्ष्यमात्रमें न रहना असंभवदोष है । जैसे गौका एकशफवत्त्व (एक खुर होना) लक्षण नहीं है, क्योंकि किसी भी गौमें एक खुर नहीं होनेसे वह लक्षण असंभवदोषग्रस्त है ।

In Public domain. Digitization Muthulakshmi Research Academy

कियन्तो विशेषाः ?—

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।

समवायः कतिविधः ?—

समवायस्त्वेक एव ।

अभावः कतिविधः ?—

अभावश्चतुर्विधः—प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

पृथिव्याः किं लक्षणं, कति च भेदाः ?—

तत्र गन्धवती पृथिवी । सा द्विविधा नित्याऽनित्या च । नित्या—परमाणुरूपा । अनित्या—कार्यरूपा । पुनस्त्रिविधा—शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति । विषयो मृत्पाषाणादिः ।

पदकृत्यम्

असम्भवश्च लक्ष्यमात्रावृत्तित्वम् । यथा-गोरेकशफवत्त्वं न लक्षणं तस्यासम्भवग्रस्तत्वात् । नित्येति । [1]ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वं नित्यत्वम् । ध्वंसेऽतिव्याप्तिवारणाय ध्वंसभिन्नेति विशेषणम् । घटादावतिव्याप्तिवारणाय विशेष्यदलम् । ध्वंसप्रतियोगित्वं प्रागभावप्रतियोगित्वं वाऽनित्यत्वम् । शरीरेति । यद्भोगायतनं तदेव शरीरं चेष्टाश्रयो वा । इन्द्रियमिति । चक्षुरादावतिव्याप्तिवारणाय गन्धग्राहकमिति । कालादावति-

हिन्दी

१. जो ध्वंससे भिन्न हो और ध्वंसका अप्रतियोगी हो, उसे नित्य कहते हैं । ध्वंसका अप्रतियोगी ध्वंस भी है, क्योंकि ध्वंसका ध्वंस नहीं होता है । अतः ध्वंसमें नित्यका लक्षण न चला जाय, इसलिये "ध्वंसभिन्न" यह विशेषण दिया । ध्वंससे भिन्न घटादिमें नित्यलक्षणकी अतिव्याप्तिके निवारणके लिये "ध्वंसाप्रतियोगित्व" यह विशेष्यदल दिया । क्योंकि घट तो ध्वंसका प्रतियोगी होता है । जिसका अभाव होता है, उसे प्रतियोगी कहते हैं । ध्वंस या प्रागभावका जो प्रतियोगी हो, वह अनित्य है ।

शरीरेति । जो सुखदुःखादिभोगका आधार हो अथवा जिसमें चेष्टा हो, वही शरीर है । इन्द्रियमिति । चक्षु आदिमें घ्राणलक्षणके अतिव्याप्तिवारणके लिये 'गन्धग्राहकम्' यह विशेषण दिया । जन्यमात्रका जनक होनेसे काल भी गन्धग्रहणका कारण है, अतः काल आदिमें घ्राणलक्षणके अतिव्याप्तिवारणके लिये 'इन्द्रियम्' यह कहा ।

In Public domain. Digitization Muthulakshmi Research Academy

जलस्य किं लक्षणं, कति च भेदाः ?—

शीतस्पर्शवत्य आपः। ता द्विविधाः नित्या अनित्याश्च। नित्याः—परमाणुरूपाः। अनित्याः—कार्यरूपाः। पुनस्त्रिविधाः—शरीरेन्द्रियविषयभेदात्। शरीरं वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। विषयः सरित्समुद्रादिः।

तेजसः किं लक्षणं, कति च भेदाः ?—

उष्णस्पर्शवत्तेजः। तच्च द्विविधम्—नित्यमनित्यं च। नित्यं परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधं—शरीरेन्द्रिय-

---

पदकृत्यम्

प्रसक्तिवारणायेन्द्रियमिति। विषय इति। [1]शरीरेन्द्रियभिन्नत्वे सत्युपभोगसाधनं विषयः। शरीरादावतिव्याप्तिनिरासाय सत्यन्तम्। परमाण्वादावतिव्याप्तिवारणाय विशेष्यदलम्। कालादिवारणाय जन्यत्वे सतीत्यपि बोध्यम्।

२. शीतेति। तेजआदावतिव्याप्तिवारणाय शीतेति। आकाङ्क्षावारणाय स्पर्शेति। कालादावतिप्रसक्तिवारणाय समवायसम्बन्धेनेति पदं देयम्। इन्द्रियमिति। त्वगादावतिव्याप्तिवारणाय रसग्राहकमिति। रसनेन्द्रियरससन्निकर्षादावतिव्याप्तिनिरासायेन्द्रियमिति। सरिदिति। आदिना तडागहिमकरकादीनां सङ्ग्रहः।

उष्णेति। जलादावतिव्याप्तिनिरासायोष्णेति। कालादावतिप्रसङ्गवारणाय समवायसम्बन्धेनेति पदं प्रत्येकमभिसम्बध्यते। भौममिति।

हिन्दी

१. जो शरीर इन्द्रियसे भिन्न हो और उपभोगका साधन हो वह विषय है। उपभोगका साधन शरीरादि भी है. अतः उसमें विषयलक्षणके अतिव्याप्तिनिवारणके लिये 'शरीरेन्द्रियभिन्नत्वे सति' यह विशेषण दिया। शरीरेन्द्रियसे भिन्न परमाणु आदिमें अतिव्याप्तिवारणके लिये 'उपभोगसाधनम्' यह विशेष्यदल दिया। अतीन्द्रिय परमाणुका उपभोग नहीं होता है। काल भी शरीर इन्द्रियसे भिन्न होता हुआ उपभोगके प्रति कारण है, अतः उसमें विषयत्वका वारण करनेके लिये 'जन्यत्वे सति' यह भी विशेषण जोड़ देना चाहिये। काल तो नित्य है, जन्य नहीं।

२. तेज आदिमें अतिव्याप्तिवारणके लिये 'शीत' विशेषण दिया। आकाश भी शीतद्रव्यका आश्रय है, अतः आकाशमें अतिव्याप्तिवारणके लिये स्पर्शपद दिया। कालिकसम्बन्धसे काल भी शीतस्पर्शका आश्रय है, अतः कालमें अतिव्याप्तिवारणके लिये समवायसम्बन्धका निवेश करना चाहिये।

In Public domain. Digitization Muthulakshmi Research Academy

विषयभेदात्। शरीरमादित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयश्चतुर्विधो—भौमदिव्योदर्याकारजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरुदर्यम्। आकरजं सुवर्णादि।

वायोः किं लक्षणं, कति च भेदा ?—

रूपरहितस्पर्शवान्वायुः। स द्विविधः-नित्योऽनित्यश्च। नित्यः परमाणुरूपः। अनित्यः कार्यरूपः। पुनस्त्रिविधः—शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात्प्राणापानादिसञ्ज्ञां लभते॥

आकाशस्य किं लक्षणं, कतिविधं च तत् ?—

शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च॥

पदकृत्यम्

भुक्तेति। भुक्तस्यान्नादेः पीतस्य जलस्य परिणामो जीर्णता तस्य हेतुरुदर्यमित्यर्थः। सुवर्णेति। आदिना रजतादिपरिग्रहः।

रूपेति। घटादिवारणाय विशेषणम्। आकाशादिवारणाय विशेष्यम्। इन्द्रियमिति। चक्षुरादिवारणाय स्पर्शग्राहकमिति। कालादावतिव्याप्तिवारणायेन्द्रियमिति। वृक्षेति। आदिपदेन जलादिपरिग्रहः। शरीरान्तरिति। [1]महावाय्वादावतिव्याप्तिवारणाय विशेषणम्। मनआदिवारणाय विशेष्यम्। धनञ्जयवारणाय सञ्चारीति। उपाधीति। मुखनासिकाभ्यां निर्गमनप्रवेशनात्प्राणः, जलादेरधोनयनादपानः, भुक्तपरिणामाय जाठरानलस्य समुन्नयनात्समानः, अन्नादेरूर्ध्वनयनादुदानः, नाडीमुखेषु विततनाद् व्यानः इति क्रियारूपोपाधिभेदात्तथा व्यवह्रियत इत्यर्थः।

शब्देति। [2]शब्दो गुणो यस्य तत्तथा। असम्भववारणाय शब्दगुणोभयम्।

हिन्दी

१. बाहर सञ्चरण करनेवाले महावायुमें प्राण लक्षणकी अतिव्याप्ति हो जायगी। अतः उसका वारण करनेके लिये "शरीरान्तः" पद दिया। शरीरके भीतर मन भी सञ्चरण करता है, अतः उसका वारण करनेके लिये वायुपद दिया। शरीरके भीतर रहनेवाले धनञ्जयवायुमें प्राणलक्षणकी अतिव्याप्ति न हो इसके लिये सञ्चारीपद दिया।

२. 'शब्दगुणकम्' यहाँ "शब्द है गुण जिसका" ऐसा बहुव्रीहि समास है। असंभवदोषका वारण करनेके लिये शब्द और गुण दोनों पद दिये। अर्थात् यदि 'शब्दवत्त्वम्'

In Public domain. Digitization Muthulakshmi Research Academy

कालस्य किं लक्षणं, कति च भेदाः ?—

अतीतादिव्यवहारहेतुः कालः । स चैको विभुर्नित्यश्च ।

दिशः किं लक्षणं, कतिविधा च सा ?—

प्राच्यादिव्यवहारहेतुर्दिक् । सा चैका नित्या विभ्वी च ।

आत्मनः किं लक्षणं, कतिविधश्च सः ? —

ज्ञानाधिकरणमात्मा । स द्विविधः—जीवात्मा परमात्मा चेति ।

पदकृत्यम्

विभ्विति । सर्वमूर्तद्रव्यसंयोगीत्यर्थः ।

अतीतेति । अतीत इत्यादिर्यो व्यवहारोऽतीतो भविष्यन्वर्तमान इत्याद्यात्मकस्तस्यासाधारणहेतुः काल इत्यर्थः । [1]नन्विदं लक्षणमाकाशेऽतिव्याप्तं व्यवहारस्य शब्दात्मकत्वादिति चेत्, न, अत्र हेतुपदेन निमित्तहेतोर्विवक्षितत्वात् । न चैवं कण्ठताल्वाद्यभिघातेऽतिव्याप्तिरिति वाच्यम् । विभुत्वस्यापि निवेशात् ।

प्राचीति । इयं प्राचीयमर्वाचीयं प्रतीचीयमुदीचीत्यादिव्यवहारासाधारणं कारणं दिगित्यर्थः । हेतुर्दिगित्युच्यमाने परमाण्वादावतिव्याप्तिः स्यात्तद्वारणाय प्राच्यादिव्यवहारहेतुरिति । [2]आकाशादिवारणायासाधारणेति ।

ज्ञानाधिकरणेति । भूतलादिवारणाय ज्ञानेति । कालादिवारणाय समवायेनेत्यपि देयम् । ईश्वर इति । समवायसम्बन्धेन नित्यज्ञानवानीश्वरः । जीव इति । सुखादिसमवायिकारणं जीव इत्यर्थः ।

हिन्दी

आकाशका लक्षण किया जाय तो आकाशमें शब्दका नित्त योग नहीं होनेसे असम्भव हो जायगा । इसलिए शब्दका समवायमात्र सूचित करनेके लिए गुणपद दिया । यदि केवल गुणवत्त्वको आकाशका लक्षण माना जाय तो भी असम्भवदोष हो जायगा । क्योंकि शब्दातिरिक्त आकाशमें कोई भी ऐसा गुण प्रतीयमान नहीं है जो आकाशको लक्षित कर सके ।

१. "काललक्षणकी अतिव्याप्ति आकाशमें हो जायगी, क्योंकि अतीतादिव्यवहार शब्दरूप है और शब्दका हेतु आकाश होता है" ऐसा नहीं कह सकते । क्योंकि यहाँ हेतुपदसे निमित्तकारण विवक्षित है, आकाश तो शब्दका समवायिकारण होता है । यहाँ यह आशङ्का नहीं कर सकते हैं कि कण्ठताल्वादिका अभिघात शब्दरूप व्यवहारका निमित्तकारण है, अतः उसमें काललक्षणकी अतिव्याप्ति हो जायगी । क्योंकि कालके उक्त लक्षणमें विभुत्वका भी सन्निवेश कर देनेसे कण्ठताल्वाद्यभिघातमें अतिव्याप्ति नहीं होगी ।

२. आकाशादि साधारणकारणमें दिक्लक्षणकी अतिव्याप्तिवारणके लिए असाधारणकारणका निवेश किया गया ।

In Public domain. Digitization Muthulakshmi Research Academy

तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।

मनसः किं लक्षणं, कतिविधं च च तत् ?—

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।

रूपस्य किं लक्षणं, कतिविधं च तत् ?—

चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्लनीलपीतरक्तहरित-

पदकृत्यम्

सुखेति। आत्ममनःसंयोगादिवारणायेन्द्रियमिति। चक्षुरादिवारणाय सुखेति।

चक्षुरिति। [1]रूपत्वादिवारणाय गुणपदम्। रसादिवारणाय चक्षुर्ग्राह्य इति। [2]संख्यादिवारणाय मात्रपदम्। यद्यपि प्रभाभित्तिसंयोगवारणाय गुणपदेन विशेषगुणस्य विवक्षणीयतया तत एव संख्यादिवारणं सम्भवतीति मात्रपदं व्यर्थम्। तथापि सांसिद्धिकद्रवत्ववारणाय तदावश्यकम्। वस्तुतस्तु परमाणुरूपेऽव्याप्तिवारणाय चक्षुर्मात्रग्राह्यजातिमत्त्वस्य विवक्षणीयतया विशेषपदं न देयम्। त्र्यणुकादिवारणाय गुणपदं तु देयम्। सप्तेति। रूपमित्यनुषज्यते।

हिन्दी

१. जो पदार्थ जिस इन्द्रियसे ग्राह्य है, उसमें रहनेवाली जाति भी उसी इन्द्रियसे ग्राह्य होती है—इस नियमके अनुसार रूपमें रहनेवाली रूपत्वजाति भी चक्षुर्मात्र-ग्राह्य है। अतः रूपत्वमें रूपलक्षणकी अतिव्याप्ति न हो, इसके लिए गुणपद दिया गया।

२. एकत्वादि संख्या भी चक्षुद्वारा ग्राह्य गुण है, अतः उसमें रूपलक्षणकी अतिव्याप्ति न हो, एतदर्थ मात्रपद दिया गया। अर्थात् संख्या चक्षुर्मात्र ग्राह्य नहीं है क्योंकि त्वगिन्द्रिय द्वारा भी संख्याका ग्रहण होता है। अतः मात्रपद देनेसे लक्षणकी अतिव्याप्ति नहीं हुई। यद्यपि प्रभा और भित्तिका संयोग भी चक्षुर्मात्र ग्राह्य गुण है, अतः उसमें अतिव्याप्ति वारणके लिए गुणपदसे विशेषगुण विवक्षित करना होगा। ऐसी स्थितिमें उसीसे संख्यादिका भी वारण सुतरां हो जायगा। अतः मात्रपद देना व्यर्थ है। तथापि सांसिद्धिकद्रवत्वरूपविशेषगुणका वारण करनेके लिए मात्रपद देना आवश्यक है। वस्तुतः तो परमाणुरूपमें अव्याप्तिवारणके लिए चक्षुर्मात्रग्राह्यजाति (रूपत्व) मत्त्व विवक्षित करना होगा। ऐसी स्थितिमें प्रभाभित्तिके संयोगमें उक्तजाति (रूपत्व) मत्त्व नहीं होनेसे सुतरां अतिव्याप्ति नहीं होगी। अतः गुणमें विशेषपद देना तो

In Public domain. Digitization Muthulakshmi Research Academy

कपिशचित्रभेदात्सप्तविधम् । पृथिवीजलतेजोवृत्ति । तत्र पृथिव्यां सप्तविधम् । अभास्वरशुक्लं जले । भास्वरशुक्लं तेजसि ।

रसस्य किं लक्षणं, कतिविधश्च सः ?—

रसनाग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषायतिक्त-भेदात् षड्विधः । पृथिवीजलवृत्तिः । तत्र पृथिव्यां षड्विधः । जले मधुर एव ।

गन्धस्य किं लक्षणं, कति च भेदाः ?—

घ्राणग्राह्यो गुणो गन्धः । स द्विविधः—सुरभिरसुरभिश्च । पृथिवीमात्रवृत्तिः ।

पदकृत्यम्

रसनेति । रसत्वादिवारणाय गुण इति । रूपादावतिव्याप्तिवारणाय रसनेति । तत्रेति । पृथिवीजलयोरित्यर्थः । षड्विध इति । अत्र रस इत्यनुवर्तते ।

घ्राणग्राह्य इति । गन्धत्वादावतिव्याप्तिवारणाय गुण इति । रूपादावति-व्याप्तिवारणाय घ्राणग्राह्य इति । पृथिवीति । [1]पृथिवीसम्बन्धसत्त्वे गन्ध-प्रतीतिसत्त्वं पृथिवीसम्बन्धाभावे गन्धप्रतीत्यभाव इत्यन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव जले प्रतीतिर्बोध्या । एवं वायावपि । ननु देशान्तरस्थ-कस्तूरीकुसुमसम्बद्धपवनस्यैतद्देशे सत्त्वात्कुसुमादिसम्बन्धाभावाद्गन्धप्रतीत्य-नुपपत्तिः । न च वाय्वानीतत्र्यणुकादिसम्बन्धोऽस्त्येवेति वाच्यम्, कस्तूर्या न्यूनतापत्तेः, कुसुमस्य च सच्छिद्रत्वापत्तेरिति चेन्न, भोक्त्रदृष्टविशेषेण पूर्ववत् त्र्यणुकान्तराद्युत्पत्तेः, कर्पूरादौ तु तदभावान्न तथात्वमिति ।

हिन्दी

अनावश्यक है । किन्तु चक्षुर्मात्रग्राह्यजातिमत्त्व त्र्यणुकमें भी है, अतः उसमें रूपलक्षण-का अतिप्रसङ्गवारणके लिये गुणपदका देना तो आवश्यक है ।

१. पृथिवीका सम्बन्ध रहनेपर गन्धकी प्रतीति होती है, पृथिवीसम्बन्धका अभाव होनेपर गन्धकी प्रतीति नहीं होती है—इस अन्वय-व्यतिरेकनियमसे जलमें प्रतीत होनेवाली गन्ध पृथिवीकी ही है, ऐसा जानना चाहिये । यद्यपि—देशान्तर में स्थित कस्तूरी या कुसुमसे सम्बद्ध वायुके कारण होनेवाली गन्धप्रतीति नहीं होनी चाहिये, क्योंकि कुसुमादिका सम्बन्ध गन्धप्रतीतिस्थानमें नहीं है । यदि कहें कि वायुद्वारा लाये कुसुमके त्र्यणुकका सम्बन्ध वहाँ भी है, तो ऐसा नहीं कह सकते, क्योंकि त्र्यणुकके निकल जानेपर कस्तूरीमें न्यूनता आ जानी चाहिये तथा कुसुममें छिद्र हो

In Public domain. Digitization Muthulakshmi Research Academy

स्पर्शस्य किं लक्षणं, के च भेदाः ?—

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः । स च त्रिविधः—शीतोष्णानुष्णाशीतभेदात् । पृथिव्यप्तेजोवायुवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि अनुष्णाशीतः पृथिवीवाय्वोः ।

रूपादिचतुष्टयं कुत्र पाकजमपाकजं वा कुत्र ?—

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च । अन्यत्रापाकजं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् ।

सङ्ख्यायाः किं लक्षणम्, कुत्र च सा वर्त्तते ?—

एकत्वादिव्यवहारहेतुः संख्या । सा नवद्रव्यवृत्तिः । एकत्वादिपरार्धपर्यन्ता । एकत्वं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् । द्वित्वादिकं तु सर्वत्रानित्यमेव ।

परिमाणस्य किं लक्षणं, के च तस्य भेदाः ?—

मानव्यवहारासाधारणकारणं परिमाणम् । नवद्रव्यवृत्ति ।

पदकृत्यम्

स्पर्शत्वादावतिव्याप्तिवारणाय गुण इति । रूपादावतिव्याप्तिवारणाय त्वगिन्द्रियेति । सङ्ख्यादिवारणाय मात्रपदम् । तत्रेति । पृथिव्यादिचतुष्टये । शीत इति शीतस्पर्शः । उष्ण इति उष्णस्पर्शः ।

एकत्वादीति । एकत्वमित्यादिर्यो व्यवहारः एको द्वावित्याद्यात्मकस्तस्य हेतुः संख्या इत्यर्थः । घटादिवारणाय एकत्वादीति । कालादिवारणायासाधारणेत्यपि देयम् । ननु संख्याया अवधिरस्ति न वेत्यत आह—एकत्वादीति । तथाच—एकं दश शतं चैव सहस्रमयुतं तथा ।

लक्षं च नियुतं चैव कोटिरर्बुदमेव च ॥

वृन्दः खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः ।

अन्त्यं मध्यं परार्धं च दशवृद्ध्या यथाक्रमम् ॥

इति महदुक्तेः परार्धपर्यन्तैव संख्या इति भावः ।

मानेति । मानं परिमितिस्तस्या यो व्यवहारः—इदं महदिदमणु-इत्याद्यात्मकः तस्य कारण परिमाणमित्यर्थः । दण्डादिवारणाय मानेति । कालादि-

हिन्दी

जाना चाहिये—ऐसी आशङ्का हो सकती है, तथापि भोक्ताके अदृष्टविशेषसे कस्तूरीआदिमें त्र्यणुकान्तरकी उत्पत्ति हो जानेसे न्यूनता या सच्छिद्रता नहीं आने पाती है । कपूर आदिमें तो वैसे अदृष्टका अभाव होनेसे त्र्यणुकान्तरकी उत्पत्ति नहीं होती है और उसमें न्यूनता आ जाती है ।

In Public domain. Digitization Muthulakshmi Research Academy

तच्चतुर्विधम्–अणु महद्दीर्घं ह्रस्वं चेति ।

पृथक्त्वस्य किं लक्षणम् ?—

पृथग्व्यवहारासाधारणकारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति ।

संयोगस्य किं लक्षणम् ?—

संयुक्तव्यवहारहेतुः संयोगः । सर्वद्रव्यवृत्तिः ।

विभागस्य किं लक्षणम् ?—

संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ।

पदकृत्यम्

वारणायासाधारणेति । शब्दत्ववारणाय कारणमिति । नवद्रव्येति । [1]चतुर्विधमपि परमध्यभेदेन द्विविधम् । तत्र परमाणुह्रस्वत्वे परमाणुमनसोः । मध्यमाणुह्रस्वत्वे द्व्यणुके । परममहत्त्वदीर्घत्वे गगनादौ । मध्यममहत्त्व-दीर्घत्वे घटादौ । एतन्मौक्तिकमण्विति व्यवहारस्यावकृष्टमहत्त्वाश्रयत्वाद् गौणत्वं बोध्यम् । एवमेव केतनाद्व्यजनं ह्रस्वमित्यत्रापि निकृष्टदीर्घत्वाद् गौणत्वम् ।

पृथगिति । अयमस्मात्पृथगिति यो व्यवहारस्तस्य कारणं पृथक्त्व-मित्यर्थः । दण्डादिवारणाय पृथगित्यादि । कालादिवारणायासाधारणेति । [2]पृथग्व्यवहारत्ववारणाय कारणमिति ।

संयुक्तेति । इमौ संयुक्ताविति यो व्यवहारस्तस्य हेतुः संयोग इत्यर्थः ।

दण्डादिवारणाय संयुक्तव्यवहारेति । कालादिवारणायासाधारणेत्यपि देयम् । संयुक्तव्यवहारत्वेऽतिप्रसक्तिवारणाय हेतुरिति । उपदर्शितलक्षण-चतुष्टयेऽसाधारणपदं देयम् । कचित्पुस्तके परिमाणपृथक्त्वलक्षणे ईश्वरे-च्छादिवारणायासाधारणेति दृश्यते, तत्त्वाधुनिकैर्न्यस्तमिति बोध्यम् ।

संयोगेति । संयोगनाशजनक इत्यर्थः । कालेऽतिप्रसक्तिवारणाय गुण-पदम् । ईश्वरेच्छादिवारणायासाधारणेत्यपि बोध्यम् । ननु [3]असाधारणपदो-पादाने गुणपदस्य वैयर्थ्यं स्यादिति चेत्, क्रियायामतिप्रसक्तिवारणाय तस्याप्यावश्यकत्वात् ।

हिन्दी

१. परम अणुत्व, मध्यम अणुत्व, परममहत्त्व, मध्यममहत्त्व, परमदीर्घत्व, मध्यम-दीर्घत्व परमह्रस्वत्व, मध्यमह्रस्वत्व इस प्रकार परिमाणके आठ भेद हो जाते हैं ।

२. कारणपद न देनेपर पृथग्व्यवहारका असाधारणधर्म जो पृथग्व्यवहारत्व है, उसमें अतिप्रसङ्ग हो जायगा ।

३. असाधारणपद देनेसे ही कालमें अतिव्याप्तिका निवारण हो जायगा, अतः गुणपद व्यर्थ है—ऐसा नहीं कहा जा सकता, क्योंकि संयोगनाशका असाधारणकारण क्रिया भी है, अतः उसमें अतिव्याप्तिवारणके लिये 'गुण' पद भी आवश्यक है ।

In Public domain. Digitization Muthulakshmi Research Academy

परत्वापरत्वयोः किं लक्षणं, के च भेदाः ?—

परापरव्यवहारासाधारणकारणे परत्वापरत्वे । पृथिव्यादि-चतुष्टयमनोवृत्तिनी । ते च द्विविधे—दिक्कृते कालकृते चेति । दूरस्थे दिक्कृतं परत्वं, कनिष्ठे कालकृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वं, कनिष्ठे कालकृतमपरत्वम् ।

गुरुत्वस्य किं लक्षणम् ?—

आद्यपतनासमवायिकारणं गुरुत्वम् । पृथिवीजलवृत्ति ।

द्रवत्वस्य किं लक्षणं, के च भेदाः ?—

आद्यस्यन्दनासमवायिकारणं द्रवत्वम् पृथिव्यप्तेजोवृत्ति । तद्द्विविधम्—सांसिद्धिकं नैमित्तिकं च । सांसिद्धिकं जले । नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं, तेजसि सुवर्णादौ ।

स्नेहस्य किं लक्षणम्, कुत्र च सः ?—

चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ।

पदकृत्यम्

परेति । परव्यवहारासाधारणं कारणं परत्वम् । अपरव्यवहारासाधारणं कारणमपरत्वमित्यर्थः । दण्डादिवारणाय परव्यवहारेति । कालादिवारणायासाधारणेति । परव्यवहारत्ववारणाय कारणेति । एवमेव द्वितीयेऽपि बोध्यम् ।

आद्येति । दण्डादिवारणायासमवायीति । [१]रूपादिवारणाय पतनेति । [२]वेगेऽतिव्याप्तिवारणायाद्येति ।

आद्यस्यन्दनेति । दण्डादिवारणायासमवायीति । रसादिवारणाय स्यन्दनेति ।

चूर्णादीति । चूर्णं=पिष्टं, तदेवादिर्यस्य मृत्तिकादेः, स चूर्णादिस्तस्य पिण्डीभावः संयोगविशेषस्तस्य हेतुर्निमित्तकारणं स्नेह इत्यर्थः । कालादावतिव्याप्तिवारणाय गुणपदम् । रूपादावतिव्याप्तिवारणाय पिण्डीभावेति । चूर्णपदं स्पष्टार्थम् ।

हिन्दी

१. अवयविगत आद्य रूपादिका असमवायिकारण अवयवगतरूपादि भी होता है, अतः रूपादिमें गुरुत्वलक्षणके अतिव्याप्तिवारणके लिये पतनपद दिया ।

२. द्वितीयादिपतनका कारण वेग होता है, अतः उसमें अतिव्याप्तिवारणार्थ आद्यपद दिया ।

In Public domain. Digitization Muthulakshmi Research Academy

शब्दस्य किं लक्षणं, कतिधा च सः ?—

श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधः—ध्वन्यात्मको वर्णात्मकश्च। तत्र ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।

बुद्धेः किं लक्षणं, कतिधा च सा ?—

सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्। सा द्विविधा—स्मृतिरनुभवश्च।

स्मृतेः किं लक्षणम् ?—

संस्कारमात्रजन्यं ज्ञानं स्मृतिः।

पदकृत्यम्

श्रोत्रेति। शब्दत्वेऽतिव्याप्तिवारणाय गुण इति। रूपादिवारणाय श्रोत्रग्राह्य इति।

[1]वस्तुतस्तु श्रोत्रोत्पन्नशब्दस्यैव श्रोत्रग्राह्यत्वेन तद्भिन्नेऽव्याप्तिवारणाय श्रोत्रग्राह्यजातिमत्त्वे तात्पर्याद् गुणपदमनुपादेयमेव।

बुद्धिलक्षणमाह—सर्वेति। सर्वे ये व्यवहारा आहारविहारादयस्तेषां हेतुर्बुद्धिरित्यर्थः। [2]रूपादिवारणाय सर्वव्यवहारेति। कालादिवारणायासाधारणेत्यपि देयम्।

संस्कारेति। [3]संस्कारध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति। अनुभवेऽतिव्याप्तिवारणाय संस्कारजन्यमिति। तथापि प्रत्यभिज्ञायामतिव्याप्तिवारणाय

हिन्दी

१. वीचितरङ्गन्यायसे श्रोत्रमें उत्पन्न हुआ शब्द ही श्रोत्रद्वारा गृहीत होता है। अतः अन्य शब्दोंमें अव्याप्तिवारणके लिये श्रोत्रग्राह्यजातिमत्त्वका उल्लेख करना पड़ेगा। ऐसी स्थितिमें गुणपद देनेकी आवश्यकता नहीं है। क्योंकि शब्दत्वमें श्रोत्रग्राह्य जातिमत्त्व नहीं होनेसे उसमें अतिव्याप्तिका प्रसङ्ग ही नहीं है। कारण, श्रोत्रग्राह्य जाति शब्दत्व है, वह शब्दत्वमें नहीं रहती, किन्तु शब्द ही में रहती है। इसलिये शब्दमें लक्षणका समन्वय होगा और शब्दत्वमें अतिव्याप्तिका प्रसङ्ग नहीं होगा। अतः गुणपद अनावश्यक है।

२. "दण्डादि" ऐसा पाठ समुचित नहीं है, क्योंकि गुण पदसे ही दण्डका वारण हो जायगा। अतः इसके लिये "सर्वव्यवहार" इस विशेषणकी सार्थकता दिखाना असंगत होगा। इस लिये पूर्ववत् "रूपादिवारणाय" यही पाठ समुचित है।

३. यहाँ स्वध्वंसके प्रति वस्तु भी स्वयं कारण होती है। इस नियमके अनुसार संस्कारध्वंस भी संस्कारजन्य हुआ। अतः स्मृतिलक्षणमें ज्ञानपद न देनेपर संस्कारध्वंसमें अतिव्याप्ति हो जायगी। केवल "ज्ञानं स्मृति" लक्षण करने पर अनुभवात्मक

In Public domain. Digitization Muthulakshmi Research Academy

अनुभवस्य किं लक्षणम्, के च भेदाः ?—

तद्भिन्नं ज्ञानमनुभवः । स द्विविधः—यथार्थोऽयथार्थश्च ।

यथार्थानुभवस्य किं लक्षणम् ?—

तद्वति तत्प्रकारकोऽनुभवो यथार्थः । (यथा रजते इदं रजतमिति ज्ञानम्) सैव प्रमेत्युच्यते ।

पदकृत्यम्

संस्कारमात्रजन्यत्वं विविक्षणीयम् । क्वचित्तथैव पाठः । न चैवं सत्यसम्भवः, तस्य संस्कारजन्यत्वे सतीन्द्रियार्थसंनिकर्षाजन्यार्थकत्वात् ।

तदिति । स्मृतित्वावच्छिन्नभिन्नमित्यर्थः । तेन यत्किञ्चित्स्मृतिभिन्नत्वस्य स्मृतौ सत्त्वेऽपि न क्षतिः । घटादावतिव्याप्तिवारणाय ज्ञानमिति । स्मृतिवारणाय तद्भिन्नमिति ।

तद्वतीति । [१]तद्वति तत्प्रकारो यस्य स तथेत्यर्थः । तद्वद्विशेष्यकतत्प्रकारक इति यावत् । स्मृतिवारणायानुभव इति । अयथार्थानुभववारणाय तद्वतीति । निर्विकल्पकेऽतिव्याप्तिवारणाय तत्प्रकारक इति ।

हिन्दी

ज्ञानमें अतिव्याप्ति होने लगेगी, अतः उसके निवारणके लिये संस्कारजन्यत्वविशेषण दिया । संस्कारजन्य प्रत्यभिज्ञाज्ञान ("स एवायं श्यामः") भी होता है, अतः उसमें अतिव्याप्तिवारणार्थ मात्रपद देना चाहिये । क्योंकि प्रत्यभिज्ञाज्ञानमें संस्कारके साथ साथ इन्द्रियसंनिकर्षके भी कारण होनेसे संस्कारमात्रजन्यत्व नहीं है । कहीं तो मूलमें मात्रपदके सहित ही पाठ है ।

"किन्तु मात्रपदका सन्निवेश करनेपर असंभवदोष हो जायगा, क्योंकि स्मृति भी संस्कारमात्रसे जन्य नहीं होती, किन्तु आत्मा और मन भी कारण होता है" ऐसी आशङ्का नहीं होगी । क्योंकि मात्रपदका अभिप्राय यह है कि संस्कारजन्य होते हुए इन्द्रियार्थसंनिकर्षसे अजन्य हो । ऐसा होनेसे प्रत्यभिज्ञामें अतिव्याप्ति भी नहीं हुई और स्मृतिमें आत्मा और मनके भी कारण होनेसे असंभव भी नहीं हुआ ।

१. 'तद्वति' यहाँ सप्तमीविभक्तिका अर्थ है विशेष्यत्व । इसलिये लक्षणका स्वरूप हुआ—तद्वद्विशेष्यक होते हुए तत्प्रकारक जो अनुभव, वह यथार्थ है । अर्थात् जिस अनुभवमें कोई विशेष्य हो और कोई प्रकार (विशेषण) हो तथा वह विशेष्य तद्वत् अर्थात् विशेषणसे युक्त हो, वह अनुभव यथार्थ होता है । अयथार्थ अनुभवमें विशेष्य और विशेषण दोनों होते हैं, किन्तु वहाँ विशेष्य विशेषणरहित होता है, अतः उसमें लक्षणकी अतिव्याप्ति नहीं हुई । निर्विकल्पकज्ञान निष्प्रकारक होता है, अतः तत्प्रकारकपदके देनेसे उसमें अतिव्याप्ति नहीं हुई ।

In Public domain. Digitization Muthulakshmi Research Academy

अयथार्थानुभवस्य लक्षणं किम् ?—

तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः। (यथा-शुक्ताविदं रजतमिति ज्ञानम्) सैवाप्रमेत्युच्यते।

यथार्थानुभवभेदाः के ?—

यथार्थानुभवश्चतुर्विधः—प्रत्यक्षानुमित्युपमितिशाब्दभेदात्।

तत्करणं कतिविधम् ?—

तत्करणमपि चतुर्विधं—प्रत्यक्षानुमानोपमानशब्दभेदात्।

पदकृत्यम्

तदभावेति । [1]तदभाववद्विशेष्यकतत्प्रकारकोऽनुभवोऽयथार्थानुभव इत्यर्थः। यथा-शुक्तौ 'इदं रजतम्' इति ज्ञानम्। स्मृतिवारणायानुभव इति। यथार्थानुभवेऽतिव्याप्तिनिरसनाय तदभाववतीति। निर्विकल्पकवारणाय तत्प्रकारक इति।

यथार्थेति। यथार्थानुभवः प्रत्यक्षमेवेति चार्वाकाः। अनुमितिरपीति काणादबौद्धौ। उपमितिरपीति नैयायिकैकदेशिनः। शाब्दमपीति नैयायिकाः। अर्थापत्तिरपीति प्राभाकराः। आनुपलब्धिकोऽपीति भाट्टवेदान्तिनौ। साम्भविकैतिह्यकावपीति पौराणिकाः। चैष्टिकोऽपीति तान्त्रिकाः। एतेषां मतेऽस्वरसं सम्भाव्य तस्य चातुर्विध्यं दर्शितम्।

तदिति। यथार्थानुभवात्मकप्रमायाः करणमित्यर्थः।

असाधारणमिति। कालादिवारणायासाधारणमिति। व्यापारेऽतिव्याप्तिवारणाय [2]व्यापारवदित्यपि देयम्। व्यापारश्च—द्रव्यान्यत्वे सति

हिन्दी

१. 'तदभाववति' इस पदमें भी सप्तमीका अर्थ पूर्ववत् विशेष्यत्व होनेसे तदभाववद्विशेष्यक तत्प्रकारक अनुभव अयथार्थानुभव हुआ। जैसे शुक्तिमें रजतका ज्ञान अयथार्थ अनुभव हुआ। क्योंकि यहां विशेष्यभूत शुक्तिके रजतत्वाभावसे युक्त होनेसे उक्तज्ञान रजतत्वाभाववद्विशेष्यक और रजतत्वप्रकारक हुआ, अतः अयथार्थ है।

२. व्यापारवत्पद देनेसे "व्यापारवदसाधारणं कारणं करणम्" यह करणका लक्षण निष्पन्न हुआ। व्यापारका लक्षण है—जो द्रव्यसे अन्य हो तथा कारणसे उत्पन्न होते हुए कारणसे उत्पन्न होनेवाले घटादिका जनक हो, वह व्यापार कहाता है। जैसे—चक्रभ्रमि क्रियारूप होनेसे द्रव्यसे भिन्न है तथा दण्डसे उत्पन्न होती हुई दण्डजन्य घटकी जनिका भी है, अतः चक्रभ्रमिको व्यापार कहते हैं।

In Public domain. Digitization Muthulakshmi Research Academy

करणस्य किं लक्षणम् ?—

असाधारणं कारणं करणम् ।

कारणस्य किं लक्षणम् ?—

कार्यनियतपूर्ववृत्ति कारणम् ।

कार्यस्य किं लक्षणम् ?—

कार्यं प्रागभावप्रतियोगि ।

पदकृत्यम्

तज्जन्यत्वे सति तज्जन्यजनकः । ईश्वरेच्छादिवारणाय तज्जन्यत्वे सतीति । कुलालजन्यत्वे सति कुलालजन्यघटजनकत्वं कुलालपुत्रस्याप्यस्त्यतस्तत्राति-व्याप्तिवारणाय प्रथमं सत्यन्तम् । दण्डरूपादिवारणाय तज्जन्यजनक इति ।

कार्येति । कार्यान्नियताऽवश्यम्भाविनी पूर्ववृत्तिः पूर्वक्षणवृत्तिर्यस्य तत्तथे-त्यर्थः । अनियतरासभादिवारणाय नियतेति । कार्यवारणाय पूर्वेति । [1]दण्ड-त्वादिवारणायानन्यथासिद्धत्वविशेषणस्यावश्यकत्वेन तत एव रासभादि-वारणसम्भवे नियतपदमनर्थकमेव । एवं चानन्यथासिद्धकार्यपूर्ववृत्ति कारण-मिति फलितम् । अनन्यथासिद्धत्वमन्यथासिद्धिशून्यत्वम् । अन्यथासिद्धिश्चाव-श्यक्लृप्तनियतपूर्ववर्तिनैव कार्यसम्भवे तत्सहभूतत्वम् । यथाऽवश्यक्लृप्त-नियतपूर्ववर्तिभिर्दण्डादिभिरेव घटरूपकार्यसम्भवे तत्सहभूतत्वं दण्डत्वादौ, तदन्यथासिद्धत्वम् ।

प्रागभावेति । [2]कालादिवारणाय प्रागिति । [3]असम्भववारणाय प्रतियोगीति ।

हिन्दी

१. दण्डत्व भी घटकार्यके नियत पूर्ववृत्ति है, अतः उसमें घटके प्रति कारणता-का वारण करनेके लिये 'अनन्ययासिद्धत्व' विशेषण लगाना आवश्यक है। ऐसी स्थितिमें रासभमें भी इसी विशेषणसे घटकारणताका वारण हो जायगा । अतः नियत-पद वस्तुतः व्यर्थ है । तव लक्षणका निष्कर्ष यह हुआ—अनन्यथासिद्ध हो और कार्यके पूर्ववृत्ति हो, वह कारण है ।

२. 'प्राक्'पद न देनेपर 'अभाव'पदसे अन्योन्याभाव भी गृहीत हो जायगा । ऐसी स्थितिमें अन्योन्याभावका प्रतियोगी होनेसे काल आदिमें कार्यलक्षणकी अतिव्याप्ति हो जायगी । 'प्राक्'पद देनेपर तो कालका प्रागभाव नहीं होनेसे प्रागभावप्रतियोगित्व-लक्षणकी कालमें अतिप्रसक्ति नहीं हुई ।

३. 'प्रतियोगी' शब्दका अर्थ है विरोधी । 'प्रतियोगी' शब्द न देनेपर प्रागभावका जो अविरोधी हो वह कार्य है, ऐसा लक्षण हो जायगा, जो असंभवदोषसे ग्रस्त है । क्योंकि कोई भी कार्य प्रागभावका अविरोधी नहीं होता, किन्तु विरोधी ही होता है । इसीलिए कार्य उत्पन्न होते ही उसका प्रागभाव नष्ट हो जाता है । अतः प्रतियोगीपद देना आवश्यक है ।

In Public domain. Digitization Muthulakshmi Research Academy

कारणं कतिविधम् ?—

कारणं त्रिविधम्—समवाय्यसमवायिनिमित्तभेदात् ।

समवायिकारणस्य किं लक्षणम् ?—

यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा—तन्तवः पटस्य । पटश्च स्वगतरूपादेः ।

असमवायिकारणस्य किं लक्षणम् ?—

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम् । यथा—तन्तुसंयोगः पटस्य, तन्तुरूपं पटरूपस्य ।

पदकृत्यम्

यदिति । यस्मिन्समवायसम्बन्धेन वर्तमानं कार्यमुत्पद्यते, तदित्यर्थः । [1]चक्रादिवारणाय समवेतमिति ॥

कार्येणेति । कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति [2]आत्मविशेषगुणभिन्नत्वे सति यत् कारणं तदसमवायिकारणम् । [3]तन्तुसंयोगादावव्याप्तिवारणाय कार्येणेति । [4]तन्तुरूपादावव्याप्तिवारणाय कारणेनेति । आत्मविशेषगुणेऽतिव्याप्तिवारणायात्मविशेषगुणभिन्नत्वे सतीति ।

हिन्दी

१. समवेतपद न देने पर चक्रादिमें संयोगेन वर्तमान होकर घटादिकार्य उत्पन्न होता है, अतः चक्रादिमें घटादिसमवायिकारणत्वकी अतिप्रसक्तिका वारण करनेके लिए समवेतपद दिया ।

२. "आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वं नास्ति" इस नियमके अनुसार "आत्मविशेषगुणभिन्नत्वे सति" यह भी असमवायिकरणके लक्षणमें देना चाहिए ।

३. 'कार्येण' पद न दिया जाय तो तन्तुसंयोग पटका असमवायिकारण नहीं हो सकेगा । क्योंकि तन्तुसंयोग पटकारणीभूत तन्तुके साथ एक जगह समवायसम्बन्धसे नहीं रहता है । कार्यपद देनेपर तो पटात्मक कार्यके साथ वह तन्तुमें रहता है, अतः तन्तुसंयोगमें लक्षणकी अव्याप्ति नहीं हुई ।

४. तन्तुका रूप पटरूपात्मक कार्यके प्रति असमवायिकारण होता है । किन्तु कार्यके साथ एक जगह नहीं रहता है, क्योंकि पटरूपात्मककार्य पटमें रहता है और तन्तुरूप तन्तुमें रहता है । अतः तन्तुरूपमें असमवायिकरणलक्षणकी अव्याप्ति हो गयी । कारणपद देनेसे उसका वारण हो गया । क्योंकि तन्तुरूप पटरूपके साथ भले ही एक जगह न रहे किन्तु पटरूपका कारण जो पट है, उसके साथ तो तन्तुमें तन्तुरूप भी रहता ही है । अतः अव्याप्ति नहीं हुई ।

In Public domain. Digitization Muthulakshmi Research Academy

निमित्तकारणस्य किं लक्षणम् ?—

तदुभयभिन्नं कारणं निमित्तकारणम् । यथा—तुरीवेमादिकं पटस्य ।

करणस्य निष्कृष्टलक्षणं किम् ?—

तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ।

प्रत्यक्षप्रमाणलक्षणं किम् ?—

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् ।

प्रत्यक्षप्रमाज्ञानलक्षणं किम्, कतिविधं च तत् ?—

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् । (ज्ञानाकरणकं

पदकृत्यम्

१. विशेषवारणाय कारणमिति । तदुभयभिन्नं कारणं निमित्तकारणमिति । समवाय्यसमवायिकारणवारणाय तदुभयभिन्नमिति । (विशेषादावतिव्याप्तिवारणाय कारणमिति ।)

तदेतदिति । यस्मात्करणत्वघटकं कारणमुपदर्शितं तस्मादेतत्त्रिविधसाधकमध्ये यत्साधकतमं तदेव करणमिति भावः । इति करणप्रपञ्चः ।

तत्रेति । प्रमाणचतुष्टयमध्ये । [२]दण्डादिवारणाय ज्ञानेति । अनुमानादिवारणाय प्रत्यक्षेति ।

इन्द्रियार्थेति । इन्द्रियं चक्षुरादिकमर्थो घटादिस्तयोः सन्निकर्षः संयोगादिः, तज्जन्यं ज्ञानं प्रत्यक्षमित्यर्थः । [३]सन्निकर्षध्वंसवारणाय ज्ञानमिति । अनुमित्यादिवारणायेन्द्रियार्थसन्निकर्षेति । ननु सोपनेत्रचक्षुषा कथं पदार्थग्रहणम् ? चक्षुष उपनेत्रनिरुद्धत्वेन पदार्थेन सह सन्निकर्षाभावात् । कथं वा स्वच्छजाह्नवीसलिलावृतमत्स्यादेश्चक्षुषा ग्रहणम्? इति चेन्न, स्वच्छद्रव्यस्य तेजो-

हिन्दी

१. द्व्यणुकरूपकार्य के साथ परमाणुमें विशेष भी समवायसम्बन्धसे रहता है, अतः विशेष भी द्व्यणुकके प्रति असमवायिकरण होने लगेगा, इस अतिव्याप्तिका वारण करनेके लिए कारणपद दिया । क्योंकि द्व्यणुकके प्रति विशेष कारण ही नहीं होता है।

२. दण्डादि भी घटादिके प्रति करण होता है, अतः उसमें प्रत्यक्षलक्षणकी अतिव्याप्ति न हो, एतदर्थ ज्ञानपद दिया । दण्ड तो ज्ञानका करण नहीं है।

३. सन्निकर्षका ध्वंस भी इन्द्रियार्थसन्निकर्षसे जन्य है । अतः उसका वारण करनेके लिए ज्ञानपद दिया ।

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानं प्रत्यक्षम्) तद् द्विविधम्—निर्विकल्पकं सविकल्पकं चेति।

निर्विकल्पकलक्षणं किम्?—

(तत्र) निष्प्रकारकं ज्ञानं निर्विकल्पकम्। (यथा—किञ्चिदिदमिति।

सविकल्पकलक्षणं किम्?—

सप्रकारकं ज्ञानं सविकल्पकम्। यथा—डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयमिति।

सन्निकर्षः कतिविधः, कश्च सः?—

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः—संयोगः, संयुक्त-

---

पदकृत्यम्

निरोधकत्वाभावेन तदन्तश्चक्षुःप्रवेशसम्भवात्। न [1]चेश्वरप्रत्यक्षेऽव्याप्तिरिति वाच्यम्, अत्र जन्यप्रत्यक्षस्यैव लक्षितत्वात्।

तत्र निष्प्रकारकमिति। सविकल्पकेऽतिव्याप्तिवारणाय निष्प्रकारकमिति। [2]प्रकारवारणाय ज्ञानमिति।

सप्रकारकमिति। [3]घटादिवारणाय ज्ञानमिति। निर्विकल्पकवारणाय सप्रकारकमिति।

प्रत्यक्षेति। तच्च प्रत्यक्षं षड्विधं—घ्राणजरासनचाक्षुषश्रौत्रत्वाचमानसभेदात्। [4]ननु प्रत्यक्षकारणीभूतेन्द्रियनिष्ठप्रत्यक्षसामानाधिकरण्यघटकः सन्निकर्षः क इत्यपेक्षायां तं विभज्य दर्शयति-प्रत्यक्षेति। लौकिकप्रत्यक्षेत्यर्थः।

हिन्दी

१. ईश्वरको इन्द्रियाँ नहीं होतीं, इसलिए तथाकथित प्रत्यक्षलक्षणकी ईश्वरप्रत्यक्षमें अव्याप्ति दिखायी गयी। तथा जन्यप्रत्यक्षको प्रकृतमें लक्ष्य मानकर उसका वारण किया गया।

२. प्रकारमें प्रकार नहीं होनेसे प्रकार भी निष्प्रकारक हो गया। अतः उसमें निर्विकल्पकत्वकी अतिव्याप्ति न हो, इसके लिए ज्ञानपद दिया।

३. घट भी घटत्वरूप प्रकारवाला है, अतः उसमें वारण करनेके लिए ज्ञानपद दिया।

४. कार्य और कारणमें सामानाधिकरण्य होता है। अतः प्रत्यक्षरूप कार्य और इन्द्रियरूप कारणमें भी सामानाधिकरण्य होता है। अर्थात् विषयतासम्बन्धसे जहाँ प्रत्यक्ष रहता है, वहाँ पर संयोगादिसन्निकर्षसे इन्द्रिय भी रहती है। इस प्रकार संयोग आदि षड्विध सन्निकर्ष उक्त सामानाधिकरण्यके घटक हुए।

In Public domain. Digitization Muthulakshmi Research Academy

समवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायो, विशेषणविशेष्यभावश्चेति ।

घट (द्रव्य) प्रत्यक्षे कः सन्निकर्षः ?—

चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः ।

घटरूपप्रत्यक्षे कः सन्निकर्षः ?—

घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपस्य समवायात् ।

रूपत्वादि-गुणगतजातिप्रत्यक्षे कः सन्निकर्षः ?—

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् ।

शब्दप्रत्यक्षे कः सन्निकर्षः ?—

श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः, कर्णविवरवर्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वाद् गुणगुणिनोश्च समवायात् ।

पदकृत्यम्

संयोगमुदाहरति – चक्षुषेति । तथाच द्रव्यचाक्षुषत्वाचमानसेषु संयोग एव सन्निकर्ष इति भावः ।

घटरूपेति । चक्षुषा इत्यनुषज्यते । तथा च द्रव्यसमवेतचाक्षुष-त्वाच-मानस-रासन-घ्राणजेषु संयुक्तसमवाय एव सन्निकर्ष इत्यर्थः ।

रूपत्वेति । रूपत्वात्मकं यत्सामान्यं तत्प्रत्यक्ष इत्यर्थः । अत्रापि चक्षुषा इत्यनुषज्यते । तथाच द्रव्यसमवेतसमवेतचाक्षुष-रासन-घ्राणज स्पार्शन-मानसेषु सयुक्तसमवेतसमवाय एव सन्निकर्ष इति भावः । [1]अथ द्रव्यतत्समवेतप्रत्यक्षेऽपि संयुक्तसमवेतसमवाय एव सन्निकर्षोऽस्त्विति चेत्, नैतत्—आत्मनोऽप्यनध्यक्षत्वप्रसङ्गात् ।

हिन्दी

१. "द्रव्यके प्रत्यक्षमें संयोग और द्रव्यसमवेत रूपादिके प्रत्यक्षमें संयुक्तसमवायको सन्निकर्ष न मानकर संयुक्तसमवेतसमवायको ही सन्निकर्ष माना जाय । जैसे—घटप्रत्यक्षस्थलमें चक्षु:संयुक्तकपालिका, तत्समवेत कपाल, और उसमें समवाय घटका है । ऐसे ही घटरूपके प्रत्यक्षस्थलमें चक्षु:संयुक्त कपाल, तत्समवेत घट और उसमें समवाय घटरूपका है ।" ऐसा नहीं कह सकते । क्योंकि निरवयव आत्माका मानसप्रत्यक्ष नहीं हो सकेगा । क्योंकि आत्मा मनसे सीधे संयुक्त है, न कि मन:संयुक्तसमवेतसमवेत है ।

In Public domain. Digitization Muthulakshmi Research Academy

शब्दत्वसाक्षात्कारे कः सन्निकर्ष ?—

शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः, श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।

अभावप्रत्यक्षे कः सन्निकर्षः ?—

अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः, घटाभाववद्-भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।

प्रत्यक्षप्रमाणस्य निष्कृष्टं लक्षणं किम्—

एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं, तत्करणमिन्द्रियम् । तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।

। इति प्रत्यक्षपरिच्छेदः ।

पदकृत्यम्

समवायसन्निकर्षमुदाहरति—श्रोत्रेणेति । जननीय इति शेषः । ननु श्रोत्र-शब्दयोः कथं समवाय इत्यपेक्षमाणं प्रति तमुपपाद्य दर्शयति—कर्णेति । [1]अथ समवायस्य नित्यत्वेन शब्दप्रत्यक्षे को व्यापार इति चेत्, शब्दः श्रोत्र-मनःसंयोगो वेति गृहाण ।

शब्दत्वेति । श्रोत्रेण जननीये इत्यनुकर्षशेषः ।

विशेषणेति । [2]विशेषणभावो विशेष्यभावश्चेति बोध्यम् । इन्द्रियसम्बद्ध-विशेषणत्वमिन्द्रियसम्बद्धविशेष्यत्वमिति यावत् । विशेषणभावसन्निकर्षमुप-पाद्य दर्शयति—घटाभाववदिति । 'इह भूतले घटो नास्ती'त्यादौ विशेष्यता-सन्निकर्षोऽवसेयः, सप्तम्यन्तस्य विशेषणत्वात् ।

प्रत्यक्षप्रमाणमुपसंहरति—एवमिति । उपदर्शितक्रमेणेत्यर्थः । ननु सिद्धान्ते प्रत्यक्षज्ञानकरणमिन्द्रियार्थसन्निकर्षः किं न स्यादिति चेन्नेत्याह—तत्करणमिति । प्रत्यक्षप्रमाणं निगमयति—तस्मादिति । प्रत्यक्षप्रमाकरण-त्वादित्यर्थः । सिद्धमिति । न्यायसिद्धान्ते सिद्धमित्यर्थः ।

। इति पदकृत्यके प्रत्यक्षपरिच्छेदः ।

हिन्दी

१. समवायसंनिकर्षके नित्य होनेसे कदाचित् होनेवाले शब्दप्रत्यक्षमें क्या व्यापार है ? तो इसका उत्तर देते हैं कि—शब्दप्रत्यक्षमें शब्द ही व्यापार है, अथवा श्रोत्रमनका संयोग व्यापार है ।

२. अभावप्रत्यक्षमें विशेषणता और विशेष्यता दोनों ही संनिकर्ष हैं । अर्थात् इन्द्रियसम्बद्धविशेषणता और इन्द्रियसम्बद्धविशेष्यता सन्निकर्ष हैं । प्रथमका उदा-हरण—"घटाभाववद्भूतलम्" प्रत्यक्ष हैं और दूसरेका उदाहरण "इह भूतले घटो नास्ति" यह प्रत्यक्ष है ॥

। इति श्रीकेदारनाथत्रिपाठिकृतायां तर्कसंग्रहपदकृत्यहिन्दीटिप्पण्यां प्रत्यक्षपरिच्छेदः ।

In Public domain. Digitization Muthulakshmi Research Academy

अथानुमानपरिच्छेदः

अनुमानस्य किं लक्षणम् ?—

अनुमितिकरणमनुमानम् ।

अनुमितिः का ?—

परामर्शजन्यं ज्ञानमनुमितिः ।

परामर्शस्य किं स्वरूपम् ?—

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः यथा-वह्निव्याप्य-धूमवानयं पर्वत इति ज्ञानं परामर्शः । तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः ।

व्याप्तिः का ?—

यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः ।

पदकृत्यम्

प्रत्यक्षानुमानयोः कार्यकारणभावसङ्गतिमभिप्रेत्य प्रत्यक्षानन्तरमनुमानं निरूपयति—अनुमितीति । अनुमितेः करणमनुमानमित्यर्थः । तच्च लिङ्ग-परामर्श एवेति निवेदयिष्यते । कुठारादावतिव्याप्तिवारणाय अनुमितीति । प्रत्यक्षादावतिव्याप्तिवारणाय-अन्विति ।

नन्वनुमितेरेव दुर्निरूपत्वात्तद्घटितानुमानमपि दुर्निरूपमित्यत आह—परामर्शेति । प्रत्यक्षादावतिव्याप्तिवारणाय परामर्शजन्यमिति । परामर्श-ध्वंसवारणाय ज्ञानमिति । [1]परामर्शप्रत्यक्षवारणाय हेत्वविषयकमित्यपि बोध्यम् ।

व्याप्तिविशिष्टेति । विषयितासम्बन्धेन व्याप्तिविशिष्टं पक्षधर्मताज्ञानं परामर्श इत्यर्थः । घटादिज्ञानवारणाय पक्षधर्मतेति । धूमवान्पर्वत इत्यादि-ज्ञानवारणाय व्याप्तिविशिष्टेति । तदिति । परामर्शजन्यमित्यर्थः ।

यत्र यत्रेति । 'यत्र यत्र धूमस्तत्र तत्राग्निरि'ति व्याप्तेरभिनयः । तत्र साह-चर्यनियम इति लक्षणम् । सहचरतीति सहचरस्तस्य भावः साहचर्यं सामाना-धिकरण्यमिति यावत् । तस्य नियमो व्याप्तिरित्यर्थः । स चाव्यभिचरितत्वम् ।

हिन्दी

१. परामर्शका मानसप्रत्यक्ष भी परामर्शजन्य है, अतः उसमें अनुमितिलक्षणकी अतिव्याप्तिका वारण करनेके लिये "हेत्वविषयक" ऐसा विशेषण लगाना चाहिये ।

In Public domain. Digitization Muthulakshmi Research Academy

पक्षधर्मतायाः किं लक्षणम् ?—

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।

अनुमानं कतिविधम् ?—

अनुमानं द्विविधं—स्वार्थं परार्थं च ।

किं नाम स्वार्थानुमानम् ?—

स्वार्थं स्वानुमितिहेतुः, तथाहि—स्वयमेव भूयोदर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति—

पदकृत्यम्

तच्च व्यभिचाराभावः । व्यभिचारश्च साध्याभाववद्वृत्तित्वम् । तथा च साध्याभाववदवृत्तित्वं व्याप्तिरिति पर्यवसन्नम् । महानसं वह्निमद् धूमादित्यादौ साध्यो वह्निस्तदभाववान् जलह्रदादिस्तद्वृत्तित्वं नौकादाववृत्तित्वं प्रकृते हेतुभूते धूमे इति कृत्वा [1]लक्षणसमन्वयः । धूमवान् वह्नेरित्यादौ साध्यो धूमस्तदभाववदयोगोलकं तद्वृत्तित्वमेव वह्न्यादाविति [2]नातिव्याप्तिः ।

ननु ज्ञातेयं व्याप्तिः, पक्षधर्मताज्ञानमित्यत्र का नाम पक्षधर्मता इत्यपेक्षमाणं प्रति तत्स्वरूपं निरूपयति—व्याप्यस्येति । व्याप्यो नाम व्याप्त्याश्रयः, स च धूमादिरेव, तस्य पर्वतादिवृत्तित्वं पक्षधर्मतेत्यर्थः ।

अथ कथमनुमानमनुमितिकरणं कथं वा तस्मादनुमितेर्जनिरिति जिज्ञासमानं प्रति लाघवादनुमानविभागमुखेनैव बुबोधयिषुरनुमानं विभजते—अनुमानमिति । द्वैविध्यं दर्शयति—स्वार्थं परार्थं चेति । [3]स्वस्यार्थः प्रयोजनं यस्मात् तत् स्वार्थमिति समासः । स्वप्रयोजनं च स्वस्यानुमेयप्रतिपत्तिः । एवं परार्थमित्यस्यापि ।

अयमिति । व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम्, तच्च धूमादि, तस्य परामर्शो ज्ञानविशेष इत्यर्थः । तस्मादिति । लिङ्गपरामर्शादित्यर्थः । स्वार्थानुमानमुपसंहरति—तदेतदिति । यस्मादिदं स्वप्रतिपत्तिहेतुस्तस्मादेतत्स्वार्थानुमानमित्यर्थः ।

हिन्दी

१. व्याप्तिलक्षणका समन्वय हुआ ।

२. व्याप्तिलक्षणकी अतिव्याप्ति नहीं हुई ।

३. अनुमेय अर्थका ज्ञानरूप अपना प्रयोजन जिस अनुमानसे सिद्ध हो, वह स्वार्थानुमान है । तथा दूसरेको अनुमेयार्थज्ञानरूप प्रयोजन जिससे सिद्ध हो, वह परार्थानुमान है ।

In Public domain. Digitization Muthulakshmi Research Academy

'यत्र यत्र धूमस्तत्र तत्राग्निः' इति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते, अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानम्।

परार्थानुमानस्य किं स्वरूपम् ?—

यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुज्यते, तत्परार्थानुमानम्। यथा—पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान्स स वह्निमान्, यथा महानसम्, तथा चायम्, तस्मात्तथेति। अनेन प्रतिपादिताल्लिङ्गात्परोऽप्यग्निं प्रतिपद्यते।

पञ्चावयवाः के ?—

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमानिति प्रतिज्ञा। धूमवत्त्वादिति हेतुः। यो यो धूमवान् स स वह्निमानित्युदाहरणम्। तथा चायमित्युपनयः। तस्मात्तथेति निगमनम्।

पदकृत्यम्

क्रमप्राप्तं परार्थानुमानमाह—यत्त्विति। यत्पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानमिति सम्बन्धः। पञ्चावयवेति। अथावयवत्वं नाम द्रव्यसमवायिकारणत्वम्, प्रतिज्ञादिषु तदसम्भवात्कथमेतेऽवयवाः स्युरिति चेत्, अनुमानवाक्यैकदेशत्वात्तु अवयवा इत्युपचर्यत इति गृहाण। नन्वेमपि पञ्चावयववाक्यस्यानुमानत्वमेव न विचारसहं तस्य लिङ्गपरामर्शत्वाभावादिति चेत्, मैवम्, लिङ्गपरामर्शप्रयोजकलिङ्गप्रतिपादकत्वेनानुमानमित्युपचारमात्रत्वात्। तदुदाहरति—यथेति। तथा चायमिति। अयं च पर्वतः, तथा—वह्निव्याप्यधूमवानित्यर्थः। तस्मात्तथेति। वह्निव्याप्यधूमवत्त्वाद्वह्निमानित्यर्थः। अनेनेति। अनेन पञ्चावयववाक्येनेत्यर्थः।

ननु पञ्चावयववाक्यमित्यत्र के ते पञ्चावयवा अतस्तान्दर्शयति—प्रतिज्ञेति। प्रतिज्ञाद्यन्यतमत्वमवयवत्वम्। साध्यविशिष्टपक्षबोधकवचनं प्रतिज्ञा। पञ्चम्यन्तं तृतीयान्तं वा लिङ्गवचनं हेतुः। व्याप्तिप्रतिपादकदृष्टान्तवचनमुदाहरणम्। उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः। पक्षे साध्यस्याबाधितत्वप्रतिपादकवचनं निगमनम्। इदमेव लक्षणं हृदि निधाय प्रतिज्ञादीन्विशिष्य दर्शयति—पर्वतो वह्निमानित्यादिना।

In Public domain. Digitization Muthulakshmi Research Academy

स्वार्थानुमितिपरार्थानुमित्योः किं करणम् ?—

स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम् । तस्माल्लिङ्गपरामर्शोऽनुमानम् ।

लिङ्गं कतिविधं किञ्चान्वयव्यतिरेकिलक्षणम् ?—

लिङ्गं त्रिविधम्—अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि, यथा-वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः ।

पदकृत्यम्

लिङ्गेति । [1]ज्ञायमानं लिङ्गमनुमितिकरणमिति वृद्धोक्तं न युक्तम्, इयं यज्ञशाला वह्निमती अतीतधूमादित्यादौ लिङ्गाभावेऽप्यनुमितिदर्शनादित्यभिप्रायवांल्लिङ्गपरामर्श एव करणमित्याचष्टे—लिङ्गपरामर्श एवेति । अनुमानमुपसंहरति–तस्मादिति । अनुमितिकरणत्वादित्यर्थः । अयमेव तृतीयज्ञानमित्युच्यते । तथाहि—महानसादौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञानं तदादिमम् । पक्षे यद्धूमज्ञानं तद्द्वितीयम् । अत्रैव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयम् । इदमेव लिङ्गपरामर्श इत्युच्यते । अनुमानमिति । व्यापारवत्कारणं करणमिति मते व्याप्तिज्ञानमेवानुमानं लिङ्गपरामर्शो व्यापार इत्यवसेयम् ।

अन्वयव्यतिरेकिणो लक्षणमाह—अन्वयेति । तृतीयायाः प्रयोज्यत्वमर्थः । साध्यसाधनयोः साहचर्यमन्वयः । [2]तदभावयोः साहचर्यं व्यतिरेकः । तथा चान्वयप्रयोज्यव्याप्तिमद्व्यतिरेकप्रयोज्यव्याप्तिमदन्वयव्यतिरेकीत्यर्थः । केवलव्यतिरेकिण्यतिव्याप्तिवारणाय अन्वयेनेति । केवलान्वयिनि व्यभिचार-

हिन्दी

१. प्राचीनमतानुसार ज्ञायमानलिङ्ग अनुमितिका करण है। किन्तु नवीनोंको यह मान्य नहीं है, क्योंकि "इयं यज्ञशाला वह्निमती अतीतधूमात्" यहाँ पर धूमलिङ्गके वर्तमान न होनेपर भी अनुमिति होती है। अतः लिङ्गपरामर्श ही अनुमितिका करण है। प्रकृत अनुमितिमें धूम न होने पर भी उसका ज्ञान तो है ही।

२. साध्याभाव और हेत्वभावका जो साहचर्य है, उसे व्यतिरेक कहते हैं।

In Public domain. Digitization Muthulakshmi Research Academy

केवलान्वयिनः किं लक्षणम्—

अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा-घटोऽभिधेयः प्रमेयत्वात्पटवत्। अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।

पदकृत्यम्

वारणाय व्यतिरेकेणेति। तथा चान्वयव्याप्तिरुपदर्शितैव। व्यतिरेकव्याप्तिश्च [१]साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः। तदुक्तं—

व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते।
तयोरभावयोस्तस्माद्विपरीतःप्रतीयते ॥
[२]अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते।
साध्याभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः॥ इति।

केवलान्वयिनो लक्षणमाह—अन्वयेति। अन्वयेनैव व्याप्तिर्यस्मिन् स तथा। प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिं निराकरोति—अत्रेति। अभिधेयत्वसाध्यकानुमान इत्यर्थः। ननु कुतस्तन्निषेधोऽतस्तत्र हेतुमाह—सर्वस्येति। पदार्थमात्रस्येत्यर्थः। तथाच [३]सकलपदाभिधेयत्वस्येश्वरप्रमाविषयत्वस्य चात्यन्ताभावाप्रतियोगित्वरूपकेवलान्वयित्वेन तदभावाप्रसिद्ध्या तद्घटितव्यतिरेकव्याप्तिर्न सम्भवत्येवेति भावः।

हिन्दी

१. साध्य वह्नि, उसका अभाव वह्न्यभाव, उसका व्यापकीभूत अभाव धूमाभाव, उसकी प्रतियोगिता धूममें होनेसे धूममें वह्निकी व्यतिरेकव्याप्ति भी सिद्ध हो गयी।

२. अन्वयव्याप्तिमें हेतु व्याप्य होता है और साध्य व्यापक होता है। किन्तु व्यतिरेकव्याप्तिमें इसके विपरीत साध्याभाव व्याप्य होता है और हेत्वभाव व्यापक होता है।

३. घटपदाभिधेयत्व केवल घटमें है अन्यत्र नहीं है, ऐसे ही पटपदाभिधेयत्व केवल पटमें ही है, अन्यत्र उसका अत्यन्ताभाव है। किन्तु 'सर्व'पदका अभिधेयत्व सबमें होनेसे केवलान्वयी हुआ। इसी प्रकार हमारी प्रमाकी विषयता कुछ ही पदार्थोंमें है। किन्तु ईश्वरीयप्रमाविषयता सर्वत्र होनेसे अत्यन्ताभावका अप्रतियोगी वह भी हुई। इसलिये प्रमेयत्व भी केवलान्वयी हुआ। इसलिये केवलान्वयी होनेसे अभिधेयत्व और प्रमेयत्वका अभाव अप्रसिद्ध होगा। अतः अभावघटित व्यतिरेकव्याप्ति प्रमेयत्व और अभिधेयत्व में नहीं हो सकती है। इसलिये इसे केवलान्वयी कहते हैं।

In Public domain. Digitization Muthulakshmi Research Academy

केवलव्यतिरेकिणः किं लक्षणम् ?—

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा-पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्, यदितरेभ्यो न भिद्यते न तद्गन्धवत् यथा जलम्, न चेयं तथा, तस्मान्न तथेति । अत्र यद्गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात् ।

पक्षस्य किं लक्षणम् ?—

सन्दिग्धसाध्यवान् पक्षः । यथा-धूमवत्त्वे हेतौ पर्वतः ।

पदकृत्यम्

केवलव्यतिरेकिणो लक्षणमाह-व्यतिरेकेति । व्यतिरेकेणैव व्याप्तिर्यस्मिंस्तत्तथा । अन्वयव्यतिरेकिण्यतिव्याप्तिवारणाय मात्रेति । न चेयं तथेति । इयं पृथिवी, न तथा-न गन्धाभाववतीत्यर्थः । तस्मान्न तथेति । गन्धाभाववत्त्वाभावादितरभेदाभाववती नेत्यर्थः । नन्वत्र किमिति नान्वयव्याप्तिरित्याशङ्क्य परिहरति-अत्रेति । इतरभेदसाधकानुमान इत्यर्थः । इदमुपलक्षणम् । जीवच्छरीरं सात्मकं, प्राणादिमत्त्वात्, यन्नैवं तन्नैवं यथा घटः । प्रत्यक्षादिकं प्रमाणमिति व्यवहर्तव्यं, प्रमाकरणत्वात्, यन्नैवं तन्नैवं यथा प्रत्यक्षाभासः । विवादास्पदम् आकाशमिति व्यवहर्तव्यं, शब्दवत्त्वादित्यादिकमपि केवलव्यतिरेकि द्रष्टव्यम् ।

अत्रेदं बोध्यम्—[1]अन्वयव्यतिरेकि तु पञ्चरूपोपपन्नं स्वसाध्यं साधयितुं क्षमते, तानि कानि ! इति चेच्छ्रूयताम्-पक्षधर्मत्वं सपक्षसत्त्वम् विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति । अबाधितः साध्यरूपो विषयो यस्य तत्तथोक्तम्, तस्य भावस्तत्त्वम् । एवं साध्याभावसाधकं हेत्वन्तरं यस्य, स सत्प्रतिपक्ष इत्युच्यते स नास्ति यस्य सोऽसत्प्रतिपक्षः, तस्य भावस्तत्त्वमिति बोध्यम् । केवलान्वयि तु चतूरूपोपपन्नमेव स्वसाध्यं साधयितुं क्षमते, तस्य विपक्षविपर्ययेण तद्व्यावृत्तिविपर्ययात् । केवलव्यतिरेक्यपि तथा तस्य सपक्षविपर्ययेण तत्सत्त्वविपर्ययादिति, उपदर्शितरूपाणां मध्ये कतिपयरूपोपपन्नत्वात् ।

अथ पृथिवीमात्रस्य पक्षत्वादित्यत्र किं नाम पक्षतेत्यपेक्षायां तां निर्वक्ति - सन्दिग्धेति । सपक्षवारणाय सन्दिग्धेति ।

हिन्दी

१. अन्वयव्यतिरेकी हेतु पक्षसत्त्व, सपक्षसत्त्व, विपक्षव्यावृत्तत्व, अबाधितविषयत्व और असत्प्रतिपक्षत्वरूप पञ्चरूप से युक्त होकर साध्यकी सिद्धि करता है । केवलान्वयी हेतु तो चाररूपोंसे ही युक्त होकर अपने साध्यकी सिद्धि करता है । क्योंकि विपक्ष नहीं होनेसे विपक्षव्यावृत्तत्व नहीं मिल सकेगा । एवं केवलव्यतिरेकी हेतु भी चाररूपोंसे

In Public domain. Digitization Muthulakshmi Research Academy

सपक्षस्य किं लक्षणम् ?—

निश्चितसाध्यवान् सपक्षः । यथा-तत्रैव महानसम् ।

विपक्षस्य किं लक्षणम् ?—

निश्चितसाध्याभाववान् विपक्षः । यथा तत्रैव महाह्रदः ।

हेत्वाभासाः कतिविधाः ?—

सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः ।

सव्यभिचारस्य लक्षणं किं, कतिविधश्च सः—

सव्यभिचारोऽनैकान्तिकः । स स त्रिविधः—साधारणासाधारणानुपसंहारिभेदात् ।

पदकृत्यम्

निश्चितेति । पक्षेऽतिव्याप्तिवारणाय निश्चितेति । तत्रैवेति । धूमवत्त्वहेतावेवेत्यर्थः ।

निश्चितेति । सपक्षेऽतिव्याप्तिवारणाय साध्येति । पक्षेऽतिव्याप्तिवारणाय निश्चितेति । तत्रैव—धूमवत्त्व एव ।

हेतून्निरूप्य प्रसङ्गाद्धेत्वाभासानाह—सव्यभिचारेति । हेतुवदाभासन्ते इति हेत्वाभासाः । [1]तत्त्वं चानुमितितत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वम् । बाधस्थले 'वह्निरनुष्ण' इत्यनुमितिप्रतिबन्धकं यज्ज्ञानमुष्णत्ववद्वह्नावनुष्णत्वसाधकं द्रव्यत्वमित्याकारकं, तद्विषयत्वस्य विषयतासम्बन्धेन द्रव्यत्वरूपहेत्वाभासे सत्त्वाल्लक्षणसमन्वयः । सद्धेतुवारणाय यथार्थेति । घटादिवारणाय अनुमितितत्करणान्यतरप्रतिबन्धकेति । व्यभिचारिणि अव्याप्तिवारणाय तत्करणान्यतरेति ।

हिन्दी

ही युक्त होकर साध्यकी सिद्धि करता है । क्योंकि सपक्ष नहीं होनेसे सपक्षसत्त्वका अभाव रहेगा ।

१. अनुमिति और उसका करण व्याप्तिज्ञान इन दोनोंमें किसी एकका प्रतिबन्धक जो यथार्थज्ञान, अर्थात् सव्यभिचारत्व, विरुद्धत्व, सत्प्रतिपक्षत्व, असिद्धत्व और बाधितत्वका यथार्थज्ञान, इसका जो विषय सव्यभिचार आदि, वे ही हेत्वाभास हैं । जैसे, बाधस्थलमें "वह्निरनुष्णः" इस अनुमितिका प्रतिबन्धक ज्ञान होगा "उष्णे वह्नौ अनुष्णत्वसाधकं द्रव्यत्वम्" इत्याकारक, उसकी विषयता द्रव्यत्वमें है । इसलिये द्रव्यत्व हेतु नहीं है किन्तु हेत्वाभास है ।

In Public domain. Digitization Muthulakshmi Research Academy

साधारणस्य किं लक्षणम् ?—

तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः । यथा-पर्वतो वह्निमान् प्रमेयत्वादिति । (अत्र) प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।

असाधारणस्य किं लक्षणम् ?—

सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः । यथा—शब्दो नित्यः शब्दत्वादिति । (अत्र) शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति ।

अनुपसंहारिणः किं लक्षणम् ?—

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा-सर्वमनित्यं प्रमेयत्वादिति । अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति ।

विरुद्धस्य किं लक्षणम् ?—

साध्याभावव्याप्तो हेतुर्विरुद्धः । यथा-शब्दो नित्यः कृतकत्वात्

पदकृत्यम्

तत्रेति । साधारणादित्रितयमध्य इत्यर्थः । अथ [१]विरुद्धेऽतिप्रसक्तिरिति मा स्म दृप्यः, सपक्षवृत्तित्वस्यापि निवेशात् । अथैवमपि स्वरूपासिद्धे दूषणं जागर्तीति मा वह गर्वम्, पक्षवृत्तित्वस्यापि तथात्वात् ।

पक्षमात्रेति । सर्वे ये सपक्षा विपक्षास्तेभ्यो व्यावर्तत इति सपक्षविपक्षव्यावृत्तः । केवलव्यतिरेकिवारणाय तद्भिन्न इत्यपि देयम् ।

अन्वयेति । केवलान्वयिन्यतिव्याप्तिवारणाय अन्वयेति । केवलव्यतिरेकिण्यतिव्याप्तिवारणाय व्यतिरेकेति । अत्रेति । उपदर्शितानुमान इत्यर्थः ।

विरुद्धं लक्षयति—साध्येति । सद्धेतुवारणाय साध्याभावव्याप्त इति । [२]सत्प्रतिपक्षवारणाय सत्प्रतिपक्षभिन्न इत्यपि बोध्यम् । कृतकत्वादिति ।

हिन्दी

१. साध्याभाववद्वृत्तित्व विरुद्धहेतुमें भी रहता है, अतः उसमें साधारणानैकान्तिकत्वकी अतिप्रसक्ति रोकनेके लिये सपक्षवृत्तित्वका निवेश कर देना चाहिये । एवं स्वरूपासिद्धमें अतिव्याप्तिवारणके लिये पक्षवृत्तित्वका भी निवेश कर देना चाहिये । तब यों लक्षण बन गया—सपक्षवृत्तित्वे सति पक्षवृत्तित्वे सति साध्याभाववद्वृत्तित्वम् साधारणानैकान्तिकत्वम् इति ।

२. सत्प्रतिपक्ष हेतु भी साध्याभावसे व्याप्त होता है, अतः उसमें विरुद्धलक्षणकी अतिव्याप्तिके वारणार्थ 'सत्प्रतिपक्षभिन्न' ऐसा विशेषण देना चाहिये ।

In Public domain. Digitization Muthulakshmi Research Academy

घटवदिति । (अत्र) कृतकत्वं हि नित्यत्वाभावेनाऽनित्यत्वेन व्याप्तम् ।

सत्प्रतिपक्षस्य किं लक्षणम् ?—

साध्याभावसाधकं हेत्वन्तरं यस्य, स सत्प्रतिपक्षः । यथा-शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्, शब्दोऽनित्यः कार्यत्वाद् घटवत् ।

असिद्धः कतिविधः ?—

असिद्धस्त्रिविधः—आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासि-सिद्धश्चेति ।

आश्रयासिद्धः कः ?—

आश्रयासिद्धो यथा-गगनारविन्दं सुरभि, अरविन्दत्वात्, सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः, स नास्त्येव ।

स्वरूपासिद्धस्य किं रूपम् ?—

स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात् । अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वाद् ।

पदकृत्यम्

कार्यत्वादित्यर्थः । कृतकत्वमिति । अनित्यत्नेन व्याप्तमिति । यद्यत्कृतकं तत्तदनित्यमिति व्याप्तिर्भवत्येव तथेति भावः ।

सत्प्रतिपक्षं लक्षयति—साध्येति । यस्य हेतोः साध्याभावसाधकं=साध्याभावस्यानुमापकं हेत्वन्तरं=प्रतिपक्षो हेतुः विद्यते, स हेतुः सत्प्रतिपक्ष इत्यर्थः । अयमेव प्रकरणसम इत्युच्यते । विरुद्धवारणाय हेत्वन्तरं यस्येति । वह्न्यादिवारणाय साध्याभावेति ।

असिद्धं विभजते—असिद्ध इति । आश्रयासिद्धयाद्यन्यतमत्वमसिद्धत्वम् ।

आश्रयासिद्धत्वं च पक्षतावच्छेदकाभाववत्पक्षकत्वम् । भवति हि अर-विन्दत्वे गगनीयत्वरूपपक्षतावच्छेदकाभाववत्पक्षकत्वम्, अरविन्दरूपपक्षे गगनीयत्वविरहात् । ननु कथमरविन्दे गगनीयत्वविरहोऽत आह–अत्रेति । उपदर्शितानुमान इत्यर्थः ।

पक्षे हेत्वभावः स्वरूपासिद्धिः । सद्धेत्वभावेऽतिव्याप्तिवारणाय पक्षे इति । घटाद्यभाववारणाय हेत्विति । सोऽयं स्वरूपासिद्धः शुद्धासिद्धभागा-सिद्धविशेषणासिद्धविशेष्यासिद्धभेदेन चतुर्विधः । तत्राद्यस्तूपदर्शित एव ।

In Public domain. Digitization Muthulakshmi Research Academy

व्याप्तत्वासिद्धः कः किञ्चोपाधिस्वरूपम् ?—

सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । साध्यसमानाधिकरणात्यन्ताभावाप्रति-

पदकृत्यम्

द्वितीयो यथा—उद्भूतरूपादिचतुष्टयं गुणः रूपत्वादित्यत्र रूपत्वहेतोः पक्षैकदेशावृत्तित्वेन तस्य भागे स्वरूपासिद्धत्वम् । तृतीयो यथा—वायुः प्रत्यक्षः रूपवत्त्वे सति स्पर्शवत्त्वादित्यत्र रूपवत्त्वविशेषणस्य वायावभावात्तद्विशिष्टस्पर्शवत्त्वस्यापि तथात्वेन तस्य स्वरूपासिद्धत्वं निर्वहति, विशेषणाभावे विशिष्टस्याप्यभावात् । तुरीयो [1]यथा—अत्रैव विशेषणविशेष्यवैपरीत्येन हेतुः । तस्य स्वरूपासिद्धत्वं तु विशेष्याभावप्रयुक्तविशिष्टाभावादिति बोध्यम् ।

व्याप्यत्वासिद्धं निरूपयति—सोपाधिक इति । ननु कोऽयमुपाधिरत आह—साध्येति । [2]साधनाव्यापक उपाधिरित्युक्ते शब्दोऽनित्यः कृतकत्वादित्यत्र सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्रहणार्हत्वमप्युपाधिः स्यात्तदर्थं साध्यव्यापकत्वमुक्तम् । [3]तावत्युक्ते सामान्यवत्त्वादिनाऽनित्यत्वसाधने कृतकत्वमुपाधिः स्यात्तदर्थं साधनाव्यापकत्वम् । [4]उपाधिभेदमादायासम्भव-

हिन्दी

१. "वायुः प्रत्यक्षः स्पर्शवत्त्वे सति रूपवत्त्वात्" यहाँका हेतु विशेष्यासिद्ध नामक चतुर्थ स्वरूपासिद्ध है । क्योंकि यहाँ रूपवत्त्वरूपविशेष्याभावप्रयुक्त विशिष्टाभाव है ।

२. उपाधिके लक्षणमें यदि केवल साधनाव्यापकत्व कहा जाय, साध्यव्यापकत्वका निवेश न हो तो "शब्दोऽनित्यः कृतकत्वात्" इस सद्धेतुस्थलमें "सामान्यवत्त्वे सति अस्मदादिबाह्येन्द्रियग्रहणविषयत्व" भी उपाधि हो जायगा । इसे वारण करनेके लिए "साध्यव्यापकत्व" कहा । यहाँ अनित्यत्वरूपसाध्य अस्मदादिके ज्ञान-सुखादिमें है, किन्तु उसमें हमारी बाह्येन्द्रियद्वारा ग्रहणकी विषयता नहीं है । अतः साध्यव्यापक नहीं होनेसे इस सद्धेतुस्थलमें उक्त उपाधि नहीं होगा ।

३. यदि 'साधनाव्यापकत्व' पद न दिया जाय तो "गमनादि कर्म अनित्यं सामान्यवत्त्वे सति बाह्येन्द्रियग्रहणार्हत्वात्" इस सद्धेतुक अनुमानमें भी कृतकत्व उपाधि होने लगेगा । उक्त पद देनेपर दोष नहीं हुआ । क्योंकि कृतकत्व यद्यपि अनित्यत्वरूप साध्यका व्यापक है, तथापि उक्त साधनका अव्यापक नहीं है किन्तु व्यापक ही है ।

४. उपाधिके अन्तर्गत व्यापकत्वके स्वरूपमें अत्यन्ताभाव न कहा जाय तो 'पर्वतो धूमवान् वह्नेः' इत्यादिमें आर्द्रेन्धनसंयोग आदि कोई भी उपाधि नहीं हो सकेगा, अर्थात् सर्वत्र उपाधिलक्षणका असंभव हो जायगा । क्योंकि जहाँ जहाँ साध्य होगा वहाँ उपा-

In Public domain. Digitization Muthulakshmi Research Academy

योगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्। पर्वतो धूमवान् वह्निमत्त्वादित्यत्रार्द्रेन्धनसंयोग उपाधिः । यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र

पदकृत्यम्

वारणाय व्यापकत्वशरीरेऽप्यत्यन्तपदमादेयम् । साधनभेदमादाय साधनस्योपाधित्ववारणायाव्यापकत्वशरीरेऽप्यत्यन्तपदमवश्यं देयम् ।

सोऽयमुपाधिस्त्रिविधः—केवलसाध्यव्यापकः पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकश्चेति । तत्राद्य उपदर्शितः । एवं क्रत्वन्तर्वर्तिनी हिंसा अधर्मजनिका हिंसात्वात् क्रतुबाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः । तस्य यत्राधर्मजनकत्वं तत्र निषिद्धत्वमिति साध्यव्यापकता । यत्र हिंसात्वं तत्र न निषिद्धत्वमिति निषिद्धत्वमुपाधिः साधनाव्यापकः, क्रतुहिंसायां निषिद्धत्वस्याभावात् । 'न हिंस्यात्सर्वाणि (सर्वा) भूतानि' इति सामान्यवाक्यतः 'पशुना यजेत' इत्यादिविशेषवाक्यस्य बलीयस्त्वात् । अतो हिंसात्वं नाधर्मजनकत्वे प्रयोजकमपि तु निषिद्धत्वमेवेत्यादिकमपि द्रष्टव्यम् ।

द्वितीयो यथा—वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वमुपाधिः । तस्य यत्र प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति न केवलसाध्यव्यापकत्वं, रूपे व्यभिचारात्, किन्तु द्रव्यत्वरूपो यः पक्षधर्मस्तदवच्छिन्नबहिःप्रत्यक्षत्वं यत्र, तत्रोद्भूतरूपवत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव ।

हिन्दी

धिका भेद रह जानेसे वह उपाधि साध्यसमानाधिकरणभेदका प्रतियोगी ही हो जायगा और वह साध्यव्यापक नहीं हो सकेगा । अतः व्यापकत्वशरीरमें अत्यन्ताभावका निवेश आवश्यक है । ऐसे ही "साधनाव्यापकत्वम्" यहाँ भी अव्यापकत्वस्वरूपमें केवल अभाव न कहकर अत्यन्ताभावका निवेश आवश्यक है । अन्यथा "पर्वतो धूमवान् वह्नेः" इत्यादि स्थलमें सर्वत्र साधन ही उपाधि बन जायगा । क्योंकि वह्निहेतु धूमरूप-साध्यका व्यापक भी है और वह्न्यधिकरणमें वह्निका अत्यन्ताभाव न होनेपर भी वह्निका भेद तो रहेगा ही । अतः वह्निसमानाधिकरणभेदकी प्रतियोगिता वह्निमें होनेसे स्वयं वह्नि ही वह्निका अव्यापक भी हो जायगा । इस प्रकार सर्वत्र सोपाधिक स्थलमें साधन ही उपाधि होने लगेगा । जो असंगत है । असंगत इसलिए है कि उपाधिके व्यभिचारसे हेतुमें साध्यके व्यभिचारका अनुमान कराना उपाधिका प्रयोजन है, वह नहीं हो सकेगा । क्योंकि यदि हेतु ही उपाधि हो तो उसीका व्यभिचारी वही नहीं होता है, अतः वह साध्यके व्यभिचारका अनुमान कैसे करा सकेगा ?

In Public domain. Digitization Muthulakshmi Research Academy

वह्निस्तत्रार्द्रेन्धनसंयोगो नास्ति अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकता। एवं सध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम्।

बाधितस्य किं लक्षणम्?—

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः। यथा—वह्निरनुष्णो द्रव्यत्वादिति। अत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम्।

। इत्यनुमानपरिच्छेदः।

पदकृत्यम्

आत्मनि व्यभिचारवारणाय 'बहिः' पदम्। यत्र प्रत्यक्षस्पर्शाश्रयत्वं तत्र नोद्भूतरूपवत्त्वमिति साधनाव्यापकत्वं च, वायावुद्भूतरूपविरहात्।

तृतीयो यथा—ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वमुपाधिः। तस्य यत्र विनाशित्वं तत्र भावत्वमिति न केवलसाध्यव्यापकत्वम्, प्रागभावे भावत्वविरहात्, किन्तु जन्यत्वरूपसाधनावच्छिन्नविनाशित्वं यत्र, तत्र भावत्वमिति साधनावच्छिन्नसाध्यव्यापकत्वमेव। यत्र जन्यत्वं तत्र न भावत्वमिति साधनाव्यापकत्वञ्च, ध्वंसे भावत्वविरहात्। एवं स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजन्यत्वमुपाधिः। श्यामत्वस्य नीलघटेऽपि सत्त्वान्न केवलसाध्यव्यापकत्वम्, किन्तु साधनावच्छिन्नसाध्यव्यापकत्वमेव। अष्टमे पुत्रे शाकपाकजन्यत्वविरहेण साधनाव्यापकत्वं चेत्यादिकमपि द्रष्टव्यम्।

यस्येति। [1]सद्धेतुवारणाय प्रमाणान्तरेणेति। घटादिवारणाय साध्येति।

। इति पदकृत्येऽनुमानपरिच्छेदः।

हिन्दी

१. भ्रमात्मक साध्याभावके निश्चयको लेकर सद्धेतु भी बाधित न हो जाय इसके लिए प्रमाणान्तरका निवेश किया। उदासीन घटादिके अभावनिश्चयसे सद्धेतु भी बाधित न हो जाय, इसके लिए साध्यपद दिया। अर्थात् साध्याभावनिश्चयसे ही हेतु बाधित होता है।

। इति श्रीकेदारनाथत्रिपाठिकृतायां तर्कसंग्रहपदकृत्यहिन्दीटिप्पण्यामनुमानपरिच्छेदः।

In Public domain. Digitization Muthulakshmi Research Academy

अथोपमानपरिच्छेदः

उपमानलक्षणं किम् ?—

उपमितिकरणमुपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः, तत्करणं सादृश्यज्ञानम् । तथाहि—कश्चिद् गवयपदार्थमजानन् कुतश्चिदारण्यकपुरुषात् 'गोसदृशो गवय' इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति, तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते ।

। इत्युपमानपरिच्छेदः ।

पदकृत्यम्

अवसरसङ्गतिमभिप्रेत्यानुमानानन्तरमुपमानं निरूपयति—उपमितीति। उपमितेः करणमुपमानमित्यर्थः । कुठारादिवारणाय[1] मितीति । प्रत्यक्षादिवारणाय उपेति । संज्ञासंज्ञीति । अनुमित्यादिवारणाय सम्बन्धेति । संयोगादिवारणाय संज्ञासंज्ञीति । असौ गवयशब्दवाच्य इति [2]अभिप्रेतो गवयो गवयपदवाच्य इत्यर्थः । तेन गवयान्तरे शक्तिग्रहाभावप्रसङ्ग इति दूषणमपास्तम् । तथा च गोसादृश्यविशिष्टपिण्डज्ञानं करणम् । [3]अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः । उपमितिः फलमिति सारम् ।

तच्चोपमानं त्रिविधं—सादृश्यविशिष्टपिण्डज्ञानमसाधारणधर्मविशिष्टपिण्डज्ञानं वैधर्म्यविशिष्टपिण्डज्ञानं च । तत्राद्यमुक्तमेव । द्वितीयं यथा—[4]खड्गमृगः कीदृगिति पृष्टे नासिकालसदेकशृङ्गोऽनतिक्रान्तगजाकृतिश्चेति तज्ज्ञातृभ्यः श्रुत्वा कालान्तरे तादृशं पिण्डं पश्यन्नतिदेशवाक्यार्थं स्मरति, तदनन्तरं खड्गमृगः खड्गपदवाच्य इत्युपमितिरुत्पद्यते । अत्र नासिकालसदेकशृङ्ग एवासाधारणधर्मः । तृतीयं यथा—उष्ट्रः कीदृगिति पृष्टे अश्वादिवन्न समानपृष्ठो न ह्रस्वग्रीवशरीरश्चेति आप्तोक्ते कालान्तरे तत्पिण्डज्ञानं, ततोऽतिदेशवाक्यार्थस्मरणं, तत उष्ट्र उष्ट्रपदवाच्य इत्युपमितिरुत्पद्यते ।

। इति पदकृत्ये उपमानपरिच्छेदः ।

हिन्दी

१. उपमानलक्षमें ज्ञानार्थक 'मिति'पद न हो तो छिदादिक्रियाके करण कुठारादिमें अतिव्याप्ति होने लगेगी । एवं 'उप' यह उपसर्गपद न दिया जाय तो मिति=ज्ञानके करण प्रत्यक्ष-अनुमान और शब्द प्रमाणोंमें उपमानलक्षणकी अतिव्याप्ति होने लगेगी ।

२. 'असौ' पदसे गवयसामान्य अभिप्रेत है । अर्थात् गवयमात्रमें गवयपदवाच्यताका ग्रह होनेसे गवयान्तरमें शक्तिग्रह नहीं हो सकेगा, यह दूषण नहीं आ सकता है ।

३. "गोसदृशो गवयो भवति" यही अतिदेश वाक्य है ।

४. खड्गमृगः=गैंडा ।

। इति तर्कसंग्रहपदकृत्यहिन्दीटिपण्यामुपमानपरिच्छेदः ।

In Public domain. Digitization Muthulakshmi Research Academy

अथ शब्दपरिच्छेदः

शब्दप्रमाणस्य किं स्वरूपम् ?—

आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः, यथा-गामानयेति। शक्तं पदम्। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः।

पदकृत्यम्

अवसरसङ्गतिमभिप्रेत्योपमानानन्तरं शब्दं निरूपयति—आप्तेति। शब्द इति। शब्दप्रमाणमित्यर्थः। भ्रान्तविप्रलम्भकयोर्वाक्यस्य शब्दप्रमाणत्व-वारणाय आप्तेति। ननु कोऽयमाप्त इत्यत आह—आप्तस्त्विवति। यथार्थ-वक्ता=यथाभूताबाधितार्थोपदेष्टा। वाक्यं लक्षयति—वाक्यमिति। घटादि-समूहवारणाय पदेति। शक्तमिति। निरूपक[1]तासम्बन्धेन शक्तिविशिष्ट-मित्यर्थः। अस्मादिति। घटपदाद्घटरूपोऽर्थो बोद्धव्य इतीश्वरेच्छैव शक्ति-रित्यर्थः। [2]अर्थस्मृत्यनुकूलपदार्थसम्बन्धत्वं तल्लक्षणम्। शक्तिरिव लक्षणापि पदवृत्तिः।

अथ केयं लक्षणा ? शक्यसम्बन्धो लक्षणा। सा च त्रिधा—[3]जहत्-अजहत्-जहदजहद्भेदात्। वर्तते च गङ्गायां घोष इत्यत्र गङ्गापद-

हिन्दी

१. "अस्मात् पदादयमर्थो बोद्धव्यः" इस सङ्केतके अनुसार ईश्वरेच्छानिरूपित-पदजन्यबोधविषयतारूपा शक्ति स्वरूपसम्बन्धसे अर्थमें रहती है, किन्तु वही शक्ति (उक्त विषयता) परम्परया निरूपकतासम्बन्धसे पदमें रहती है। इसी अभिप्रायसे "शक्तम्" का अर्थ निरूपकतासम्बन्धसे 'शक्तिविशिष्टम्" ऐसा किया।

२. शाब्दबोधमें उपयोगी पदार्थस्मृति होती है और पदार्थस्मृतिके अनुकूल जो पद और अर्थका सम्बन्ध है, वही शक्ति और लक्षणारूप पदवृत्ति है। क्योंकि शक्तिके समान लक्षणा भी पदवृत्ति है।

३. जहल्लक्षणाका उदाहरण—"गङ्गायां घोषः" है। क्योंकि यहाँ पूर्णरूपसे शक्यार्थ-प्रवाहका परित्याग हो जाता है और तीरका बोध होता है।

अजहल्लक्षणाका उदाहरण है—"छत्राणि यान्ति"। क्योंकि छत्रशब्दसे छत्रसहित छत्रधारी व्यक्तियोंका बोध होता है।

जहदजहल्लक्षणाका उदाहरण है—"सोऽयमश्वः"। यहाँ "सः" पदका शक्यार्थ है—तद्देशवृत्तित्वविशिष्ट अश्वव्यक्ति। इसमें तद्देशवृत्तित्वांशका परित्याग कर तथा व्यक्त्यंशका अपरित्याग कर एतद्देशवृत्ति अश्वका बोध होता है। "तत्त्वमसि" यह यह महावाक्य भी इसका उदाहरण है।

In Public domain. Digitization Muthulakshmi Research Academy

वाक्यार्थज्ञाने के हेतवः ?—

आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः।

पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा। अर्थाबाधो योग्यता। पदानामविलम्बेनोच्चारणं सन्निधिः। तथा च आकाङ्क्षादिरहितं वाक्यमप्रमाणम्। यथा-गौरश्वः पुरुषो

पदकृत्यम्

शक्यप्रवाहसम्बन्धस्तीरे। लक्षणाबीजं च तात्पर्यानुपपत्तिः। अतएव प्रवाहे घोषतात्पर्यानुपपत्तेस्तीरे लक्षणा सेत्स्यति। छत्राणि यान्तीत्यादौ द्वितीया। सोऽयमश्व इत्यादौ तृतीया।

[1]असम्भववारणाय पदान्तरव्यतिरेकप्रयुक्तेति। पुनरसम्भववारणाय पदान्तरेति। अर्थेति। [2]आकाङ्क्षावारणाय अर्थेति। पदानामिति। असहोच्चारितेष्वतिव्याप्तिवारणाय अविलम्बेनेति। [3]आकाङ्क्षावारणाय पदानामिति। आकाङ्क्षादिशून्यवाक्यस्यात्र प्रमाणत्वं निषेधति—तथा चेति। आकाङ्क्षादिकं शाब्दहेतुरित्युक्ते चेत्यर्थः। अनाकाङ्क्षाद्युदाहरणं दर्शयति—यथेति।

हिन्दी

१. एक पदद्वारा दूसरे पदके अभावके कारण अन्वयबोध न करा सकना आकाङ्क्षा है। जैसे, 'गौः' पद 'गच्छति'—पदके बिना तथा 'गच्छति' पद 'गौः' पदके बिना शाब्दबोध नहीं कराता है, अतः इन दोनोंमें परस्पर आकाङ्क्षा है। आकाङ्क्षाके लक्षणमें "पदान्तरव्यतिरेकप्रयुक्त" यह अंश न दिया जाय तो लक्षणका असंभव हो जायगा। क्योंकि पदान्तरका सहयोग पाकर सभी पद अन्वयके अनुभावक ही होते हैं अननुभावक नहीं होते। अतः उक्त अंश देना आवश्यक है। एवं व्यतिरेकप्रयुक्त"" इत्यादि कहा जाय किन्तु "पदान्तर" यह अंश न दिया जाय तो भी असंभव-दोष होगा। क्योंकि पदान्तरका सहयोग रहनेपर भी किसी न किसी वस्तुका व्यतिरेक रहता ही है, ऐसी स्थितिमें भी वह पद अनुभावक ही होता है, अननुभावक नहीं। इसप्रकार अननुभावकत्व नहीं होनेसे असंभव हो जायगा। अतः "पदान्तर" इस पदका भी निवेश आवश्यक है।

२. अर्थपद न दिया जाय तो किसके अबाधको योग्यता कहेंगे? अतः ऐसी आकाङ्क्षाके निवारणके लिये अर्थपद दिया।

३ पूर्ववत् आकाङ्क्षानिवृत्तिके लिये 'पदानाम्' ऐसा कहा। अन्यथा किसका अविलम्बेन उच्चारण विवक्षित है? ऐसी आकाङ्क्षा बनी ही रह जायगी।

। इति श्रीकेदारनाथत्रिपाठिकृतायां तर्कसंग्रहपदकृत्यहिन्दीटिप्पण्यां शब्दपरिच्छेदः।

In Public domain. Digitization Muthulakshmi Research Academy

हस्तीति न प्रमाणम्—आकाङ्क्षाविरहात्। वह्निना सिञ्चतीति न प्रमाणम्—योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणम्—सान्निध्याभावात्।

वाक्यं कतिविधम् ?—

वाक्यं द्विविधम्—वैदिकं लौकिकं च। वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्।

शाब्दज्ञानं किम् ?—

वाक्यार्थज्ञानं शाब्दज्ञानम्। तत्करणं तु शब्दः।

। इति शब्दपरिच्छेदः।

पदकृत्यम्

नन्वेतावता शाब्दसामग्री प्रपञ्चिता। प्रमाविभाजकवाक्ये शाब्दस्याप्युद्दिष्टत्वेन तत्फलं न प्रदर्शितमित्यत आह—वाक्यार्थेति। शाब्दत्वं च शब्दात्प्रत्येमीत्यनुभवसिद्धा जातिः। शाब्दबोधक्रमो यथा—चैत्रो ग्रामं गच्छतीत्यत्र ग्रामकर्मकगमनानुकूलवर्तमानकृतिमांश्चैत्र इति शाब्दबोधः। द्वितीयायाः कर्मत्वमर्थः, धातोर्गमनम्। अनुकूलत्वं च संसर्गमर्यादया भासते। लटो वर्तमानत्वम्, आख्यातस्य कृतिः। तत्सम्बन्धः संसर्गमर्यादया भासते। रथो गच्छतीत्यत्र गमनानुकूलव्यापारवान् रथः इति शाब्दबोधः। स्नात्वा गच्छतीत्यत्र गमनप्रागभावावच्छिन्नकालीनस्नानकर्ता गमनानुकूलवर्तमानकृतिमानिति शाब्दबोधः। क्त्वाप्रत्ययस्य कर्ता पूर्वकालीनत्वं चार्थः। एवमन्यत्रापि वाक्यार्थो बोध्यः।

। इति पदकृत्ये शब्दपरिच्छेदः।

In Public domain. Digitization Muthulakshmi Research Academy

अथावशिष्टपरिच्छेदः

अयथार्थानुभवस्य कति भेदाः ?—

अयथार्थानुभवस्त्रिविधः—संशयविपर्ययतर्कभेदात् ।

संशयस्य किं लक्षणम् ?—

एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्टयावगाहिज्ञानं संशयः। यथा—स्थाणुर्वा पुरुषो वेति ।

विपर्ययः कः ?—

मिथ्याज्ञानं विपर्ययः । यथा—'शुक्तौ रजतम्' इति ।

तर्कस्य किं स्वरूपम् ?—

व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा—यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति ।

पदकृत्यम्

अयथार्थानुभवं विभजते—अयथार्थेति ।

संशयं लक्षयति–एकस्मिन्निति । एकस्मिन्धर्मिणि=एकस्मिन्नेव पुरोवर्तिनि पदार्थे, विरुद्धाः=व्यधिकरणा ये नानाधर्माः स्थाणुत्वपुरुषत्वादयस्तेषां वैशिष्टयं सम्बन्धः, तदवगाहि ज्ञानं संशय इत्यर्थः । घटपटाविति समूहालम्बनज्ञानस्य घटत्वपटत्वरूपविरुद्धनानाधर्मवैशिष्टयावगाहित्वादतिप्रसक्तिवारणाय एकस्मिन्निति । घटः पृथिवीति ज्ञानस्यैकस्मिन्धर्मिणि घटे घटत्वपृथिवीत्वरूपनानाधर्मवैशिष्टयावगाहित्वादतिप्रसङ्गवारणाय विरुद्धेति । पटत्वविरुद्धघटत्ववान् घट इति ज्ञानेऽतिप्रसक्तिवारणाय नानेति ।

मिथ्येति । यथार्थज्ञानवारणाय मिथ्येति । [1]अयथार्थवारणाय ज्ञानेति ।

तर्कं लक्षयति—व्याप्यारोपेणेति । [2]असम्भववारणाय व्याप्यारोपेणेति ।

हिन्दी

१. मिथ्या भुजङ्गादिमें विपर्ययत्वका वारण करनेके लिये ज्ञानपद दिया । रज्जुसर्प मिथ्या तो है किन्तु वह ज्ञान नहीं है इसलिये उसका वारण हो गया ।

२. व्याप्यके अतिरिक्त किसी अन्यके आरोपसे व्यापकारोप असंभव होनेसे लक्षणका असंभव हो जायगा । इसलिये असंभवदोष वारणके लिये "व्याप्यारोपेण" यह कहा । अथवा व्याप्यारोपात्मक निमित्तके विना भी व्यापकारोप असंभव है, इसलिये "व्याप्यारोपेण" यह निमित्तसूचक तृतीयान्त पद दिया ।

In Public domain. Digitization Muthulakshmi Research Academy

स्मृतिः कतिविधा ?—

स्मृतिरपि द्विविधा—यथार्था अयथार्था च । प्रमाजन्या यथार्था, अप्रमाजन्या अयथार्था ।

सुखस्य किं लक्षणम् ?—

सर्वेषामनुकूलवेदनीयं सुखम् ।

दुःखस्य किं लक्षणम् ?—

प्रतिकूलवेदनीयं दुःखम् ।

इच्छाद्वेषप्रयत्नानां कानि लक्षणानि ?

इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः ।

पदकृत्यम्

[1]पुनरसम्भववारणाय व्यापकारोप इति । अत्र वह्न्यभावो व्याप्यः धूमाभावो व्यापकः । [2]यद्यपि तर्कस्य विपर्ययात्मकत्वेन पृथग्विभागोऽनुचितः, तथापि प्रमाणानुग्राहकत्वात् स उदित इति बोध्यम् । स्वप्नस्तु पुरीतद्वहिर्देशान्तर्देशयोः सन्धौ इडानाड्यां वा मनसि स्थितेऽदृष्टविशेषेण धातुदोषेण वा जन्यते । स च मानसविपर्ययान्तर्गतः ।

सुखं निरूपयति–सर्वेषामिति । सर्वात्मनामनुकूलमिति वेद्यं यत्तत्सुखमित्यर्थः ।

अहम् सुखीत्यनुभवसिद्धसुखत्वजातिमत्, [3]धर्ममात्रासाधारणकारणो गुणो वा सुखम् । शत्रुदुःखवारणाय सर्वेषामिति ।

प्रतिकूलेति । दुःखत्वजातिमत्, अधर्ममात्रासाधारणकारणो गुणो वा दुःखम् पदकृत्यं पूर्ववत् ।

इच्छां निरूपयति–इच्छेति । काम इति पर्यायः । इच्छात्वजातिमती इच्छा । सा द्विविधा–फलेच्छा उपायेच्छा च । फलं सुखादिकं । उपायो

हिन्दी

१. व्याप्यारोपसे व्यापकारोपके सिवा और कुछ होता ही नहीं, अतः किसी अन्यके अभिप्रायसे किया गया लक्षण असंभवदोषग्रस्त होगा, इसके वारणके लिये व्यापकारोपपद दिया ।

२. यद्यपि तर्क भी अवास्तव होनेसे विपर्यय ही है, अतः इसका पृथग् विभाग करना अनुचित है, तथापि अन्य विपर्यय प्रमाणके अनुग्राहक नहीं होते किन्तु तर्क तो प्रमाणका पोषक होता है । इसी विशेषताके कारण इसे पृथक् कहा ।

३. धर्ममात्र है असाधारण कारण जिसका ऐसा बहुव्रीहि समास हैं ।

In Public domain. Digitization Muthulakshmi Research Academy

धर्मस्य अधर्मस्य च किं लक्षणम् ?—

विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः ।

आत्ममात्रविशेषगुणाः के ?—

बुद्धयादयोऽष्टावात्ममात्रविशेषगुणाः । बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च । नित्या ईश्वरस्य, अनित्या जीवस्य ।

संस्कारः कतिविधः, तद्भेदाश्च किंस्वरूपाः ?—

संस्कारस्त्रिविधः—वेगो भावना स्थितिस्थापकश्चेति । वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावना,

---

पदकृत्यम्

यागादिः । द्वेषं निरूपयति–क्रोध इति । द्वेष्टीत्यनुभवसिद्धद्वेषत्वजातिमान् द्विष्टसाधनताज्ञानजन्यगुणो वा द्वेषः । प्रयत्नम् निरूपयति-कृतिरिति । प्रयत्नत्वजातिमान् प्रयत्नः । स त्रिविधः-प्रवृत्तिनिवृत्तिजीवनयोनिभेदात् । इच्छाजन्यो गुणः प्रवृत्तिः । द्वेषजन्यो गुणो निवृत्तिः । जीवनादृष्टजन्यो गुणो जीवनयोनिः । स च प्राणसंचारकारणम् ।

धर्ममाह - विहितेति । वेदविहितेत्यर्थः । अधर्मवारणाय वेदविहितेति । यागादिक्रियावारणाय कर्मजन्य इति । कर्मनाशाजलस्पर्शकीर्तनकीर्तनभोग-तत्त्वज्ञानादिना नश्यति । अधर्मलक्षणमाह निषिद्धेति । वेदेनेत्यर्थः । धर्मवारणाय वेदनिषिद्धेति ! वेदनिषिद्धक्रियावारणाय कर्मजन्य इति । स च भोग-प्रायश्चित्तादिना नश्यति । एतावेव अदृष्टमिति कथ्येते वासनाजन्यौ च । वासना च विलक्षणसंस्कारः ।

संस्कारं विभजते—संस्कार इति । [२]सामान्यगुणात्मविशेषगुणोभयवृत्ति-गुणत्वव्याप्यजातिमान् संस्कारः । [३]घटादिवारणाय गुणत्वव्याप्येति । [४]सयो-

हिन्दी

१. किसी वस्तुके सम्बन्धमें "इदं द्विष्टसाधनम्" इस ज्ञानसे उत्पन्न होने वाला जो गुण वह द्वेष है ।

२. सामान्यगुण वेग और स्थितिस्थापक तथा आत्माका विशेषगुण संस्कार, इनमें रहने वाली गुणत्वव्याप्या जाति संस्कारत्वजाति जिसमें रहे, वह संस्कार है ।

३. केवल जातिमान् लक्षण करनेपर घटत्वजातिमान् घटमें अतिव्याप्ति होगी, उसका वारण करनेके लिये गुणत्वव्याप्यपर्यन्त निवेश किया ।

४. "सामान्यगुणवृत्तिगुणत्वव्याप्यजातिमान् संस्कारः" ऐसा लक्षण करनेपर संयोगत्वजातिको लेकर संयोगमें अतिव्याप्ति हो जायगी । इसके वारणार्थ 'आत्म-विशेषगुणोभयवृत्ति' पद दिया ।

In Public domain. Digitization Muthulakshmi Research Academy

आत्ममात्रवृत्तिः । अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः, कटादिपृथिवीवृत्तिः । इति गुणाः ।

पदकृत्यम्

गादिवारणाय आत्मविशेषगुणोभयवृत्तीति । [1]ज्ञानादिवारणाय सामान्येति । द्वितीयादिपतनासमवायिकारणं वेगः । [2]रूपादिवारणाय द्वितीयादिपतनेति । कालादिवारणाय असमवायीति ।

भावनां लक्षयति–अनुभवेति । आत्मादिवारणाय प्रथमदलम् । अनुभवध्वंसवारणाय द्वितीयदलम् ।

स्थितिस्थापकमाह–अन्यथेति । पृथिवीमात्रसमवेतसंस्कारत्वव्याप्येति । भावनात्वमादाय भावनावारणाय पृथवीसमवेतेति । [3]स्थितिस्थापकरूपान्यतरत्वमादाय रूपवारणाय जातीति ।

इति गुणा इति । द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः । द्रव्यकर्मणोरतिव्याप्तिवारणाय विशेषणदलम् । सामान्यादावतिव्याप्तिवारणाय विशेष्यदलम् इति गुणाः ।

हिन्दी

१. सामान्यपद न दिया जाय तो आत्मविशेषगुणवृत्ति ज्ञानत्वजातिको लेकर ज्ञानमें अतिव्याप्ति हो जायगी । इसके निवारणार्थ सामान्यपद दिया । क्योंकि सामान्यगुण और आत्माका विशेषगुण दोनोंमें रहनेवाली एकमात्र संस्कारत्व ही जाति है, ज्ञानत्व आदि नहीं ।

२ केवल असमवायिकारण रूपादि भी है, उसके वारणके लिये "द्वितीयादिपतन" इतनेका निवेश किया ।

३. स्थितिस्थापकका लक्षण है—पृथिवीमात्रमें समवायसम्बन्धसे रहता हुआ संस्कारत्वव्याप्यजाति (स्थितिस्थापकत्व) मान् जो हो, उसे स्थितिस्थापक संस्कार कहते हैं । इस लक्षणमें "संस्कारत्वव्याप्य" न कहा जाय तो गन्धमें अतिव्यापित हो जायगी । क्योंकि गन्ध पृथिवीमात्रमें समवेत भी है और गन्धत्वजातिमान् भी हैं । उक्त विशेषण देनेसे अतिव्याप्ति नहीं हुई । क्योंकि गन्धत्वजाति संस्कारत्वव्याप्य नहीं है । आत्मामें समवेत भावनामें अतिव्याप्तिवारणार्थ 'पृथिवीसमवेत' पद दिया । एवं स्थितिस्थापक तथा रूपगत अन्यतरत्वधर्म भी संस्कारत्वव्याप्य है, अतः अन्यतरत्वधर्मवाले रूपमें भी स्थितिस्थापकका लक्षण चला जायगा, अतः इसे वारण करनेके लिये जाति पद दिया । यहाँ अन्यतरत्व जाति नहीं है । यहाँ व्याप्यत्वका अभिप्रेत अर्थ है—न्यूनवृत्तित्व । क्योंकि अतिरिक्तवृत्तित्वरूप संस्कारत्वव्याप्यत्व उक्त

In Public domain. Digitization Muthulakshmi Research Academy

अथ कर्मादिलक्षणप्रकरणम्—

कर्मणः किं लक्षणम् ?—

चलनात्मकं कर्म । ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम् । अधोदेशसंयोगहेतुरपक्षेपणम् । शरीरस्य सन्निकृष्टसंयोगहेतुराकुञ्चनम् । विप्रकृष्टसंयोगहेतुः प्रसारणम् । अन्यत्सर्वं गमनम् ।

सामान्यस्य किं लक्षणम् ?—

नित्यमेकमनेकानुगतं सामान्यम् । द्रव्यगुणकर्मवृत्ति । परं सत्ता, अपरं द्रव्यत्वादि ।

विशेषाणां किं लक्षणम् ?—

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ।

पदकृत्यम्

चलनेति । संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म । [1]हस्त-पुस्तकसंयोगवारणाय सत्यन्तम् । घटादिवारणाय विशेष्यदलम् । ऊर्ध्वेति । अपक्षेपणवारणाय ऊर्ध्वेति । कालादिवारणाय असाधारणेत्यपि बोध्यम् । अधोदेशेति । उत्क्षेपणवारणाय अधोदेशेति । कालादिवारणाय असाधारणेत्यपि देयम् । शरीरेति । प्रसारणादिवारणाय सन्निकृष्टेति । कालादिवारणाय असाधारणपदमप्यावश्यकम् ।

नित्यमिति । संयोगादिवारणाय नित्यमिति । कालादिपरिमाणवारणाय अनेकेति । अनेकानुगतत्वम् च समवायेन बोध्यम्, तेन नात्यन्ताभावेऽतिव्याप्तिः ।

नित्यद्रव्यवृत्तय इति । घटत्वादिवारणाय नित्यद्रव्यवृत्तय इति । [2]आत्मत्वमनस्त्ववारणाय आत्मत्वमनस्त्वभिन्ना इत्यपि बोध्यम् ।

हिन्दी

अन्यतरत्वमें नहीं जायगा । कारण, संस्कारत्वसे शून्य रूपमें रहनेवाला अन्यतरत्वधर्म अतिरिक्तवृत्ति होनेसे व्याप्य नही वन सकेगा तथा इसे लेकर अतिव्याप्ति देना असंगत हो जायगा ।

१. हस्तपुस्तकसंयोग भी शरीरपुस्तकसंयोगके प्रति असमवायिकारण है । इसमें कर्मलक्षण न जाय, इसके लिये 'संयोगभिन्नत्वे सति' विशेषण दिया ।

२. आत्मत्व-मनस्त्व भी नित्यद्रव्यवृत्ति हैं, अतः इनमें विशेषका लक्षण न जाय, इसलिये "आत्मत्व-मनस्त्वभिन्नाः" यह भी विशेषके लक्षणमें जोड़ देना चाहिये ।

In Public domain. Digitization Muthulakshmi Research Academy

समवायस्य किं लक्षणम् ?—

नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथा-अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति।

प्रागभावस्य किं लक्षणम् ?—

अनादिः सान्तः प्रागभावः, उत्पत्तेः पूर्वं कार्यस्य।

प्रध्वंसस्य किं लक्षणम् ?—

सादिरनन्तः प्रध्वंसः, उत्पत्त्यनन्तरं कार्यस्य।

अत्यन्ताभावस्य किं लक्षणम् ?—

त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। यथा-भूतले घटो नास्तीति।

पदकृत्यम्

नित्येति। आकाशादिवारणाय सम्बन्ध इति। संयोगवारणाय नित्येति। स्वरूपसम्बन्धवारणाय तद्भिन्न इत्यपि बोध्यम्।

प्रागभावं लक्षयति—अनादिरिति। घटादिवारणाय प्रथमदलम्। परमाणुवारणाय द्वितीयदलम्। पुनः प्रागभावः कस्मिन्कालेऽस्तीत्यत आह—उत्पत्तेरिति। [1]कार्यस्योत्पत्तेः प्राक् स्वप्रतियोगिसमवायिकारणे वर्तते इत्यर्थः।

ध्वंसं लक्षयति—सादिरिति। घटादिवारणाय अनन्त इति। आत्मादि-वारणाय सादिरिति। उत्पत्तीति। [2]कार्यस्योत्पत्त्यनन्तरं स्वप्रतियोगिसम-वायिकारणवृत्तिरित्यर्थः। स च 'ध्वस्तः' इति प्रत्ययविषयः।

अत्यन्ताभावं लक्षयति—त्रैकालिकेति। त्रैकालिकत्वे सति संसर्गा-वच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। ध्वंसप्रागभाववारणाय त्रैकालिकेति। भेदवारणाय [3]संसर्गेत्यादि।

हिन्दी

१. घटरूपकार्यका प्रागभाव घटोत्पत्तिके पूर्व स्वप्रतियोगीभूत जो घट, उसके समवायिकरणमें अर्थात् कपाल में रहता है।

२. घटध्वंस भी घटोत्पत्तिके अनन्तर होता है और स्वप्रतियोगीभूत घटके समवायिकरण कपाल में रहता है।

३. यहाँ संसर्गपद तादात्म्यसे अतिरिक्त सम्बन्धपरक होने से तादात्म्यसम्बन्धाव-च्छिन्नप्रतियोगिताकभेदका वारण हो गया। ध्वंस और प्रागभावकी प्रतियोगिता

In Public domain. Digitization Muthulakshmi Research Academy

अन्योन्याभावस्य किं लक्षणम् ?—

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः, यथा घटः पटो नेति ।

पदार्थानुपसंहरति—

सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम् ।

पदकृत्यम्

अन्योन्याभावं लक्षयति—तादात्म्येति । प्रागभावप्रध्वंसाभाववारणाय तादात्म्येति । अत्यन्ताभाववारणाय तादात्म्यत्वेन सम्बन्धो विशेषणीयः ।

[1]पदार्थज्ञानस्य परमप्रयोजनं मोक्ष इत्यामनन्ति । स च आत्यन्तिकैकविंशतिदुःखध्वंसः । [2]आत्यन्तिकत्वं च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनत्वम् । दुःखध्वंसस्येदानीमपि सत्त्वेनास्मदादीनामपि मुक्तत्वापत्तिवारणाय कालीनान्तम् । मुक्त्यात्मकदुःखध्वंसस्यान्यदीयदुःखप्रागभावसमानकालीनत्वाद्वामदेवादीनां मुक्तात्मनाप्यमुक्तत्वप्रसंगात्स्वसमा [3]नाधिकरणेति प्रागभावविशेषणम् । [4]दुःखानि चैकविंशतिः—'शरीरं षडिन्द्रियाणि

हिन्दी

संसर्गावच्छिन्न नहीं होती है, इस दृष्टि से तो मूल में 'त्रैकालिक' पद स्वरूपाख्यानमात्र है ।

१. इन द्रव्यादि सप्तपदार्थोंके ज्ञानका परमप्रयोजन मोक्ष है, ऐसा सूत्र-भाष्यादि में कहा गया है ।

२. दुःखध्वंस में आत्यन्तिकत्व यह है—स्व = दुःखध्वंस, तत्समानाधिकरण दुःखप्रागभाव अमुक्त में होता है, क्योंकि जो मुक्त नहीं है, उसमें कुछ दुःखोंका ध्वंस होनेपर भी भावी दुःखोंका प्रागभाव भी रहता है, अतः उसका दुःखध्वंस स्वसमानाधिकरणदुःखप्रागभावका समानकालीन होनेसे आत्यन्तिक दुःखध्वंस नहीं हुआ । मुक्तका दुःखध्वंस आत्यन्तिक होता है, क्योंकि उसमें भावी दुःख नहीं होने से वह दुःखध्वंस स्वसमानाधिकरणदुःखप्रागभावका असमानकालीन होता है ।

३. वामदेव आदि मुक्तात्माओंका दुःखध्वंस भी अन्यदीय दुःखप्रागभावका समानकालीन होने से आत्यन्तिक नहीं हो सकेगा, इस दोषके निवारण के लिए दुःखप्रागभावमें 'स्वसमानाधिकरण' यह विशेषण लगाया गया । अर्थात् वामदेवादिका दुःखध्वंस अपने दुःखप्रागभावकालीन नहीं होने से आत्यन्तिक है ।

४. शरीर, छः इन्द्रियाँ, छः विषय, छः ज्ञान, सुख और दुःख ये इक्कीस दुःख हैं। दुःख का साधन होने से शरीरादि उन्नीस भी गौणदुःख हैं । सुख भी दुःखानुषङ्गी होनेसे तथा दुःखहेतुभूत रागका जनक होनेसे दुःख हैं ।

In Public domain. Digitization Muthulakshmi Research Academy

काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नम्भट्टेन विदुषा रचितस्तर्कसंग्रहः ॥
इति श्रीमहामहोपाध्यायान्नम्भट्टविरचितस्तर्कसंग्रहः समाप्तः ।

—: ० :—

पदकृत्यम्

षड्विषयाः षड्बुद्धयः सुखं दुःखं चेति' । दुःखानुषङ्गित्वाच्छरीरादौ गौणदुःखत्वम् । तथा च[1] 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतेरात्मज्ञानसाधननिदिध्यासनमननसाधनत्वं पदार्थज्ञाने संजाघटीति । एवं च [2]तत्त्वज्ञाने सति शरीरपुत्रादावात्मत्वस्वीयत्वाभिमानरूपमिथ्याज्ञानस्य नाशः, तेन दोषाभावः, तेन प्रवृत्त्यनुत्पत्तिः, ततस्तत्कालीनशरीरेण कायव्यूहेन वा भोगतत्त्वज्ञानाभ्यां प्रारब्धकर्मणां नाशः, ततो जन्माभावः ।

नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत् ॥
अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः ।

इत्यादिवचनात् 'तमेव विदित्वाऽतिमृत्युमेति' इति श्रुतेश्च । सगुणोपासनाकाशीमरणादेरपि तत्त्वज्ञानद्वारा मुक्तिहेतुत्वम् । अत एव परमेश्वरः काश्यां तारकमुपदिशतीति सारम् ।

चक्रे चन्द्रजसिंहो हि पदकृत्यमिदं शुभम् ।
परोपकारकरणं माधवो वीक्षतां परम् ॥

इति श्रीमत्तत्रभवद्गुरुदत्तसिंहशिष्यश्रीचन्द्रजसिंहविरचितं
पदकृत्यं समाप्तम् ।

— :०:—

हिन्दी

१. "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः" इत्यादि श्रुतिके अनुसार आत्मज्ञानका साधन निदिध्यासन एवं मनन भी है तथा यह निदिध्यासन एवं मनन पदार्थज्ञान होनेपर ही हो सकता है । इसलिए पदार्थज्ञानके मोक्षसाधन होनेमें कोई विप्रतिपत्ति नहीं है ।

२. पदार्थतत्त्वज्ञान होनेपर शरीरपुत्रादिमें आत्मत्व और स्वीयत्वका अभिमानरूप मिथ्याज्ञानका नाश नाश हो जाता है । उससे प्रवृत्तिकी उत्पत्ति नहीं होती है, तदनन्तर भोग और तत्वज्ञानद्वारा प्रारब्धकर्मका नाश हो जानेपर पुनः जन्मग्रहण नहीं होता । तत्त्वज्ञानसे मोक्ष होता है, इसमें "नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्" इत्यादि वचन तथा "तमेव विदित्वाऽति मृत्युमेति" यह श्रुति प्रमाण है । अन्यत्र

In Public domain. Digitization Muthulakshmi Research Academy

सगुणोपासना एवं काशीमरणादिको मुक्तिका हेतु कहा गया है, किन्तु वह भी तत्त्वज्ञानके द्वारा ही मुक्तिका हेतु है, साक्षात् नहीं। इसीलिए काशीमें परमेश्वर तारकमन्त्रका उपदेश देते हैं। वह तारकमन्त्र तत्त्वज्ञान ही है। इति शिवम्।

टिप्पणी पदकृत्यस्य गूढभावावबोधिनी।
मया संयोजिता नूनं छात्राणां हितमावहेत्॥

इति न्यायवेदान्तसांख्ययोगाचार्यश्रीकेदारनाथत्रिपाठिविरचिता
तर्कसंग्रहपदकृत्यस्य हिन्दीटिप्पणी समाप्ता।

—:०:—

Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

तर्क-संग्रह

डॉ० दयानन्द भार्गव

न्याय-वैशेषिक दर्शन के तर्क-संग्रह-जैसे प्रामाणिक ग्रन्थ पर ऐतिहासिक तथा तुलनात्मक दृष्टि से हिन्दी में लिखी गई यह प्रथम व्याख्या है। शास्त्रीय विषय-वस्तु को आधुनिक दृष्टि से प्रस्तुत करते समय व्याख्या कहीं भी कठिन न होकर जटिल प्रश्नों को कुशलता से हल करती गई है। ग्रन्थ की लगभग सभी प्रामाणिक टीकाओं से प्रासङ्गिक उद्धरण व्याख्या-सहित दे दिए गए हैं। तुलना के लिए बीस से ऊपर आकर-ग्रन्थों का तथा लगभग पन्द्रह आधुनिक ग्रन्थों एवं शोध-पत्रिकाओं का उपयोग किया गया है।

स्वोपज्ञ-टीका दीपिका, विस्तृत भूमिका, बौद्ध, जैन तथा पाश्चात्य न्याय पर तीन परिशिष्ट और शब्दानुक्रमणी तथा उद्धरणानुक्रमणी सहित यह ग्रन्थ न्याय-वैशेषिक दर्शन के प्रत्येक जिज्ञासु के लिए तृप्तिकर सिद्ध होगा। रु० २५

तर्कभाषा

बदरीनाथ शुक्ल

केशवमिश्र द्वारा विरचित यह ग्रन्थ न्याय एवं वैशेषिक दर्शन के प्रतिपाद्य विषयों का सम्यक् ज्ञान कराने वाली अनुपम कृति है। इसके अध्ययन से दोनों शास्त्रों का पर्याप्त परिचय हो जाता है।

यह ग्रन्थ वैज्ञानिक प्रणाली से लिखा गया है। इसमें वात्स्यायनप्रोक्त प्रमाण-प्रमेयादि सोलह पदार्थों का क्रमशः भेदोपभेदसहित विस्तृत एवं सुबोध विवेचन किया गया है जो अन्यत्र किसी व्याख्या में नहीं है।

इस ग्रन्थ पर कई व्याख्याएं लिखी गई हैं। तो भी इसमें कई ऐसे स्थल हैं जिनका मर्मज्ञान इन व्याख्याओं से नहीं हो पाता। इन अभावों को दूर करने के लिए प्रस्तुत व्याख्या तैयार की गई है।

इस व्याख्या में यथास्थान मूल ग्रन्थ के प्रत्येक स्थल पर पर्याप्त स्पष्टीकरण किया गया है और आवश्यकतानुसार कुछ विस्तृत विवेचन तथा अनेक विषयों के सम्बन्ध में अन्य दर्शनों के दृष्टिकोण का सन्निवेश किया गया है। इस बात का पूरा प्रयत्न किया गया है कि प्रतिपाद्य विषय का विशद विवेचन हो, किन्तु विशदीकरण के प्रयास में भाषा में शैथिल्य न आने पाए, जिसके कारण आधुनिक व्याख्या-ग्रन्थों में कई विषय-सम्बन्धी त्रुटियाँ आ जाती हैं।

(अजिल्द) रु० १५; (सजिल्द) रु० २५

भारतीय दर्शन की रूप-रेखा

हरेन्द्र प्रसाद सिन्हा

प्रस्तुत कृति 'भारतीय दर्शन की रूप-रेखा' में विभिन्न विषयों का तुलनात्मक तथा आलोचनात्मक विवेचन, नवीन सामग्री सहित सुस्पष्ट एवं सर्वग्राही भाषा में किया गया है।

पुस्तक के प्रारम्भिक भाग में भारतीय वेदों और उपनिषदों के दर्शन का, इसके पश्चात् गीता, चार्वाक, बौद्ध, जैन, वैशेषक, सांख्य, योग, मीमांसा आदि विभिन्न दर्शनों का, अन्त में शंकर के अद्वैत दर्शन व रामानुज के विशिष्टाद्वैत दर्शन का सुन्दर रूप से प्रस्तुतीकरण है। (अजिल्द) रु० २८; (सजिल्द) रु० ४५

मोतीलाल बनारसीदास

दिल्ली वाराणसी पटना मद्रास